





श्रीमद् [illegible] नमः

श्रीमदन्नम्भट्टविरचिततर्कसङ्ग्रहव्याख्यानरूप

पारिभाषिकपदार्थसङ्ग्रहयुतम्

स्वकीयया टिप्पण्या च समलङ्कृतम्

तर्कसङ्ग्रहसर्वस्वम्

श्रीमत्कुरगंट्युपनामकश्रीसूर्यनारायणशास्त्रिहितोपतनूभवेन विद्वच्छिरोमणिवेमूर्युपनामक श्री रामब्रह्मसुधीन्द्रगुरुचरणपङ्कजसेवासमुपलब्धविज्ञानेन त्रिलिङ्गदेशविराजमान तेनालि संस्कृतकलाशालायां तर्कालङ्कारशास्त्राध्यापकेन * वेमुरुग्राम वास्तव्येन

कुरगंटि श्रीरामशास्त्रिणा

न्यायशास्त्र तर्कशास्त्र व्युत्पित्सूनामत्यन्तोपकाराय विरचितम्. चिन्नन्दूरुग्रामवास्तव्यस्य श्री गोपालशास्त्रितृतीयतनूभवस्य * कुप्पा शङ्करशास्त्रिणः * धनसाहाय्येन विजयवाड (बेजवाड) पुर्यां विद्योतमानायां

श्रीशारदाभाण्डारमुद्राशालायां

श्री काङ्गाल आञ्जनेयमहाशयेन मुद्रापितं सत्

विजयतेतमाम्

अस्य मूल्यम् रूप्यकत्रयम् (रू. ३—०—०)

प्रापणव्ययः पृथक्

१—५-१९३४

पत्रादिप्रेषणस्थानम्

☞ तेनालि ... ... (पोस्टु)

गुंटूरु ... ... जिल्ला

मद्रासु .. .. राजधानी

तर्कपण्डितः

कुरुगंटि श्रीरामशास्त्री

संस्कृतान्ध्रांग्लभाषास्वन्यतमया भाषया तदन्यतमया लिप्या च विषयः स्वकीयग्रामनामादिकं (जिल्ला तालूका प्रभृति) विलेखनीयम् ॥

अड्रसु. आन्ध्रलिप्या आंग्ललिप्या वा लेखनीयम् ॥

N. B. All Correspondence in English, Telugu or Sanskrit

the Superscription in English or Telugu only.

Foreign price for Copy 6 Shillings

Address:-

Kuruganti Sreeramasastry

Tarka Pandit.

☞ Tenali (P. O.)

Guntur District

Madras Presidency

5-5-1924. INDIA.

तर्कसङ्ग्रहग्रन्थे

विषयानुक्रमणिका

विषयसंख्या	विषयाः	पृष्ठसंख्या
१	पर्यायशब्दाः	१
२	द्रव्यभेदेन गुणविभागः	६
३	द्रव्यभेदेन विशेषगुणविभागः	७
४	द्रव्यभेदेन सामान्यगुणविभागः	८
५	मूर्तवृत्तिगुणनिरूपणम्	८
६	अमूर्तवृत्तिगुणनिरूपणम्	८
७	उभयवृत्तिगुणनिरूपणम्	९
८	द्वीन्द्रियग्राह्यगुणनिरूपणम्	९
९	बाह्यैकैकेन्द्रियग्राह्यगुणनिरूपणम्	९
१०	अतीन्द्रियगुणनिरूपणम्	९
११	अनेकाश्रितगुणनिरूपणम्	९
१२	एकैकद्रव्यवृत्तिगुणनिरूपणम्	९
१३	कारणगुणोद्भवगुणनिरूपणम्	९
१४	अकारणगुणोद्भवगुणनिरूपणम्	१०
१५	समवायिकारणनिरूपणम्	१०
१६	असमवायिकारणनिरूपणम्	१०
१७	निमित्तकारणनिरूपणम्	१०
१८	कारणताद्वयविशिष्टगुणनिरूपणम्	१०
१९	निरूप्यनिरूपकनिरूपणम्	११
२०	धर्मावच्छिन्नपदार्थनिरूपणम्	११
२१	सम्बन्धावच्छिन्नपदार्थनिरूपणम्	१२

विषयसंख्या	विषयक्रमः	पृष्ठसंख्या
२२	सम्बन्धानवच्छिन्नपदार्थनिरूपणम्	१२
२३	केवलान्वयिपदार्थनिरूपणम्	१२
२४	व्यतिरेकिपदार्थनिरूपणम्	१२
२५	व्याप्यवृत्तिपदार्थनिरूपणम्	१३
२६	अव्याप्यवृत्तिपदार्थनिरूपणम्	१३
२७	नित्यपदार्थनिरूपणम्	१३
२८	कार्यभेदेन समवाय्यसमवायिनिमित्तकारणनिरूपणम्	१४
२९	फलभेदेन व्यापारकरणनिरूपणम्	१६
३०	मतभेदेन प्रमाणनिरूपणम्	१८
३१	अस्मिन् मते प्रमाणचतुष्टयावश्यकतानिरूपणम्	१८
३२	व्याप्यव्यापकनिरूपणम्	१८
३३	पक्षसाध्यहेतुनिरूपणम्	१९
३४	प्रकारविशेष्यनिरूपणम्	१९
३५	कार्यतावच्छेदकधर्मनिरूपणम्	२१
३६	कारणतावच्छेदकधर्मनिरूपणम्	२१
३७	लक्ष्यतावच्छेदकधर्मनिरूपणम्	२१
३८	साध्यसाधनतावच्छेदकधर्मनिरूपणम्	२१
३९	व्याप्यव्यापकतावच्छेदकधर्मनिरूपणम्	२२
४०	आधेयतावच्छेदकसम्बन्धनिरूपणम्	२२
४१	प्रतियोगितावच्छेदकसम्बन्धनिरूपणं	२२
४२	साध्यतावच्छेदकसम्बन्धनिरूपणं	२३
४३	एकविधपदार्थनिरूपणं	२३
४४	द्विविधपदार्थनिरूपणं	२३
४५	त्रिविधपदार्थनिरूपणं	२९
४६	चतुर्विधपदार्थनिरूपणं	३२

विषयसंख्या	विषयक्रमः	पृष्ठसंख्या
४७	पञ्चविधपदार्थनिरूपणं	३३
४८	षड्विधपदार्थनिरूपणं	३४
४९	सप्तविधपदार्थनिरूपणं	३४
५०	नवविधपदार्थनिरूपणं	३४
५१	षोडशपदार्थनिरूपणं	३४
५२	एकविंशतिविधपदार्थनिरूपणं	३०
५३	चतुर्विंशतिविधपदार्थनिरूपणं	३५
५४	अनन्तपदार्थनिरूपणं	३५
५५	नियमाः	३५
५६	परिष्कारः	३७
५७	चक्षुर्ग्राह्यपदार्थनिरूपणं	४४
५८	त्वगिन्द्रियग्राह्यपदार्थनिरूपणं	४४
५९	रसनेन्द्रियग्राह्यपदार्थनिरूपणं	४४
६०	घ्राणेन्द्रियग्राह्यपदार्थनिरूपणं	४४
६१	श्रोत्रेन्द्रियग्राह्यपदार्थनिरूपणं	४५
६२	मनोग्राह्यपदार्थनिरूपणं	४५
६३	अभावनिरूपणं	४६
६४	वृत्तिनियामकसम्बन्धनिरूपणं	४८
६५	वृत्त्यनियामकसम्बन्धनिरूपणं	४९
६६	लक्षणदोषनिरूपणं	४९
६७	हेतुदोषनिरूपणं	५०
६८	सर्वेषाञ्च पदार्थानां क्लृप्तपदार्थेष्वन्तर्भावप्रकारः	५१
६९	भावरूपाभावनिरूपणं	५२
७०	ज्ञायमानस्य कारणत्वप्रतिबन्धकत्वनिरासः	५३
७१	कार्यकारणभावविचारः	५४
७२	प्रतिबध्यप्रतिबन्धकभावविचारः	५७

विषयसंख्या	विषयक्रमः	पृष्टसंख्या
७३	विषयताविचारः	६३
७४	क्रमेणप्रत्यक्षादिप्रमाणचतुष्टयनिरूपणं सङ्गतिनिरूपणं	६४
[illegible]	शाब्दबोधविचारः	६६
७६	अवच्छिन्नानवच्छिन्नविषयताविचारः	६९
७७	विभक्त्यर्थविचारः	६९
७८	द्वितीयाविभक्त्यर्थविचारः	७०
[illegible]	[illegible]	७१
८०	चतुर्थीविभक्त्यर्थविचारः	७२
८१	पञ्चमीविभक्त्यर्थविचारः	७४
८२	षष्ठीविभक्त्यर्थविचारः	७५
८३	सप्तमीविभक्त्यर्थविचारः	७७
८४	अव्ययार्थविचारः	७९
[illegible]	[illegible]	८१
८६	अभावविशेषविषये मतभेदाः	८२
८७	प्रत्यक्षादिप्रमाणैः पदार्थसिद्धिविचारः	८२
८८	जातिसिद्धिविचारः	९६
८९	एवकारविचारः	१०९
९०	प्रत्यक्षपरिच्छेदः	
९१	अनुमानपरिच्छेदः	
९२	उपमानपरिच्छेदः	
९३	शब्दपरिच्छेदः	
९४	अयथार्थानुभवादिनिरूपणं	

ॐ

॥श्रीः॥ उपोद्घातः ॥श्रीः॥

अस्ति खलु सर्वासाम् भाषाणाम् मातृभूता गैर्वाणी वाणी। तत्र च पूर्वोत्तरमीमांसाव्याकरणालङ्कारप्रभृतिशास्त्राणाम् विमर्शापेक्षतया विमर्शस्य च न्यायशास्त्रैकसाध्यतया तस्य गौतमप्रभृतिभिः मुनिभिः गदाधरादिभिः पण्डितसार्वभौमैः बहुधा विवृतस्यापि तत्रापि दुर्बोधतां मन्यमानेनान्नम्भट्ट विबुधवर्येण कणादगौतममुनिमतद्वयमनुसृत्य सुलभया सरलया च शैल्या संक्षेपतः शास्त्रस्य सर्वोऽपि सारो निरूपितएव। तथापि निरूप्यत्वनिरूपकत्वकार्यत्वकारणत्वाऽऽधेयत्वाऽधिकरणत्वाऽवच्छेद्यत्वाऽवच्छेदकत्वप्रभृतिपारिभाषिकपदार्थघटितलक्षण तत्समन्वय तद्दोषप्रसक्ति तन्निवारण लक्षणपरिष्कारप्रभृति विषयजातमध्येतृभिः महता क्लेशेन संसध्यं भवति। अतः तादृशक्लेशमन्तराऽपि तादृशलक्षण तत्समन्वयातिव्याप्त्यव्या [illegible] विषयजातं बोधयितुं शक्तम्, श्रीमदन्नम्भट्टविरचिततर्कसङ्ग्रह व्याख्यानरूपम्, इदम्,

तर्कसङ्ग्रहसर्वस्वम्

व्यरचि। इदञ्चशाब्दबोधलक्षणसमन्वयातिव्याप्त्यादिदोषप्रसक्तितन्निराकरणादिप्रदर्शनेनाध्येतृणाम् तत्र तत्र लक्षणेषु प्रायशो विशेषार्थबोधनेनाध्यापकानामनभ्यस्तसम्पूर्णन्यायशास्त्राणाम् गीर्वाणभाषयासाकमांग्लैभाषायामधीतिनांधीमताम् शिरोमणिकक्ष्यां विद्वत्कक्ष्यांवाऽधिजिगामिषूणाम् न्यायशास्त्र (तर्कशास्त्र) व्युत्पित्सूनां सर्वेषामपि सुलभया शैल्या सम्प्रदायासि

कस्य न्यायशास्त्रीयपदार्थस्य बोधनमुखेनोपकाराय प्रभवति । अत्रादौ पारिभाषिकपदार्थसङ्ग्रहे बहुकालन्यायशास्त्रानुशीलनेन समधिगम्याः न्यायशास्त्रीयपारिभाषिकपदार्था अध्येतृणाम नायासेन सुदृढप्रज्ञासम्पादनाय न्यरूप्यन्त । पारिभाषिकपदार्थ सङ्ग्रहे तर्कसङ्ग्रहव्याख्यानावसरे च तत्र तत्रातिसुलभा नातिसुलभाश्च विषयाः [illegible]पयेऽधिकारितारतम्येनोपयोगाय निरूपिताः। किञ्चिद्व्युत्पन्नानामप्युपयोगाय केचन विषया निरूपिताः इति वस्तुगत्यैवोच्यते, नत्वात्मश्लाघया। अतश्च निरसूयाः पण्डिता अत्रत्यान् गुणान् गृह्णन्त्विति मुहुर्मुहुरभ्यर्थये ॥

एतादृश्यैव शैल्या समुपेतं, श्रीमदन्नम्भट्टविरचिततर्कसङ्ग्रहदीपिकाव्याख्यानरूपम्,

दीपिकासारसर्वस्वम्

अस्माभिरचिरेणैव प्रकटीकरिष्यते॥ यद्यत्र ये केचन प्रमादतः पतिता विषयाः पण्डितैरुपलब्धा अस्मभ्यम् प्रख्याप्येरन् तेऽस्माभिः द्वितीयमुद्रणावसरे परिशोध्येरन् ॥

इति
पण्डितविधेयः
संस्कृतकलाशालायाम्
तर्कालङ्कारशास्त्राध्यापकः
ग्रन्थकर्ता
कुरुगंटि श्रीरामशास्त्री

तेनालि

रक्ताक्षिनामसंवत्सर वैशाखशुक्लपक्ष द्वितीयां,
इन्दुवासरे. ५—५—१९२४

सदा शिवमस्तु ॐ श्रीम् ॐ शुभम् भवतु

व्यरचि मयेदं पारिभाषिकपदार्थसङ्ग्रहस हितम् तर्कसङ्ग्रहसर्वस्वाभिधम् प्रकरणमर्वा गेव वर्षेभ्यः पञ्चपेभ्यः। अथापि द्रविणोप पत्तिविरहेणैतायतापि कालेन नामुद्राप्यत। साम्प्रतञ्च त्रिलिङ्गदेशनायकायमानगुंटूरुमण्ड लान्तर्वार्ति श्रीकृष्णातटिनीसमीपवर्ति * श्री चिन्वलूरुग्रामाभिजनेन चरकप्रभृत्यायुर्वेदसमु पलब्धनिरुपमनवनवोन्मेषप्रकाशमानप्रज्ञाविशे षेण गुंटूरुमण्डलान्तर्विराजमानतेनालिनगर संस्थापितायुर्वेदौषधनिलयेन अर्थिजनचकोर क्षपाकरेण सरसहृदन्तरेण सहृदयपदमन्वर्थ यता सुचतुरवचनेन सुजनवरेण्येन श्री कृष्णा वंशमुक्ताफलेन वेदवेदाङ्गनिरतश्रीगोपाल शास्त्रितृतीयतनूभवेन ☞ श्री शङ्कर शास्त्रिणा साकं मम निरुपमं सौहार्दम् समजनि। निरुपाधिककृपाशालिनो महाशय

कस्य न्यायशास्त्रीयपदार्थस्य बोधनमुखेनोपकाराय प्रभवति। अत्रादौ पारिभाषिकपदार्थसङ्ग्रहे बहुकालन्यायशास्त्रानुसनेन समधिगम्याः न्यायशास्त्रीयपारिभाषिकपदार्था अध्येतॄणाम नायासेन सुदृढप्रज्ञासम्पादनाय न्यरूप्यन्त। पारिभाषिकपदार्थ सङ्ग्रहे तर्कसङ्ग्रहव्याख्यानावसरे च तत्तत्रातिसुलभा नातिसुल भाश्च विषयाः कृपये ऽधिकारितारतम्येनोपयोगाय निरूपिताः। किञ्चिद्व्युत्पन्नानामप्युपयोगाय केचन विषया निरूपिताः इति वस्तुगत्यैवोच्यते, नत्वात्मश्लाघया। अतश्च निरसूयाः पण्डि ताअल्पान् गुणान् गृह्णन्त्विति मुहुर्मुहुरभ्यर्थये॥

एतादृश्यैव शैल्या समुपेतं, श्रीमदन्नम्भट्टविरचिततर्कसङ्ग्रहदीपिकाव्याख्यानरूपम्,

दीपिकासारसर्वस्वम्

अस्माभिरचिरेणैव प्रकटीकरिष्यते॥ यद्यत्र येकेचन प्रमादतः पतिता विषयाः पण्डितैरुपलब्धा अस्मभ्यम् प्रख्यापये रन् तेऽस्माभिः द्वितीयमुद्रणावसरे परिशोध्येरन्॥

इति
पण्डितविधेयः
संस्कृतकलाशालायाम्
तर्कालङ्कारशास्त्राध्यापकः
ग्रन्थकर्ता
कुरुगंटि श्रीरामशास्त्री

तेनालि

रक्ताक्षिनामसंवत्सर वैशाखशुक्लपक्ष द्वितीयां,
इन्दुवासरे. ५—५—१९२४

सदा श्रीरस्तु शुभम् भवतु

ॐ श्रीम् ॐ

व्यरचि मयेदं पारिभाषिकपदार्थसङ्ग्रहस
हितम् तर्कसङ्ग्रहसर्वस्वाभिधम् प्रकरणमर्वा
गेव वर्षेभ्यः पञ्चषेभ्यः। अथापि द्रविणोप
पत्तिविरहेणैतायतापि कालेन नामुद्राप्यत।
साम्प्रतञ्च त्रिलिङ्गदेशनायकायमानगुंटूरुमण्ड
लान्तर्वर्ति श्रीकृष्णातटिनीसमीपवर्ति * श्री
चिन्ब्रल्लूरुग्रामाभिजनेन चरकप्रभृत्यायुर्वेदसमु
पलब्धनिरुपमनवनवोन्मेषप्रकाशमानप्रज्ञाविशे
षेण गुंटूरुमण्डलान्तर्विराजमानतेनालिनगर
संस्थापितायुर्वेदौषधनिलयेन अर्थिजनचकोर
क्षपाकरेण सरसहृदन्तरेण सहृदयपदमन्वर्थ
यता सुचतुरवचनेन सुजनवरेण्येन श्री कुप्पा
वंशमुक्ताफलेन वेदवेदाङ्गनिरतश्रीगोपाल
शास्त्रितृतीयसूनुभवेन ☞ श्री शङ्कर
शास्त्रिणा साकं मम निरुपमं सौहार्दम्
समजनि। निरुपाधिककृपाशालिनो महाशय

स्वास्यानुग्रहवशेन साम्प्रतमिदममुद्राप्यत। सान्ववायमेनं महाशयम् सततं कुशलमनुवर्ता तामिति भगवन्तमभ्यर्थये ॥

* नित्यश्रीरस्तु *

नित्यमङ्गळानि भवन्तु.

श्रीः श्रीः श्रीः

15-5-1924. कुरुगंटि श्रीरामशास्त्री

तेनालि.



श्रीशिवाय गुरवे नमः।

तर्कसंग्रहसर्वस्वम्

श्रीन्यायांबुधि मंथनोत्थित महाविज्ञानभास्वत्सुधा
धाराधारतयाऽतिधीर हृदय स्याद्वैतविद्यांबुधेः।
वेमूर्यन्वय वार्धि पूर्णशशिन स्सौजन्यवारांनिधेः
रामब्रह्मसुधींद्र देशिकमणेः पादाब्जसेवारतः॥
श्रीराम शास्त्री कुरुगंटि वंश्यः
श्रीसूर्यनारायण सूरि सूनुः।
ग्रंथस्य निर्विघ्नसमाप्तयेऽस्य
भज त्यजस्रं गिरिशं गणेशम्॥
अन्नंभट्ट बुधप्रोक्त संग्रहार्थ प्रकाशकम्।
तर्कसंग्रह सर्वस्वं कुर्वे बालसुबोधकम्॥

॥ पारिभाषिक पदार्थ संग्रहप्रारंभः ॥

तत्र पर्याय शब्दाः

पदार्थाः अभिधेयाः प्रमेयाः ज्ञेयाः इत्यादयः पर्यायशब्दाः। द्रव्यं गुणी गुणवान् कर्मवान् क्रियावान् [illegible] ॥ [illegible] इत्यादयः। [illegible] ॥ [illegible] इत्यादयः॥ [illegible] त्वं [illegible] त्वं इत्यादयः। अन्योन्याभावः भेदः [illegible] त्वं अन्यत्वं इतरत्वं भेदवत्वं इत्यादयः॥ ज्ञानं बुद्धिः बोधः संवित् धीः ग्रहः प्रत्ययः प्रतीतिः इत्यादयः। भ्रमः अयथार्थानुभवः अप्रमा इत्यादयः॥ स्वरूपसंबंधः

कालिकविशेषणतासंबंधः इत्यादयः॥ दैशिकसंबंधः स्वरूपविशेषणतासंबंधः इत्यादि। कालिकसंबंध दैशिकसंबंधरूप संबंधद्वय मपि सर्वाधारताप्रयोजकसंबंधत्वेन व्यवह्रियते॥ अनुमानं व्याप्तिज्ञानं इत्यादयः। प्रत्यक्षं प्रत्यक्षप्रमाणं इंद्रियं इत्यादयः॥ पदं शब्दः इति॥ निश्चितहेतुसाध्यवान् दृष्टांतः अन्वय दृष्टांतः अयमेवान्वय्युदाहरण मिति चोच्यते अमुमेव साध्यनिश्चयास्पदत्वमात्र मुपादायापि क्वचित्सपक्षत्वेन व्यवहरंति॥ निश्चितसाध्याभाववत्त्वभाववान् दृष्टांतः व्यतिरेकदृष्टांतः अयमेव व्यतिरेक्युदाहरण मित्युच्यते अस्यैव साध्याभावनिश्चयगोचरत्वमात्र मप्युपादाय क्वचि द्विपक्षत्वव्यवहारः। साधनं साधकं लिंगं हेतुः इत्यादयः। आधारत्वं आधारता आश्रयत्वं आश्रयता अधिकरणत्वं अधिकरणता इत्यादयः। आधेयत्वं आधेयता वृत्तिः सत्वं इत्यादयः॥ तत्सत्वं तद्वृत्तित्वं तन्निष्ठत्वं तद्वर्तमानत्वं तद्विद्यमानत्वं तदधिकरणकत्वं तदधिकरणताकत्वं तन्निष्ठाधिकरणतानिरूपकत्वं तदाश्रयकत्वं तदाधारकत्वं इत्यादयः॥ तद्विषयकत्वं तद्विषयताकत्वं तन्निष्ठविषयतानिरूपकत्वं तद्विषयित्वं तन्निष्ठविषयतानिरूपितविषयित्वं तद्विषयताशालित्वं तदवगाहित्वं तद्गोचरत्वं इत्यादयः॥ तद्विशेष्यकत्वं तद्विशेष्यताकत्वं तन्निष्ठविशेष्यतानिरूपकत्वं तद्विशेष्यित्वं तन्निष्ठविशेष्यतानिरूपितविशेष्यित्वं तद्विशेष्यताशालित्वं इत्यादयः। तत्प्रकारकत्वं तन्निष्ठप्रकारताकत्वं तन्निष्ठप्रकारतानिरूपकत्वं तत्प्रकारित्वं तन्निष्ठप्रकारतानिरूपितप्रकारित्वं तन्निष्ठप्रकारताशालित्वं इत्यादयः। तत्संसर्गकत्वं

तन्निष्ठसंसर्गताकत्वं तन्निष्ठसंसर्गतानिरूपकत्वं तत्संसर्गित्वं तन्निष्ठसंसर्गतानिरूपितसंसर्गित्वं तन्निष्ठसंसर्गताशालित्वं इत्यादयः। तत्प्रतियोगिकत्वं तत्प्रतियोगिताकत्वं तन्निष्ठप्रतियोगितानिरूपकत्वं तदनुयोगिकत्वं तदनुयोगिताकत्वं तन्निष्ठानुयोगितानिरूपकत्वं इति। कार्यत्वं जन्यत्वं हेतुमत्वं प्रयोज्यत्वं इति परंतु व्यवहितकार्ये प्रयोज्यता व्यवहार्या। कारणत्वं जनकत्वं हेतुत्वं प्रयोजकत्वं इत्यादयः। परंतु व्यवहित कारणे प्रयोजकता व्यवहार्या। तद्ग्राहकत्वं तत्प्रत्यक्ष जनकत्वं तदुपलंभकत्वं इत्यादयः। तत्प्रत्यक्षत्वं तत्साक्षात्कृतत्वं तद्ग्राह्यत्वं तज्जन्यप्रत्यक्षविषयत्वं तदुपलब्धत्वं इत्यादयः। अनुमितत्वं अनुमितिविषयत्वं इत्यादयः। चाक्षुषत्वं चक्षुरिंद्रियजन्यप्रत्यक्षविषयत्वं चक्षुर्ग्राह्यत्वं इत्यादयः। श्रावणत्वं श्रवणेंद्रियजन्य प्रत्यक्षविषयत्वं श्रोत्रग्राह्यत्वं इत्यादयः। एवं रासनत्वादिकं ग्राह्यं। एवं चाक्षुषादि शब्दानां चक्षुरिंद्रियादिजन्य प्रत्यक्षबोधकत्वमपि बोध्यं। समवेतत्वं समवायसम्बन्धावच्छिन्न वृत्तित्वं इत्यादयः। ईश्वरीयज्ञानं ईश्वरवृत्तिज्ञान मित्यादयः। 'प्रकृत्यर्थ प्रकारीभूतधर्मो भावप्रत्ययार्थ' इतिन्यायेन' तद्वत्वं तद्विशिष्टत्वं तद्युक्तत्वंच तदेव यथागंधवत्वं गन्धविशिष्टत्वं गन्धयुक्तत्वंच गन्धएव। सामानाधिकरण्य ऐकाधिकरण्य एकाधिकरण वृत्तित्व समानाधिकरणत्वंचेति। असामानाधिकरण्यं वैयधिकरण्य विरोधः विरुद्धत्व एकाधिकरणवृत्तित्वाभाव एकाधिकरणावृत्तित्व व्यधिकरणत्व भिन्नाधिकरणकत्वप्रभृतयः। नियतत्व व्यापकत्व। घटाभावः घटत्वावच्छि

घटप्रतियोगितानिरूपकाभावः घटप्रतियोगिकाभावः। समवायसंबंधेनघटाभावः समवायसंबंधावच्छिन्नघटत्वावच्छिन्नप्रतियोगितानिरूपकाभावः इति। घटसामान्याभावः घटत्वातिरिक्तधर्मानवच्छिन्न प्रतियोगितानिरूपकाभावः इति। घटाधिकरण घटवत् घटत्वावच्छिन्नाधेयता निरूपिताधिकरणतावत् इति। संयोगसम्बन्धेन घटाधिकरणं संयोगसम्बन्धेनघटवत् संयोगसम्बन्धावच्छिन्नघटत्वा वच्छिन्नाधेयतानिरूपिताधिकरणतावदिति। वाच्यत्वं अभिधेयत्वंचेति। सव्यभिचारः अनैकांतिकः व्यभिचारीति। कालात्ययापदिष्टः बाधितः इति। आश्रयासिद्धिः पक्षाप्रसिद्धिः इति। तादात्म्यसम्बन्धः अभेदसम्बन्धः इति। तदवच्छेद्यत्वं तदवच्छिन्नत्वं तन्निष्ठावच्छेदकताकत्वं तन्निष्ठावच्छेदकतानिरूपकत्वंचेति। निरूप्यत्वं निरूपितत्व मिति। अतींद्रियत्वं इन्द्रियाग्राह्यत्वं इन्द्रियजन्यप्रत्यक्षाविषयत्व मिति। वारणं निवारण मिति। नाम वस्तुप्रतिपादकशब्द इति। ईश्वरसंकेतः ईश्वरेच्छा शक्तिः अभिधा इति। लक्षणा शक्यसम्बन्ध इति। इष्टं इच्छाविषयः। द्विष्टं द्वेषविषयः। कार्यकारणभावः जन्यजनकभावः हेतुहेतुमद्भावः साध्यसाधनभावः इति। असद्धेतुः दुष्टहेतुः हेत्वाभासः इति। उपादानं समवायिकारणं इति॥

घटावच्छिन्नभेदः घटवद्भेदः घटवान्नेतिप्रतीतिसिद्धभेदः घटत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदः इति। तुरीयविषयता चतुर्थविषयता चेति। प्रतियोगित्वं अभावाभावत्व मिति। प्रत्यक्षं अपरोक्षं साक्षात्कारः उपलब्धिः अध्यक्षं उपलम्भः इति। अनु

मा अनुमिति रिति। उपमा उपमिति रिति। शाब्द बोधः शाब्दज्ञानं शाब्दबुद्धिः अन्वयबोधः वाक्यार्थ बोधः वाक्यार्थज्ञान मित्यादयः। व्यवहारः शब्दप्रयोगः इति। स्मृतिः स्मरण मिति। निर्णयः निश्चय इति। प्रत्यक्षः प्रत्यक्षज्ञानविषयः अपरोक्षज्ञानविषयः साक्षात्कृतः साक्षात्कारविषयः उपलब्धः उपलब्धि विषय इति। अभावीयत्वं अभावनिरूपितत्वं इति। ज्ञानीयत्वं ज्ञाननिरूपितत्व मिति। संयोगसम्बन्धेन घटवान्नेतिप्रतीतिसिद्धभेदः संयोगसम्बन्धावच्छिन्न घटत्वा वच्छिन्नावच्छेदकताक प्रतियोगिताकभेदः इति। घटसम्बन्धिघटत्वावच्छिन्न संबद्धतानिरूपित सम्बन्धितावदिति। संयोगसम्बन्धेन घटसम्बन्धि संयोगसम्बन्धावच्छिन्न घटत्वावच्छिन्न सम्बद्धतानिरूपितसम्बन्धिताव दिति। संसर्गः सम्बन्ध इति। प्रतिपाद्यः प्रतीतिविषयः गम्य इति। घटासाधारणकारणं घटत्वावच्छिन्नकार्यतानिरूपितकारणताव दिति। घटानधिकरणत्वं घटाधिकरणत्वाभावः घटाधिकरण भिन्नत्व मिति। भूतलावृत्तित्वं भूतलनिरूपितवृत्तित्वाभाव इति। व्यतिरेकः अभाव इति। परजातिः व्यापकजाति रिति। सादित्वं कार्यत्वं उत्पत्तिमत्वं प्रागभावप्रतियोगित्व मिति। अनादित्वं उत्पत्तिशून्यत्वं प्रागभावाप्रतियोगित्व मिति। सांतत्वं नाशवत्वं ध्वंसवत्वं ध्वंसप्रतियोगित्वं नाशप्रतियोगित्व मिति। अनन्तत्वं ध्वंसशून्यत्वं नाशशून्यत्वं ध्वंसाप्रतियोगित्व मिति। नित्यत्वं ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्व मिति। साध्यवद्व्यावृत्तः साध्यवदवृत्तिः साध्यवन्निरूपितवृत्तित्वाभाववा नि

ति। कार्यं फल मिति। द्वारं व्यापार इति। फलितं पर्यवसन्न मिति। असाधारणधर्मः लक्षण मिति। खं-डप्रळयः अवांतरप्रळय इति। पीलवः परमाणव इति। निष्कर्षः परिष्कार इति। परमात्मा ईश्वर इति। रूपं वर्ण इति। प्रमानं परिमाण मिति। सुखं आनन्द इति। इच्छा काम इति। क्रोधः द्वेष इति। कृतिः प्रयत्नः कर्तृत्व मिति। पाकः विजातीयतेजस्संयोग इति। उष्णत्वं उष्णस्पर्श इति। शीतत्वं शीतस्पर्श इति। सहचारग्रहः सामानाधिकरण्यज्ञान मिति। प्रत्यासत्तिः सन्निकर्ष इति। संदेहः संशयः शंका इति॥

द्रव्यभेदेन गुणविभागः

अधिकरणद्रव्याणि। आधेयगुणाः।

पृथिवी—क्रमेण रूपादिद्रवत्वांता वेगश्चेति चतुर्दश गुणाः

जलं—मध्ये गंधं विहाय रूपादिद्रवत्वांता द्वादश स्नेहवेगौ चेति चतुर्दशगुणाः

तेजः—स्पर्शाद्यपरत्वांता अष्टौ रूपवेगद्रवत्वानी त्येकादशगुणाः

वायुः—स्पर्शाद्यपरत्वांता अष्टौ वेगश्चेति नव गुणाः

आकाशं—संख्यादि विभागांतपंचकं शब्दश्चेति षड् गुणाः

कालः—संख्यादि विभागांताः पंच गुणाः

दिक्—संख्यादि विभागांताः पंच गुणाः

जीवात्मा--संख्यादिपंचकं बुद्ध्यादिसंस्कारांता नवे
ति चतुर्दश गुणाः
परमात्मा--संख्यादिपंचकं ज्ञानेच्छा कृतय श्चेत्यष्टौ
गुणाः
मनः -संख्याद्यपरत्वांता स्सप्त वेगश्चेत्यष्टौ गुणाः

अमुमेवार्थं बोधयन् श्लोकश्च दृश्यते

श्लो॥ वायोर्नवैकादश तेजसो गुणाः जलक्षितिप्रा
णभृतां चतुर्दश। दिक्कालयोः पंच षडेवचांबरे महेश्व
रेऽष्टौ मनसस्तथैव चेति गुणसामान्यलक्षणंतु द्रव्यकर्म
भिन्नत्वेसति सामान्यवत्त्वं गुणत्वजातिमत्त्वंवा बोध्यं

द्रव्यभेदेन विशेषगुणविभागः

श्लो॥ रूपं गंधो रसस्स्पर्शः स्नेहस्सांसिद्धिको द्रवः।
बुद्ध्यादिभावनांताश्च। शब्दोवैशेषिका गुणाइति। एते
षोडश विशेषगुणाः॥

अधिकरणद्रव्याणि। आधेयविशेषगुणाः।
पृथिवी—रूपरसगंधस्पर्शाश्चत्वारो विशेषगुणाः
जलं—रूपरसस्पर्शस्नेह सांसिद्धिकद्रवत्वानि पंच
तेजः—रूपस्पर्शौ द्वौ
वायुः—स्पर्श एक एव
आकाशः— शब्द एक एव
जीवात्मा—बुद्ध्यादिभावनांता नव गुणाः
परमात्मा—ज्ञानेच्छाकृतित्रयं ईश्वरे नित्यसुखांगी
कारे चत्वारो गुणाः
कालदिङ्मनस्सु विशेषगुणाः केपि नसंतीति ज्ञेयं

* द्रव्यभेदेन सामान्यगुणविभागः। *

श्लो॥ संख्यादिरपरत्वांतो द्रवोऽसांसिद्धिकस्तथा। गुरुत्ववेगौ सामान्य। गुणा एते प्रकीर्तिताः। एते दश सामान्यगुणाः।

अधिकरणद्रव्याणि आधेयसामान्यगुणाः

पृथिवी—निरुक्तश्लोकोक्ता दश गुणाः

जलं—असांसिद्धिकद्रवत्वं विहाय निरुक्तश्लोकोक्ता नव गुणाः।

तेजः—गुरुत्वं वर्जयित्वा निरुक्तश्लोकोक्ता नव गुणाः

वायुः—गुरुत्वासांसिद्धिकद्रवत्वे वर्जयित्वा पूर्वोक्ता अष्टगुणाः।

आकाशः—संख्यादिविभागांताः पंच गुणाः।

कालः—संख्यादिविभागांताः पंचगुणाः।

दिक्—संख्यादिविभागांताः पञ्च गुणाः

आत्मा—संख्यादिविभागांताः पञ्च गुणाः

मनः—संख्यादिविभागांताः पञ्च वेगश्चेति षड्गुणाः

* मूर्तवृत्तिगुणनिरूपणं *

मूर्तगुणाः अमूर्तद्रव्यावृत्तिगुणा इत्यर्थः॥

मूर्तत्वंच क्रियाश्रयत्वं पृथिव्यप्तेजो वायुमनांसि मूर्तद्रव्याणि॥

रूपादिचतुष्टयं परत्वादिपञ्चकं स्थितस्थापकवेगौ चेत्येकादश गुणा मूर्तगुणाः॥

* अमूर्तवृत्तिगुणनिरूपणं *

अमूर्तगुणाः मूर्तावृत्तिगुणा इत्यर्थः॥ तत्र शब्दादि भावनांता दश गुणाः॥

* उभयवृत्ति गुणनिरूपणं *

उभयगुणाः मूर्तामूर्तोभयगुणा इत्यर्थः संख्यादिविभागांताः पञ्च गुणाः ॥

* द्वीन्द्रियग्राह्य गुणनिरूपणं *

द्वीन्द्रियग्राह्याः त्वचच चाक्षुषाच ग्राह्या इत्यर्थः गुरुत्वमेकं व र्जयित्वा संख्यादिस्नेहान्ता नवगुणाः

* बाह्यैकैकेन्द्रियग्राह्य गुणनिरूपणं *

शब्दस्पर्शरूपरसगन्धाः पञ्चगुणा बाह्यैकैकेन्द्रियग्राह्या एव भवन्ति नतु द्वीन्द्रियग्राह्या भवन्ति

* अतींद्रिय गुणनिरूपणं *

गुरुत्वादृष्टभावना अतींयगुणाः अत्रभावनापदम् वेगभिन्न संस्कारपरम् तथाचातींद्रियगुणाः पञ्चेतिसिद्धम्

* अनेकाश्रित गुणनिरूपणं *

संयोगविभागौ द्वित्वत्रित्वादिसंख्याः द्विपृथक्त्व त्रिपृथ क्त्वादय श्चानेकाश्रित गुणाः

* एकैकद्रव्यवृत्ति गुणनिरूपणम् *

रूपादिचतुष्टय मेकत्वैकपृथक्त्वपरिमाणानि परत्वादिभाव नान्ता गुणा एकैकद्रव्यवृत्तयः

* कारणगुणोत्पन्न गुणनिरूपणं *

अपाकजरूपादिचतुष्टयं अपाकजं द्रवत्वं स्नेहवेगगुरुत्वैक पृथक्त्वपरिमाण स्थितस्थापकसंस्काराः कारणगुणोत्पन्ना गुणाः

कारणगुणोत्पन्नत्वंच स्वाश्रयसमवायिकारण वृत्तिगुणजन्यगुणत्वं यथाश्रुते बोध्यं

* अकारणगुणोत्पन्न गुणनिरूपणं *

शब्दादिभावनान्ता विभुविशेषगुणा अकारणगुणोत्पन्ना गुणाः अकारणगुणोत्पन्नत्वञ्च यथाश्रुते स्वाश्रयसमवायिकारणवृत्तिगुणाजन्यगुणत्वं बोध्यं

* समवायिकारण निरूपणं *

अवयविनं प्रत्यवयवाः स्वसमवेतजन्यगुणं स्वसमवेतक्रियां प्रतिच स्वमेवसमवायिकारणं अतो जन्यभावमात्रे द्रव्यमेव समवायिकारणं नान्यदितिसिद्धान्तः मात्रपदेन ध्वंसंप्रतिसमवाय्यसमवायिकारणे नस्त इतिध्येयं

* असमवायिकारण निरूपणं *

रूपादिचतुष्टयैकत्व संख्यापरिमाणैक पृथक्त्वस्थितस्थापक संस्कारस्नेहशब्दे ष्वसमवायिकारणत्व मिष्यते

* निमित्तकारण निरूपणं *

बुद्ध्यादिभावनान्तगुणेषु सामान्यादिचतुष्टयेच निमित्तकारणत्वमेवःवर्तते नान्यादिति सिद्धान्तः

* समवायिनिमित्तकारणता द्वयविशिष्टवस्तुनिरूपणं *

उष्णस्पर्श संयोग विभाग गुरुत्व द्रवत्व वेगेषु कर्माणिचासमवायिकारणत्वं निमित्तकारणत्वं च वर्तते । कालेश्वरयोस्स्वगत संयोगादिकं प्रति समवायिकारणत्वं कार्यमात्रं प्रति निमित्तका

रणत्वं च वर्तते इति द्रव्यगुणकर्मसु समवायिकारणत्वं निमित्तकारणत्वं च तत्तत्कार्यभेदेन संभवति अतः द्रव्य एव समवायिकारणत्वं गुणकर्मणोरेवासमवायिकारणत्वं द्रव्यादिसप्तपदार्थेष्वपि निमित्तकारणत्वं संभवतीति बोध्यं

निरूप्य निरूपक निरूपणं

निरूपिताः				निरूपकाः
प्रतियोगिता				अभावचतुष्टयं
विशेष्यता प्रकारता संसर्गतारूपविषयतात्रयं				ज्ञानेच्छाकृतिसंस्कारद्वेषाः पञ्चगुणाः
अधिकरणता	...	....	....	आधेयता
कारणता	...	....	....	कार्यता
स्वामिता	...	...	...	स्वता
निरूपकता	....	...	....	निरूप्यता
व्यापकता	....	....	....	व्याप्यता

अवच्छेदकता { कार्यता कारणता आधेयता अधिकरणता विशेष्यता प्रकारता संसर्गता विषयता अवच्छेदकता लक्ष्यता लक्षणता प्रतियोगिता अनुयोगिता निरूप्यता निरूपकता स्वता स्वामिता प्रभृतयः ॥

प्रकारता विशेष्यता संसर्गतानां परस्परं निरूप्य निरूपक भावो दृश्यते

धर्मावच्छिन्नपदार्थ निरूपणं

कार्यता कारणता आधेयता प्रतियोगिता अनुयोगिता लक्ष्यता लक्षणता व्याप्यता व्यापकता निरूप्यता निरूपकता प्रभृतयः घटादिनिष्ठा नियतं घटत्वाद्यवच्छिन्ना एव भवन्ति

परन्तु प्रकारता विशेष्यता संसर्गता विषयता अवच्छेदकताः ज्ञानभेदेन धर्मैरवच्छिन्ना स्तदनवच्छिन्नाश्च भवन्ति

* सम्बन्धावच्छिन्नपदार्थ निरूपणं *

प्रकारता प्रतियोगिता कार्यता कारणता आधेयता अवच्छेदकता व्याप्यता व्यापकता लक्षणता प्रभृतयः नियतं सम्बन्धावच्छिन्ना एव भवन्ति

* सम्बन्धानवच्छिन्नपदार्थ निरूपणं *

अनुयोगिता अधिकरणता विशेष्यता लक्ष्यता संसर्गता प्रभृतयः नियतं सम्बन्धानवच्छिन्ना एव भवन्ति

* केवलान्वयिपदार्थ निरूपणं *

स्वरूपसम्बन्धेन सर्वत्र वर्तमानत्वं अत्यन्ताभावाप्रतियोगित्वं वा केवलान्वयित्वं। वस्तुत्व वाच्यत्व प्रमेयत्व ज्ञेयत्व गगनाभाव कपिसंयोगाभाव व्यधिकरणसम्बन्धा वच्छिन्नप्रतियोगिताकाभाव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभाव प्रभृतयः केवलान्वयिपदार्थाः। वाच्यत्वमीश्वरेच्छा विषयत्वं इच्छाविषयत्वं वा। प्रमेयत्वमीश्वरीयप्रमाविषयत्वं प्रमाविषयत्वंवा। ज्ञेयत्वमीश्वरीयज्ञानविषयत्वं ज्ञानविषयत्वंवा। व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावः संयोगसम्बन्धेन गुणाभावादिः। व्यधिकरणधर्मावच्छिन्न प्रतियोगिताकाभावः घटत्वेन पटाभावादिः

* व्यतिरेकिपदार्थ निरूपणं *

स्वरूपसम्बन्धेन सर्वत्रावर्तमानत्वं मत्यन्ताभाव प्रतियोगित्वं वा व्यतिरेकित्वं। तेच केवलान्वयिपदार्थभिन्नाः द्रव्यत्व गुणत्व कर्मत्व घटत्व पटत्वादयः

व्याप्यवृत्तिपदार्थ निरूपणं

व्याप्यवृत्तित्वं च स्वसमानाधिकरणात्यंताभावाप्रतियोगित्वं। तच्च द्रव्यत्व गुणत्व कर्मत्वाभावत्व घटत्व पटत्वादयः

अव्याप्यवृत्तिपदार्थ निरूपणं

अव्याप्यवृत्तित्वं च स्वसमानाधिकरणात्यंताभावप्रतियोगित्वं। अव्याप्यवृत्तिर्द्विविधः कालिकाव्याप्यवृत्तिः दैशिकाव्याप्यवृत्तिश्चेति आद्यः द्रव्यं गुणः क्रियाच द्वितीयः कपिसंयोगादिः आदिपदेन विभागः विभुविशेषगुणाश्च ग्रहांते संयोगसम्बन्धेन द्रव्यमपि। दैशिकाव्याप्यवृत्ति सर्वं कालिकाव्याप्यवृत्ति भवति॥ ननु कालिकाव्याप्यवृत्ति सर्वं दैशिकाव्याप्यवृत्ति भवति रूपादौ व्यभिचारात् संयोगत्वेन संयोगो व्याप्यवृत्तिरिति प्राचीनाः सोऽप्यव्याप्यवृत्तिरिति नवीनाशयः

नित्यपदार्थ निरूपणं

पृथिव्यप्तेजोवायुपरमाणवः आकाशादिपंचकंच द्रव्याणि जलादित्रयपरमाणुगतं रूपरसस्पर्शान्यतमं, जलपरमाणुगतद्रवत्व स्नेहौ नित्यैकत्वपरिमाणे ईश्वरीयज्ञानेच्छाकृतयः सामान्यविशेषसमवायात्यन्तान्योन्याभावाश्च नित्यपदार्थाः। शब्दबुद्ध्योर्द्विक्षणावस्थायित्वं। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति। कर्मसर्वमप्यनित्यमेव

* कार्यभेदेन समवाय्यसमवायिनिमित्तकारण निरूपणं *

कालेश्वरादृष्टादिः कार्यमात्रंप्रति साधारण निमित्तकारणं। आत्ममनस्संयोगादिः ज्ञानमात्रंप्रति कारणम् भवति ॥

	समवायिकारणं	असमवायिकारणं	निमित्तकारणं
घटंप्रति	कपालं	कपालद्वयसंयोगः	दन्डचक्रसलिलकुलालादयः
पटंप्रति	तन्तवः	तन्तुसंयोगः	तुरीवेमादिकं
अवयविनंप्रति	अवयवाः	अवयवसंयोगः	कालेश्वरादृष्टादयः
अवयविरूपंप्रति	अवयवी	अवयवरूपं	कालेश्वरादृष्टादयः
पटरूपंप्रति	पटः	तन्तुरूपं	कालेश्वरादृष्टादयः
घटरूपंप्रति	घटः	कपालरूपं	कालेश्वरादृष्टादयः
पार्थिवद्व्यणुकरूपंप्रति	द्व्यणुकं	परमाणुरूपं	कालेश्वरादृष्टादयः
पार्थिवपरमाणुरूपंप्रति	परमाणुः	पाकः	कालेश्वरादृष्टादयः
संयोगजशब्दंप्रति	गगनं	भेर्याकाशसंयोगः	भेरीदन्डसंयोग प्रभृतयः
विभागजशब्दंप्रति	गगनं	वंशाकाशविभागः	कालेश्वरादृष्टादयः
शब्दजशब्दंप्रति	गगनं	पूर्वपूर्वशब्दाः	पवनप्रभृतयः

ज्ञानमात्रंप्रति	आत्मा	आत्ममनस्संयोगः	मनः प्रभृतयः
आद्यपतनंप्रति	फलादिकं	गुरुत्वं	काकागमनवायु प्रभृतयः
द्वितीयपतनंप्रति	फलादिकं	वेगः	कालेश्वरादृष्टादयः
कायपुस्तकसंयोगंप्रति	कायः पुस्तकञ्च	हस्तपुस्तकसंयोगः	कालेश्वरादृष्टादयः
क्रियाजन्यसंयोगंप्रति	पुस्तकं	क्रिया	कालेश्वरादृष्टादयः
विभागंप्रति	हस्तपुस्तकादिकं	क्रिया	कालेश्वरादृष्टादयः
पिठरपाकवादिमतेऽवयविरूपंप्रति	अवयवी	पाकः	कालेश्वरादृष्टादयः
अवयविगतरूपादि चतुष्टयंप्रति	अवयवी	अवयवनिष्ठरूपादि चतुष्टयं	कालेश्वरादृष्टादयः
अनित्यैकत्वंप्रति	अनित्यघटादि	अवयवगतैकत्वं	कालेश्वरादृष्टादयः
द्वित्वादिकंप्रति	आश्रयघटादिः	स्वसमानाधिकरण यावदेकत्वानि	अपेक्षाबुद्धिप्रभृतयः
अवयविपरिमाणंप्रति	अवयवी	अवयवपरिमाणं	कालेश्वरादृष्टादयः
त्र्यणुकपरिमाणंप्रति	त्र्यणुकं	द्व्यणुकगतत्रित्वं	कालेश्वरादृष्टादयः
द्व्यणुकपरिमाणंप्रति	द्व्यणुकं	परमाणुगतद्वित्वं	कालेश्वरादृष्टादयः
अनित्यमवयविगतमेक पृथक्त्वंप्रति	अवयवी	अवयवगतैकपृथक्त्वं	कालेश्वरादृष्टादयः

द्विपृथक्त्वंप्रति	आश्रयद्वयं	समानाधिकरणं / नानापृथक्त्वं	कालेश्वरादृष्टादयः

कार्यमात्रंप्रति प्रतिबंधकाभाव कार्यप्रागभाव प्रभृतयोपि निमित्तकारणा नीति ज्ञेयं

एवंरीत्याऽन्यत्रापि भावकार्यस्थले कारणत्रयं ग्राह्यं अतो ध्वंसंप्रति समवाय्यसमवायि कारणयो रभावेत्रि न क्षतिः ॥

फलभेदेन व्यापारकरणनिरूपणं

फलं	व्यपारः	करणं
प्रत्यक्षज्ञानं	इन्द्रियार्थसन्निकर्षः	षड्विधेन्द्रियाणि
चाक्षुषप्रत्यक्षं	चक्षुर्विषयसंयोगः	चक्षुरिन्द्रियं
त्वाचप्रत्यक्षं	त्वगिन्द्रियविषयसंयोगः	त्वगिन्द्रियं
रासनप्रत्यक्षं	रसनमनस्संयोगः	रसनेन्द्रियं
घ्राणजप्रत्यक्षं	घ्राणमनस्संयोगः	घ्राणेन्द्रियं
श्रावणप्रत्यक्षं	श्रोत्रमनस्संयोगः	श्रोत्रेन्द्रियं
मानसप्रत्यक्षं	आत्ममनस्संयोगः	मनइन्द्रियं
अनुमितिः	परामर्शः	व्याप्तिज्ञानं
उपमितिः	अतिदेशवाक्यार्थस्मरणं	अतिदेशवाक्यार्थज्ञानं
शाब्दबोधः	पदार्थोपस्थितिः	शक्तिज्ञानसहकृतपदज्ञानं
घटः	भ्रमणं	दण्डः
घटः	कपालद्वयसंयोगः	कपालः
पटः	तन्तुसंयोगः	तन्तवः
पटः	तुरीवेमातन्तुसंयोगः	तुरीवेमादि
कपालः	कापालिकसंयोगः	कापालिकं
द्व्यणुकं	परमाणुसंयोगः	परमाणवः
समाप्तिः	विघ्नध्वंसः	मङ्गळं
स्वर्गादिकं	अपूर्वं	यागादिकं
स्मृतिः	भावनाख्यसंस्कारः	अनुभवः

एवंरीत्या फलभेदे नान्यत्रापि व्यापारकरणनिर्णयः कार्यः ...

मतभेदेन प्रमाणनिरूपणं

प्रत्यक्षमेकं चार्वाकाः। प्रत्यक्षानुमाने द्वेप्रमाण इतिकाण
दाः। प्रत्यक्षानुमानशब्दास्त्रयः प्रमाणानीति सांख्यकापिलाः।प्रत्य
क्षानुमानोपमानशब्दाश्चत्वारि प्रमाणानीति नैय्यायिकाः। प्रत्य
क्षानुमानोपमानशब्दार्थापत्यनुपलब्धयः षट्प्रमाणानीति मीमां
सकाः । संभवैतिह्याभ्यामष्टाविति पौराणिकाः । संभवैतिह्य
चेष्टाभिस्समं नव प्रमाणानीति भरतः। शतेपंचाशन्न्यायेन पंचा
शत् ज्ञानजनकं शतज्ञानं संभवप्रमाणं। इहवटे यक्षास्तिष्ठतीत्यज्ञा
तमूलवक्तृकः प्रवादः ऐतिह्यप्रमाणं । गमनागमनादिज्ञानजनि
काः करचरणनयनादिचेष्टाश्चेष्टाप्रमाणं ॥

अस्मिन्मतेप्रमाणचतुष्टयावश्यकतानिरूपणं

प्रत्यक्षप्रमाणमात्रादरेऽतीन्द्रियाणामीश्वरादीनां सिद्धिर्न
संभवति अतोऽनुमानांगीकरणं । प्रत्यक्षानुमानरूपप्रमाणद्वयमा
त्रादरे विप्रकृष्टदेशकालस्थानां स्वर्लोकांतराणां लोकांतरीयाणाम
हेतुगम्यानां पदार्थानां सिद्धिर्नसंभवति अतस्तद्ग्राहकं शब्द
प्रमाणमप्यावश्यकं एतत्प्रमाणत्रयादरेऽपि गवये गोसादृश्यज्ञान
स्यानुपपन्नतया चतुर्थमप्युपमानं प्रमाणमंगीकार्यं ॥

व्याप्यव्यापकनिरूपणं

यच्छब्दाभिलप्यो व्याप्यः तच्छब्दाभिलप्यो व्यापक इति
निर्णयः कार्यः यथा यत्रधूमस्तत्राग्निः योयो धूमवान्ससोऽग्निमा
नित्यादिस्थलेषु यच्छब्दाभिलप्यधूमो व्याप्यः तच्छब्दाभिलप्या
ग्निर्व्यापकश्च भवति एवमेवयत्रवह्न्यभावस्तत्रधूमाभाव इत्यादि
ष्वपि वह्न्यभावस्य व्याप्यत्वं धूमाभावस्य व्यापकत्वं ग्राह्यं ।

पक्षसाध्यहेतुनिरूपणं

यस्मिन् धर्मिणि साधनेन साध्यं साध्यते स पक्षः । यथा
पर्वतो वह्निमान्धूमादित्यत्र धूमेन वह्नेः पर्वते साधनीयतया स पर्व
तः पक्षः। यदनुमीयते साधनेन तत्साध्यं अतः वह्निःसाध्यं पंच
म्यंतप्रतिपाद्यो हेतुः अत्र धूमो हेतुः ॥

प्रकारविशेष्यनिरूपणं

इदमादिसर्वनामपदाभिलापस्थले इदमादिपदार्थो विशेष्यं
भवति । यथा अयं पुरुषः एष स्थाणुः असौ राजा इत्यादाविदंप
दार्थे तत्पदार्थादः पदार्थानां विशेष्यत्वं स्थाणुत्वादीनां प्रकारत्वं
पृथक्प्रकारबोधकपदानभिलापस्थलेऽयमित्यादाविदम्पदार्थो वि
शेष्यमिदंत्वं प्रकारः । घटइतिज्ञाने घटो विशेष्यं घटत्वं प्रकारः।
मतुपः इन्प्रत्ययस्य वा प्रकारबोधकपदेऽनुप्रवेशे तत्प्रत्ययप्रकृत्य
र्थः प्रकारो भवति । यथा घटवद्भूतलं धनी पुरुष इत्यादौ तत्प्र
त्ययप्रकृत्यर्थयोर्घटधनयोः प्रकारत्वं ज्ञेयं । एवं विशिष्टपदस्य यु
क्तपदस्याधिकरणपदादीनांवा प्रकारबोधनस्थले विद्यमानत्वे त
त्पदपूर्ववृत्तिपदार्थः प्रकारोभवति । यथा घटविशिष्टं भूतलं घट
युक्तं भूतलं घटाधिकरणं भूतलमित्यादिषु तत्तत्पदपूर्ववृत्ति घट
पदार्थीभूतघटः प्रकारो भवति । पूर्वोक्तप्रत्ययद्वयस्य विशिष्टादि
पदानांवाऽनुपादाने तत्पदप्रतिपाद्यतावच्छेदकधर्मः प्रकार इति
निर्णयः कार्यः। यथा घटोऽनित्यः नीलो घट इत्यादौ तत्प्रत्यया
न्यतरस्य विशिष्टादिपदान्यतमस्य वाऽनभिलापस्थले तत्तत्पद
प्रतिपाद्यतावच्छेदकानित्यत्वनीलत्वादीनां प्रकारत्वं ज्ञेयं।अयं प्र
कारः भेदसम्बन्धेन साध्यकानुमितिस्थले सर्वदापि ग्राह्यः। यथा
पर्वतो वह्निमानित्यत्रमतुप्प्रत्ययप्रकृत्यर्थीभूतवह्निस्साध्यं चैत्रो
धनीत्यत्रेन्प्रत्ययप्रकृत्यर्थीभूतधनञ्च साध्यं भवति । एतत्प्रत्ययान्य

तस्य विशिष्टादिपदानां वा विरहस्थले शब्दोऽनित्यः कार्यत्वादित्यादौ साध्यबोधकपदप्रतिपाद्यतावच्छेदकीभूतानित्यत्वादिकं साध्यं भवतीति विज्ञेयं। अभेदसम्बन्धेन साध्यकस्थलेऽयं गौः सास्नावत्वादित्यादौ कुत्रचिदुक्तप्रत्ययाद्यभावेऽपि साध्यवाचकपदप्रतिपाद्यतावच्छेदकाश्रयो गौरेव साध्यतयाङ्गीक्रियते। कंबुग्रीवादिमत्वात् घटत्वादित्यादावभेदसंबंधेनसाध्यकस्थलेऽपि पूर्वोक्तविधया कंबुग्रीवादिमत एव साध्यत्वं विज्ञेयं। सामान्यधर्मावच्छिन्नवाचकपदघटितवाक्येनाभिलापस्थले सामान्यरूपेण विशेषबोधः। यथा प्रमेयवद्भूतलमित्यादौ प्रमेयत्वादिरूपेण घटादीनां बोधः। विशेषधर्मावच्छिन्नवाचकपदघटितवाक्येनाभिलापस्थले घटवद्भूतलमित्यादौ घटत्वादिरूपेणैव घटादीनां भानं। शाब्दातिरिक्तज्ञानस्थले पूर्वोक्तारीतिर्ग्राह्या। शाब्दज्ञानस्थले तु पर्वतो वह्निमान् चैत्रो धनी घटविशिष्टं भूतलमित्यादौ निपातातिरिक्तनामार्थयोरभेदसंबंधेनान्वय इति नियमानुरोधेन वह्निमदभिन्नः पर्वतः धनस्वाम्यभिन्नश्चैत्रः घटविशिष्टाभिन्नं भूतलमिति तत्तद्विशिष्टानामेवाभेदसंबंधेन प्रकारत्वं संभवति। ननु मतुबादिप्रत्ययप्रकृत्यर्थानां भेदसंबंधेनानुमित्यादिस्थल इव मुख्यविशेष्यांशे प्रकारत्वं संभवति। मतुबादिप्रत्ययानां विशिष्टादिपदानां वाभेदसंबंधेन शाब्दबोधोपायकाकांक्षोपयोगितावादिनये त्वनुमित्यादिस्थलेष्विव तत्तत्प्रत्ययादिपूर्वभाविनामेव प्रकारत्वं ग्राह्यं। मतुबादिविरहस्थले नीलो घटः घटोऽनित्य इत्यादौ तु नीलाभिन्नो घटः अनित्याभिन्नो घट इत्यभेदसंबंधेन प्रकारबोधकपदप्रतिपाद्यतावच्छेदकावच्छिन्नस्यैव प्रकारत्वं ग्राह्यं। इमामेव रीतिमनुसृत्य सविषयकपदार्थपंचकेऽपि शाब्दज्ञानातिरिक्तस्थल इव प्रकारनिर्णयः कार्यः॥

कार्यतावच्छेदकधर्मनिरूपणं

यद्धर्मविशिष्टं कार्यं भवति स धर्मः कार्यतावच्छेदकः

घटत्वविशिष्टं कार्यं	पटत्वविशिष्टं कार्यं
घटत्वं कार्यतावच्छेदकं	पटत्वं कार्यतावच्छेदकं
घटत्वावच्छिन्ना कार्यता	पटत्वावच्छिन्ना कार्यता

कारणतावच्छेदक धर्मनिरूपणं

यद्धर्मविशिष्टं कारणं भवति स धर्मः कारणतावच्छेदकः

दण्डत्वविशिष्टं कारणं	तन्तुत्वविशिष्टं कारणं
दण्डत्वं कारणतावच्छेदकं	तन्तुत्वं कारणतावच्छेदकं
दण्डत्वावच्छिन्ना कारणता	तन्तुत्वावच्छिन्ना कारणता

लक्ष्यतावच्छेदक धर्मनिरूपणं

यद्धर्मविशिष्टं लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः यो धर्मो लक्ष्यतावच्छेदकस्तद्धर्मावच्छिन्ना

पृथिवीत्वविशिष्टं लक्ष्यं	जलत्वविशिष्टं लक्ष्यं
पृथिवीत्वं लक्ष्यतावच्छेदकं	जलत्वं लक्ष्यतावच्छेदकं
पृथिवीत्वावच्छिन्ना लक्ष्यता	जलत्वावच्छिन्ना लक्ष्यता

साध्यसाधनतावच्छेदक धर्मनिरूपणं

यद्धर्मविशिष्टे साध्यसाधने भवत स्तौ धर्मौ साध्यसाधनतावच्छेदक धर्मौ भवतः

वह्नित्वविशिष्टं साध्यं	धूमत्वविशिष्टं साधनं
वह्नित्वं साध्यतावच्छेदकं	धूमत्वं साधनतावच्छेदकं
वह्नित्वावच्छिन्ना साध्यता	धूमत्वावच्छिन्ना साधनता

व्याप्यव्यापकतावच्छेदक धर्मनिरूपणं

यद्धर्मविशिष्टौ व्याप्यव्यापकौ भवतस्तौ धर्मौ व्याप्यव्यापकतावच्छेदकधर्मौ भवतः

धूमत्वविशिष्टं व्याप्यं	वह्नित्वविशिष्टं व्यापकं
धूमत्वं व्याप्यतावच्छेदकं	वह्नित्वं व्यापकतावच्छेदकं
धूमत्वावच्छिन्ना व्याप्यता	वह्नित्वावच्छिन्ना व्यापकता

एवमेव लक्षणतावच्छेदकादि धर्मनिर्णयः कार्यः

आधेयतावच्छेदक सम्बन्धनिरूपणं

येन सम्बन्धेन यदस्तीत्युच्यते तन्निष्ठाधेयता तत्सम्बन्धावच्छिन्ना

संयोगसम्बन्धेन घटोवर्तते	समवायेन पटो वर्तते
संयोगसम्बन्धः आधेयतावच्छेदकसम्बन्धः	समवायसम्बन्धः आधेयतावच्छेदकसम्बन्धः
संयोगसम्बन्धावच्छिन्ना आधेयता	समवायसम्बन्धावच्छिन्ना आधेयता

प्रतियोगितावच्छेदक सम्बन्धनिरूपणं

येन सम्बन्धेन यन्नास्तीत्युच्यते तन्निष्ठा प्रतियोगिता तत्सम्बन्धावच्छिन्ना

संयोगसम्बन्धेनघटोनास्ति	समवायेन पटोनास्ति
संयोगसम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः	समवायसम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः
संयोगसम्बन्धावच्छिन्ना प्रतियोगिता	संयोगसम्बन्धावच्छिन्ना प्रतियोगिता

समवाय

* साध्यतावच्छेदक सम्बन्धनिरूपणं *

येन सम्बन्धेन यस्साध्यते सम्बन्धस्साध्यतावच्छेदक सम्बन्धः

संयोगसम्बन्धेन वह्निस्साध्यते	समवायेन सत्ता साध्यते
संयोगसम्बन्धस्साध्यतावच्छेदकसम्बन्धः	समवायसम्बन्धस्साध्यतावच्छेदकसम्बन्धः
संयोगसम्बन्धावच्छिन्ना साध्यता	समवायसम्बन्धावच्छिन्ना साध्यता

एवमेव साधनतावच्छेदकादिसम्बन्ध निर्णयः कार्यः

एवमेव कार्यतावच्छेदक कारणतावच्छेदक लक्षणतावच्छेदक प्रकारतावच्छेदक सम्बन्धानां निर्णयः कार्यः

* एकविधपदार्थनिरूपणम् *

ईश्वरः आकाशं कालः दिक् सत्तारूपा परजातिः समवायः इत्यादयः ॥

* द्विविधपदार्थनिरूपणं *

पृथिव्यप्तेजोवायूनां नित्यानित्यत्वभेदेन द्वैविध्यं। जीवात्मपरमात्मभेदे नात्मनो द्वैविध्यं। सामान्यं द्विविधं पर मपरं चेति। परं सत्ता अपरं द्रव्यत्वादि। गंधो द्विविधः सुरभि रसुरभि श्चेति। संयोगो द्विविधः कर्मज स्संयोगज श्चेति। आद्यो हस्त क्रियया पुस्तकसंयोगः द्वितीयो हस्तपुस्तकसंयोगा त्कायपुस्तकसंयोगः। कर्मजसंयोगोऽपि द्विविधः अभिघातसंयोगः नोदन संयोग श्चेतिः शब्दहेतु राद्यः शब्दाहेतु र्द्वितीयः। विभागोऽपि द्विविधः कर्मजो विभागजश्चेति आद्यो हस्तक्रियया पुस्तकवि

भागः द्वितीयो हस्तपुस्तकविभागात्कायपुस्तकविभागः । विभागजविभागोऽपि द्विविधः हेतुमात्रविभागजन्यः हेत्वहेतुविभागजन्यश्चेति आद्यः कपालद्वयविभागजन्यः कपालाकाशविभागः द्वितीयः हस्ततरुविभागजन्यः तरुशरीरविभागः । परत्वापरत्वे द्विविधे दिक्कृते कालकृतेचेति दूरस्थे दिक्कृतं परत्वं ज्येष्ठे कालकृतं परत्वं समीपस्थे दिक्कृत मपरत्वं कनिष्ठे कालकृत मपरत्वं । द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकं चेति आद्यं जले द्वितीयं पृथिवीतेजसोः सांसिद्धिकत्वं चाग्निसंयोगादिनिमित्ताजन्यत्वं नैमित्तिकत्वं चाग्निसंयोगादिरूपनिमित्तजन्यत्वं । शब्दो द्विविधः ध्वन्यात्मको वर्णात्मकश्चेति आद्यः भेर्यादिताडनजन्यः शब्दः द्वितीय स्संस्कृतभाषादिरूपः । बुद्धिः द्विविधा स्मृति रनुभवश्चेति । अनुभवो द्विविधः यथार्थोऽयथार्थश्चेति । स्वप्नोऽपि मानसविपर्ययरूप एवेति नपृथग्भावः । स्मृतिरपि द्विविधा यथार्थाऽयथार्थाचेति प्रमाजन्या यथार्था अप्रमाजन्या ऽयथार्था । प्रत्यक्षं द्विविधं सविकल्पकं निर्विकल्पकंचेति । अनुमितिः द्विविधा स्वार्थानुमितिः परार्थानुमितिश्चेति । शाब्दबोधो द्विविधः वैदिकशाब्दबोधः लौकिकशाब्दबोधश्चेति । अर्थापत्ति र्द्विविधा श्रुतार्थापत्तिः दृष्टार्थापत्तिश्चेति । अनुमितिकरणं द्विविधं स्वार्थानुमानं परार्थानुमानंचेति । शाब्दबोधकरणं द्विविधं वैदिकशब्दो लौकिकशब्दश्चेति । अर्थापत्तिकरणं द्विविधं श्रुतार्थापत्तिः दृष्टार्थापत्तिश्चेति । प्रत्यक्षज्ञानस्थले फलकरणयो रुभयत्रापि प्रत्यक्षशब्दः प्रवर्तते अर्थापत्तिस्थले फलकरणयो रुभयत्रा ऽप्यर्थापत्तिशब्दः प्रयुज्यते । ज्ञानेच्छाकृतीनां नित्यत्वानित्यत्वभेदेन द्वैविध्यं ईश्वरगतानां तासां नित्यत्वं जीवगतानां तासा मनित्यत्वं । ईश्वरेपि सुखांगीकर्तृमते सुखस्यापि नित्यत्वानित्यत्वभेदेन द्वैविध्यं ईश्वरे तन्नित्यं जीवे तदनित्यं । व्याप्तिः द्विविधा अन्व

यव्याप्तिः व्यतिरेकव्याप्तिश्चेति । आद्या हेतुव्यापकसाध्यसामाना
धिकरण्यरूपा द्वितीया साध्याभावव्यापकीभूताभावप्रतियोगि
त्वरूपा । वृत्तिर्द्विविधा शक्तिर्लक्षणा चेति आद्या अस्मात्पदादय
मर्थो बोद्धव्य इतीश्वरेच्छाविषयत्वरूपा द्वितीया शक्यसंबंध
रूपा । लक्षणा द्विविधा जहल्लक्षणा अजहल्लक्षणा चेति यां शि
थपरित्यागेनान्यार्थग्रहणं जहल्लक्षणा । यथा गंगायां घोष इत्या
दौ गंगापदस्य तीरे मंचाः क्रोशंतीत्यादौ मंचपदस्य पुरुषेषु च
जहल्लक्षणा । शक्यार्थापरित्यागेनान्यार्थग्रहणमजहल्लक्षणा ।
छत्रिणो यांतीत्यत्र छत्रपदस्य छत्रच्छत्रिसाधारणसंघत्वाव
च्छिन्ने काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदस्य दध्युपघातुक
त्वावच्छिन्ने चाजहल्लक्षणा । जीवब्रह्मणोरैक्यं सूचनां वेदांतिनां
मते जहदजहल्लक्षणा चांगीक्रियते । तन्मते तत्त्वमस्यादिषु
चैतन्यादिरूपव्यक्तिमात्रबोधनार्थं जहदजहल्लक्षणा नैयायिकानां
मते तु सा नास्तीति लक्षणाद्वयमेव । लक्षणं द्विविधं व्यावहा
रिकं व्यावर्तकं चेति । व्यावहारिकत्वं च व्यवहारप्रयोजकत्वं
व्यावर्तकत्वं चेतरभेदानुमापकत्वं यथाऽऽद्यं पृथिव्याः पृथिवी
त्वं द्वितीयं तस्या गंधवत्त्वं । अन्वयव्यतिरेकद्वयं यत्सत्त्वे यत्सत्त्व
मन्वयः यदभावे यदभावो व्यतिरेकः । प्रथमयत्पदं कारणत्वे ना
भिमतपरः द्वितीययत्पदं कार्यत्वे नाभिमतपरं । अन्वयव्यतिरेक
व्यभिचारद्वयं यत्सत्त्वे यदनुत्पत्तिरन्वयव्यभिचारः यदभावे यदु
त्पत्तिर्व्यतिरेकव्यभिचारः । अभावो द्विविधः संसर्गाभावोऽ
न्योन्याभावश्चेति । हेतुर्द्विविधः सद्धेतुरसद्धेतुश्चेति । आद्यः
व्याप्तिपक्षधर्मताविशिष्टः द्वितीयः व्याप्तिपक्षधर्मत्वोभयाभाव
वान् । असद्धेतुमात्रे चैकसत्त्वे द्वयं नास्तीत्याकारकप्रतीत्या प्रत्ये
काभावप्रयुक्तः उभयाभावप्रयुक्तो वोभयाभाव स्संभवत्येव । शु
क्लरूपं द्विविधं भास्वरशुक्लमभास्वरशुक्लं चेति आद्यं तेजसि
द्वितीयं जले । पदार्थो द्विविधः व्याप्यवृत्तिरव्याप्यवृत्तिश्चेति

आद्यः घटत्वपटत्वादिः द्वितीयः कपिसंयोगादिः । पदार्थः प्रकारांतरेण द्विविधः भावो ऽभावश्चेति । द्रव्यादयः षड्भावाः प्रागभावादयश्चत्वारो ऽभावाः । ज्ञानं पुनरपि द्विविधं संशयो निश्चयश्चेति । आद्यः स्थाणुर्वा पुरुषोवेति द्वितीयः अयं स्थाणुरिति । स्मृतिरपि निश्चयरूपैव । ज्ञानं पुनरपि द्विविधं आहार्यं मनाहार्यं चेति । बाधकालीनेच्छाजन्यज्ञान-माहार्यं तद्भिन्न मनाहार्यं । आहार्यज्ञानमपि द्विविधं नियताहार्यं मनियताहार्यंचेति स्वविरोधिधर्मधर्मितावच्छेदकप्रकारकज्ञानं नियताहार्यं यथा वह्निमत्पर्वतो वह्न्य...वानिति । तद्भिन्न मनियताहार्यं यथा ह्रदो वह्निमा निति ज्ञानं । अनियताहार्यानाहार्ययोः बाधकालीनेच्छाजन्यत्वतदजन्यत्वाभ्या मेव भेदो ज्ञेयः नत्वाकारतो भेदः । उभयत्र ह्रदो वह्निमा नित्यस्य व्याकारत्वात् बाहिरपर्वतो वह्न्यभाववा निति ज्ञानस्य नियत मिच्छाजन्यत्वेन नियताहार्यत्वव्यवहारः । नियताहार्यानाहार्यज्ञानयो स्स्वाकारतोपि भेदो वर्तत एव । यथा आद्यं वह्निप ह्रदो वह्न्याभाववा निति ज्ञानं द्वितीयं ह्रदो वह्निमा निति ज्ञानं । ज्ञानं पुनरपि द्विविधं अप्रामाण्यज्ञानास्कंदितं तद नास्कंदितंचेति ।

सम्बन्धो द्विविधः वृत्तिनियामकः वृत्त्यनियामकश्चेति आद्यः संयोगसमवायस्वरूपकालिकपर्याप्तिस्वाभाववृत्तित्वादिरूपः द्वितीयः निरूप्यनिरूपककोटिप्रविष्टविषयत्वादिरूपः परंपरासम्बन्धरूपश्च । अनुमितिः पुनरपि द्विविधा पक्षतावच्छेदकावच्छेदेनानुमितिः पक्षतावच्छेदकसामानाधिकरण्येनानुमितिः पदार्थः प्रकारान्तरेण द्विविधः केवलान्वयी व्यतिरेकीचेति । अवच्छेदकत्वं द्विविधं स्वरूपसम्बन्धरूप मनतिरिक्तवृत्तित्वरूपश्चेति । दण्डत्वं घटकारणतावच्छेदक मित्य त्रावच्छेदकत्वं स्वरूपसम्बन्धरूपं हेतुमन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं साध्यताव

च्छेदक मित्यत्र गुरुधर्मस्या वच्छेदकत्वानभ्युपगमे प्रमेयधूमवान् वह्ने रित्यत्र प्रसक्त स्यातिव्याप्तिदोषस्य वारणार्थं मनवच्छेदकत्व घटकीभूतावच्छेदकत्व मनतिरिक्तवृत्तित्वरूपं। तर्को द्विविधः कार्यकारणभावभङ्गप्रसङ्गलक्षणः व्याप्यव्यापकभावभङ्गप्रसङ्ग लक्षणश्चेति। पर्वते धूमोऽस्तु वह्निर्मा स्त्वित्यप्रयोजकशङ्कायां प्र सक्तायां तन्निवृत्यर्थं धूमे वह्निजन्यत्वं नस्या दिति कार्यकारण भावभङ्गप्रसङ्गलक्षण स्तर्क उपयोक्तव्यः। द्रव्यं विशिष्टसत्वा दि त्यादौ निरुक्तरीत्याऽ प्रयोजकशङ्कायां प्रसक्तायां विशिष्टसत्ताया नित्यतया धूमंप्रति वह्नेरिव विशिष्टसत्तांप्रति द्रव्यत्वस्य कारण त्वाभावेन कार्यकारणभावभङ्गप्रसङ्गलक्षणतर्क स्योपयोक्तु मश क्यतया यत्रविशिष्टसत्ता तत्र द्रव्यत्व मिति नियमो नस्यादिति व्याप्यव्यापकभावभङ्गप्रसङ्गलक्षण एव तर्क उपयोक्तव्यः। कुत्र चि त्कार्यकारणभावभङ्गप्रसङ्गलक्षणतर्कप्रसक्तिस्थले व्याप्यव्या पकभावभङ्गप्रसङ्गलक्षणोऽपि तर्क उपयोक्तुं शक्यते। यथा पर्व तो वह्निमान् धूमा दित्यादौ यदिवह्निर्नस्या त्तर्हि धूमोपि नस्यादि ति कार्यकारणभावभङ्गप्रसङ्गलक्षणतर्कस्य यत्रधूम स्तत्राग्निरिति नियमो नस्यादिति व्याप्यव्यापकभावभङ्गप्रसङ्गलक्षणतर्कस्य चो पयोक्तुं शक्यत्वात्। अतः यत्र हेतुसाध्ययोः कार्यकारणभाव स्सुप्रसिद्धस्तत्र कार्यकारणभावभङ्गप्रसङ्गलक्षणस्तर्क उपयोक्त व्यः। अन्यत्रतु व्याप्यव्यापकभावभङ्गप्रसङ्गलक्षणस्तर्क उपयो क्तव्य इति सिद्धं। कारणत्वं द्विविधं फलोपधानरूपं स्वरूपयोग्य तारूपंचेति स्वजनकत्वसम्बन्धेन फलविशिष्टत्वं फलोपधानरूपं जनकत्वं तच्च साक्षात्फलजनकीभूतवस्तुष्वेव सम्भवति। जन कतावच्छेदकधर्मवत्वं स्वरूपयोग्यतारूपं जनकत्वं तच्च साक्षादुप दानुपदायके व्यारण्यकदन्डादौ सम्भवति। रूपादेस्तुचतुष्टयस्य पाकजापाकजभेदेनद्वैविध्यं। रूपरसगन्धस्पर्शसंख्यापरिमाणपृथ क्त्वस्नेहबुद्धीच्छाप्रयत्नानां नित्यत्वानित्यत्वभेदेन द्वैविध्यं जलादि

द्रव्येवर्तमानानां चाद्यानां चतुर्णां नित्यवृत्तित्वान्नित्यत्वं अनित्यवृत्तीनां तासामनित्यत्वं संख्यापरिमाणद्रवत्वस्नेहानां नित्यवृत्तीनां नित्यत्वमनित्यवृत्तीनामनित्यत्वं किंतु द्वित्वादिसंख्याया नित्यवृत्तेरप्यपेक्षाबुद्धिजन्यतयाऽनित्यत्वमेव ज्ञानेच्छाकृतीनां त्वीश्वरवृत्तीनां नित्यत्वं जीववृत्तीनां तासामनित्यत्वं नित्यवृत्ते गुरुत्वस्य नित्यत्वं अनित्यवृत्तेरनित्यत्वं पृथक्त्वपरत्वापरत्वानां नित्यवृत्तीनामप्यपेक्षाबुद्धिजन्यतया संयोगविभागयोः क्रियाजन्यतया ईश्वरे मतविशेषे नित्यसुखानंगीकारेण जीववृत्तिसुखस्याविषयजन्यतया दुःखद्वेषधर्माधर्मसंस्काराणामीश्वरेऽनंगीकारेण जीववृत्तीनां तेषां सनिमित्तकत्वेन यज्जन्यं तदनित्यमितिव्याप्त्या जन्यानामेषां नाशस्यावश्यमभ्युपेयतया पृथक्त्वसंयोगविभागपरत्वापरत्वशब्दसुखदुःखद्वेषधर्माधर्मसंस्काराणां नित्यत्वं नास्त्येव । किंतु सर्वेषामेतेषामनित्यत्वमेव । उभयाभावो द्विविधः प्रत्येकाभावप्रयुक्तः उभयाभावप्रयुक्तश्चेति आद्यः पटे घटत्वद्रव्यत्वोभयाभावः द्वितीयः गुणादौ घटत्व द्रव्यत्वोभयाभावः । इच्छा द्विविधा फलविषयिणी उपायविषयिणीचेति । द्वेषो द्विविधः फलविषयकः उपायविषयकश्चेति । निश्चयो द्विविधः उपेक्षात्मकः उपेक्षानात्मकश्चेति आद्यः स्मरणप्रत्यभिज्ञाद्यजनकः द्वितीयस्तदुभयजनकः वेगो द्विविधः कर्मजस्संयोगजश्चेति । योगजसान्निकर्षो द्विविधः युक्तयोगजन्यः युंजानयोगजन्यश्चेति योगजसन्निकर्षो नाम योगजन्यधर्मविशेषः चिन्ताद्यसहकृतयोगजन्यधर्मविशेषः युक्तयोगजन्यस्सान्निकर्षः चिन्तासहकृतयोगजन्यधर्मविशेषः युंजानयोगजन्यस्सान्निकर्षः । सम्बन्धः पुनरपिद्विविधः साक्षात्सम्बन्धः परंपरासम्बन्धश्चेति । आद्यस्संयोगसमवायादिः द्वितीयः स्वज्ञानविषयप्रकृतहेतुतावच्छेदकधर्मवत्वादिस्सम्बन्धः । सम्बन्धः प्रकारान्तरेण द्विविधः भेदसम्बन्धः अभेदसम्बन्धश्चेति आद्यः अभेदातिरिक्तसम्बन्धः अभेदसम्बन्धस्तादात्म्यसम्बन्धः । लक्षणाबीजद्वयं

अन्यथानुपपत्तितात्पर्यानुपपत्तिद्वयं गङ्गायां घोषः मञ्चाः क्रोशन्ति सिंहो माणवकः पीनो देवदत्तः इत्यादावन्यथानुपपत्तिः यष्टीः प्रवेशय काकेभ्यो दधि रक्ष्यतां छत्रिणो यान्ति सैन्धवमानय इत्यादिषु तात्पर्यानुपपत्तिरेव लक्षणाबीजं अन्वयानुपपत्तिर्लक्षणास्थलेषु सर्वत्र सम्भवाभावेन तात्पर्यानुपपत्तेस्सर्वत्रापि सम्भवेन सर्वत्र तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति बहूनां सिद्धान्तः प्रवृत्तिः प्रकारान्तरेण द्विविधा निष्कंपप्रवृत्तिः सकम्पप्रवृत्तिश्चेति। आद्या पूर्वोत्पन्नज्ञाने प्रामाण्यनिश्चयहेतुका द्वितीया तस्मिन् ज्ञाने प्रामाण्यसंशयहेतुका । निष्कंपत्वं सकम्पत्वं च विषयताविशेषः । हेतुर्द्विविधः समव्याप्तहेतुः विषमव्याप्तहेतुश्चेति । समव्याप्तत्वञ्च हेतुव्यापकसाध्यव्यापकत्वं । विषमव्याप्तत्वं च हेतुव्यापकसाध्याव्यापकत्वं । प्रतिबध्यप्रतिबन्धकभावग्राहकान्वयव्यतिरेकद्वयं । यत्सत्त्वे यदनुत्पत्तिरन्वयः यदभावे यदुत्पत्तिर्व्यतिरेकः प्रथमयत्पदं प्रतिबन्धकत्वेनाभिमतपरं । द्वितीययत्पदं प्रतिबध्यत्वेनाभिमतपरं । पञ्चावयववाक्यं द्विविधं । अन्वयपञ्चावयववाक्यं व्यतिरेकपञ्चावयववाक्यं चेति । आद्यं पर्वतो वह्निमान् धूमवत्त्वान् यो यो धूमवान् स सोऽग्निमान् यथा महानसः तथा चायं तस्मात्तथा इति ॥ द्वितीयं पर्वतो वह्निमान् धूमवत्त्वात् यो यो वह्न्यभाववान् स धूमाभाववान् यथा महाह्रदः न चायं तथा तस्मान्न तथेति ॥ कारणं द्विविधं साधारणकारणमसाधारणकारणं चेति। कार्यमात्रं प्रतीश्वरादृष्टादि साधारणकारणं । कार्यविशेषं प्रति कारणं द्वितीयं यथा घटादिकं प्रति दण्डादिकं द्वितीयं कारणं ॥

त्रिविधवस्तुनिरूपणं

पृथिव्यप्तेजोवायूनां शरीरेन्द्रियविषयभेदेन पुनरपि त्रैविध्यं स्पर्शस्त्रिविधः शीतोष्णानुष्णाशीतभेदात् । संयोगः प्रकारांतरे

णात्रिविधः एककर्मजन्यः उभयकर्मजन्यः संयोगजन्यश्चेति आद्यः श्येनशैलसंयोगः द्वितीयः मेषद्वयसंयोगः तृतीयः हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगः । विभागोपित्रिविधः एककर्मजन्यः उभयकर्मजन्यः विभागजन्यश्चेति आद्यः श्येनशैलविभागः द्वितीयः मेषद्वयविभागः तृतीयः हस्तपुस्तकविभागात्कायपुस्तकविभागः । शब्दस्त्रिविधः संयोगजोविभागजश्शब्दजश्चेति आद्यः भेरीदंडसंयोगजन्यः द्वितीयः वंशाकाशविभागजन्यः तृतीयः पूर्वपूर्वशब्दोत्पन्नद्वितीयादिशब्दसमुदायः।कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्।अलौकिकसन्निकर्षस्त्रिविधः सामान्यलक्षणः ज्ञानलक्षणः योगजलक्षणश्चेति आद्यः धूमाग्निज्ञानादौ निखिलवह्निधूमभानार्थमंगीकृतः द्वितीयः सुरभिचंदनमित्यादौ सुरभिगंधत्वादिभानार्थं तृतीयः योगिनामतीतानागतसर्ववस्तुसाक्षात्कारार्थमंगीकृतः सामान्यलक्षणसन्निकर्षस्तु सामान्याश्रयस्य यावतो ज्ञानं जनयति ज्ञानलक्षणस्तु स्वविषयविषयकज्ञानं जनयतीतीयान्भेदः आद्यद्वितीयौ पर्यवसाने ज्ञानरूपावेव । लिंगं त्रिविधं अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकिचेति । सव्यभिचारस्त्रिविधः साधारणाऽसाधारणानुपसंहारिभेदात् । असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति । अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् उत्कटैकतरकोटिकसंशयरूपसंभावना एषा संशयएवांतर्भवति। संस्कारस्त्रिविधः वेगोभावनास्थितस्थापकश्चेति । विषयता त्रिविधा विशेष्यता प्रकारता संसर्गताचेति । संसर्गाभावस्त्रिविधः प्रागभावः प्रध्वंसाभावः अत्यंताभावश्चेति । लक्षणदोषास्त्रयः, अतिव्याप्तिरव्याप्तिरसंभवश्चेति । आत्माश्रयादिदोषत्रयं आत्माश्रयः अन्योन्याश्रयः चक्रकापत्तिश्चेति । जन्यभावत्रयं द्रव्यगुणकर्मत्रयं । कृतिनिरूपितविषयतात्रिविधा । उद्देश्यताविधेयता उपादानताचेति। अक्षपादाशयानुरोधे नान्यथासिद्धं त्रिविधः परं

प्रतितंतुरूपं तंतुत्वंच प्रथमान्यथासिद्धं। घटंप्र त्याकाशंद्वितीयान्यथासिद्धं पाकजस्थले गंधंप्रति रूपप्रागभाव स्तृतीयान्यथासिद्धः। प्रयत्नस्त्रिविधः प्रवृत्तिः निवृत्तिः जीवनयोनिश्चेति आद्यो भोजनादौ द्वितीयो विषभक्षणादौ तृतीयः प्राणधारणादौ। औपाधिकं कालत्रयं अतीतानागतवर्तमानकालत्रयं। परिमाणं प्रकारांतरेण त्रिविधं अणुपरिमाणं मध्यमपरिमाणं परममहत्परिमाणं (विभुपरिमाणं) चेति आद्यंपरमाण्वादौ द्वितीयं द्व्यणुकादिब्रह्मांडांते विभुभिन्ने द्रव्ये तृतीय माकाशादि चतुष्टये वर्तते। विशिष्टाभाव स्त्रिविधः विशेष्याभावप्रयुक्तः विशेषणाभावप्रयुक्तः उभयाभावप्रयुक्तश्चेति आद्यः घटे द्रव्यत्वविशिष्टघटत्वाभावः द्वितीयः पटेघटत्वविशिष्टद्रव्यत्वाभावः तृतीयः गुणादौ घटत्वविशिष्टद्रव्यत्वाभावः। कर्मजन्यत्रयं संयोगविभागवेगत्रयं। आनंत्यपरिमाणं त्रिविधं संख्याजन्यं परिमाणजन्यं। प्रचयजन्यंचेति त्र्यणुकनिष्ठपरिमाणं द्व्यणुकनिष्ठद्वित्वसंख्याजन्यमाद्यं घटाद्यवयविनिष्ठपरिमाणं कपालाद्यवयवनिष्ठपरिमाणजन्यं द्वितीयं। तूलकादिनिष्ठपरिमाणं प्रचयजन्यं तृतीयं। प्रचय शिथिलावयवसंयोगः। चिकीर्षांप्रति कारणत्रयं। कृतिसाध्यताज्ञानेष्टसाधनताज्ञानबलवदनिष्टाननुबंधित्वज्ञानत्रयं चिकीर्षानाम कृतिसाध्यत्वप्रकारकेच्छा कृतिसाध्यताज्ञानस्य चिकीर्षांप्रति कारणत्वानंगीकारे चंद्रमंडलानयनादौ वृष्ट्यादौचिकीर्षाप्रसंगः। इष्टसाधनताज्ञानस्य कारणत्वानंगीकारे शत्रुगृहगमनादौ चिकीर्षांप्रसंगः बलवदनिष्टाननुबंधित्वज्ञानस्य कारणत्वानंगीकारे विषसंपृक्तान्नभक्षणादौ चिकीर्षाप्रसंगः अतो ज्ञानत्रयस्य चिकीर्षां प्रति कारणत्व मंगीकार्यं बलवदनिष्टानुबंधित्वज्ञानस्य प्रतिबंधकत्वांगीकर्तृमते बलवदनिष्टाननुबंधित्वज्ञानस्य कारणत्वं नांगीक्रियते। किं त्वाद्ययो र्द्वयो रेव कारणत्वं तन्मतेऽगीकार्यं। अवस्थात्रयं जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयं। एवकार स्त्रिविधः विशेष्य

संगतः विशेषणसंगतः क्रियासंगतश्चेति पार्थएव धनुर्धर इत्यत्र विशेष्यसंगतः शंखः पांडुरएवेत्यत्र विशेषणसंगतः नीलं भवत्येवेत्यत्र क्रियासंगत श्चेवकार इति बोध्यं ॥

चतुर्विधपदार्थ निरूपणं

परिमाणं चतुर्विधं अणुमहद्दीर्घह्रस्वञ्चेति भावप्रधाननिर्देशानाणुत्वादिपदमणुत्वादिपरं। अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोन्योन्याभावश्चेति। विभुचतुष्टयं आकाशकालदिगात्मचतुष्टयं। भूतमूर्तपदार्थचतुष्टयं पृथिव्यप्तेजोवायुचतुष्टयं। यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। अयथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। पर्वतो धूमवान् वह्ने रित्यत्र धूमव्याप्यवह्निमान्पर्वत इति भ्रमात्मकादपि परामर्शात् पर्वतो धूमवा निति प्रमात्मकानुमिति भवत्येव प्रमात्मकपरामर्शा भ्रमात्मकानुमितिः कुत्रापि न सम्भवति कुतः ह्रदो वह्निमा नित्यनुमिति र्भ्रमात्मकानुमितिः अत्र धूमादे र्हेतुत्वे पक्षधर्मत्वांशे परामर्शस्य भ्रमत्वं द्रव्यत्वादे र्हेतुत्वे व्याप्त्यंशे परामर्शस्य भ्रमत्वं सम्भवति ॥

प्रमात्मकपरामर्शा त्प्रमात्मकानुमितिः भ्रमात्मकपरामर्शा द्भ्रमात्मकानुमितिश्च निर्विवादा। क्वचिद्भ्रमात्मकपरामर्शा त्प्रमात्मकानुमितिश्च भवति। प्रमाणं चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। उपाधिश्चतुर्विधः केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति पक्षधर्मावच्छिन्नत्वादे स्साध्येऽन्वयः पक्षधर्मावच्छिन्नत्वञ्च सामानाधिकरण्यसम्बन्धेन पक्षधर्मविशिष्टत्वं उदासीनत्वञ्च पक्षधर्मसाधनातिरिक्तत्वं। क्षणोपाधिचतुष्टयं स्वजन्यविभागप्रागभावावच्छिन्नंकर्म पूर्वसंयोगावच्छि

न्यविभागोवा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावोवा उ
त्तरसंयोगावच्छिन्नकर्मवा क्षणोपाधि स्यात्। तेजोविषय श्चतु
र्विधः भौमदिव्यौदर्याकरजभेदात्। सामान्यादिचतुष्टयं सामा
न्यविशेषसमवायाभावचतुष्टयं। रूपादिचतुष्टयं रूपरसगन्धस्प
र्शचतुष्टयं। औपाधिकं दिक्चतुष्टयं प्राचीदिक्प्रतीचीदिगुदीची
दिगवाचीदि क्चतुष्टयं॥

पंचविधपदार्थनिरूपणं

भूतपंचकं पृथिव्यप्तेजोवाय्वाकाशपंचकं। मूर्तपंचकं पृथि
व्यप्तेजोवायुमनःपंचकं। प्राणादिपंचकं प्राणापानव्यानोदानस
मानपंचकं। आकाशादिपंचकं आकाशकालदिगात्ममनःपंचकं।
कर्मपंचकंउत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनपंचकं सविषयक
पदार्थपंचकं ज्ञानेच्छाकृतिसंस्कारद्वेषपंचकं। हेत्वाभासः पंचवि
धः सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधितभेदात्। अवयव
पंचकं प्रतिज्ञाहेतूदाहारणोपनयनिगमनपंचकं। विश्वनाथपंचान
नाशयानुरोधे नान्यथासिद्धपंचकं घटादिकंप्रति दंडत्वादिकं
प्रथमान्यथासिद्धं। दंडरूपादिकं द्वितीयान्यथासिद्धं व्योमप्रभृ
तितृतीयान्यथासिद्धं। कुलालजनकप्रभृति चतुर्थान्यथासिद्धं रा
सभादिकं पंचमान्यथासिद्धं। सर्वमते चान्यथासिद्धसामान्य
लक्षणं अवश्यक्लृप्तनियतपूर्ववृत्तिभिन्नत्वमेव। घटादिकंप्रति
क्लृप्तनियतपूर्ववृत्तिनो दंडचक्रसलिलकुलालादयः तद्भिन्नत्वंच
दंडत्वदंडरूपादिनिरुक्तान्यथासिद्धेषु वर्तत इति लक्षणसंगतिः।
प्रवृत्तिकारणपंचकं चिकीर्षाकृतिसाध्यताज्ञानेष्टसाधनताज्ञानब
लवदनिष्टाननुबंधित्वज्ञानोपादानप्रत्यक्षपंचकं। एतत्कारणपंचक
प्रयोजनंतु चिकीर्षास्थल इव ज्ञेयं॥

षड्विधपदार्थ निरूपणम्

भावषट्कं द्रव्यगुणकर्मसामान्यविशेषसमवायषट्कं । रसः षड्विधः मधुराम्ललवणकटुकषायतिक्तभेदात् । प्रत्यक्षप्रमाणं षड्विधं त्वक्चक्षुश्श्रोत्रजिह्वाघ्राणमनोभेदात् एतदेवेंद्रियषट्कमुच्यते । लौकिकसन्निकर्षः षड्विधः । संयोग संयुक्तसमवाय संयुक्तसमवेतसमवाय समवाय समवेतसमवायो विशेषण विशेष्यभावश्चेति ॥

जातिबाधकषट्कम् ।

व्यक्ते रभेद स्तुल्यत्वं । सङ्करो ऽथा नवस्थितिः ।
रूपहानि रसम्बन्धो । जातिबाधकसङ्ग्रहः ॥ इति ।

सप्तविधपदार्थ निरूपणं

पदार्थसप्तकं द्रव्यगुणकर्मसामान्यविशेषसमवायाभावसप्तकं । रूपं सप्तविधं शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् ॥

नवविधपदार्थ निरूपणं

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव द्रव्याणि॥

षोडशपदार्थ निरूपणं

प्रमाण प्रमेय संशय प्रयोजन दृष्टान्त सिद्धांतावयव तर्क निर्णय वाद जल्प वितण्डा हेत्वाभास च्छल जाति निग्रहस्थानानि षोडशपदार्था गौतमसूत्रे ऽङ्गीकृताः ॥

एकविंशतिविध पदार्थनिरूपणं

प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासन्यासः हेत्वंतरं अर्थांतरं निरर्थकं अविज्ञातार्थकं अपार्थकं अप्राप्तकालं न्यूनं अधिकं पुनरुक्तं अननुभाषणं अज्ञानं अप्रतिभा विक्षेपः

मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतः इति निग्रहस्थाना न्येकोविंशतिः। वादिनो ऽपजयहेतु र्निग्रहस्थानं ॥

चतुर्विंशतिविधपदार्थनिरूपणं

रूप रस गंध स्पर्श संख्या परिमाण पृथक्त्व संयोग विभाग परत्वापरत्व गुरुत्व द्रवत्व स्नेह शब्द बुद्धि सुख दुःखेच्छा द्वेष प्रयत्न धर्माधर्म संस्कारा श्चतुर्विंशति र्गुणाः ॥

साधर्म्य वैधर्म्योत्कर्षापकर्ष वर्ण्यावर्ण्य विकल्प साध्यप्राप्त्यप्राप्ति प्रसंग प्रतिदृष्टांतानुत्पत्ति संशय प्रकरण हेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्य कार्यसमा श्चतुर्विंशति र्जातयः। असदुत्तरं जातिः स्वव्याघातकमुत्तरं जातिरितिलक्षणं ॥

अनंतपदार्थनिरूपणं

जीवात्मानः मनांसि विशेषाः परमाणवः इत्यादयः ॥

विषमाः

प्रतीति व्यवहाराभ्या मर्थसिद्धिः। यद्वैशिष्ट्यं यत्र भासते स एव स्वपदार्थः। प्रकृत्यर्थे प्रकारीभूतधर्मो भावप्रत्ययार्थः। यदुत्तरं प्रत्ययं विधीयते स प्रकृतिः। यस्याभाव स्सप्रतियोगी। यद्धर्मविशिष्टं लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः यो धर्मो यस्या मवच्छेदक स्सा तद्धर्मावच्छिन्ना। येन सम्बन्धेन यदस्तीत्युच्यते तन्निष्ठाधेयता तत्सम्बन्धावच्छिन्ना। येन सम्बन्धेन यन्नास्तीत्युच्यते तन्निष्ठा प्रतियोगिता तत्सम्बन्धावच्छिन्ना। विग्रहवाक्याद्यादृशविशेषणविशेष्यभावापन्नपदार्थविषयकबोधो जायते

समासत्वाक्यात्तद्विपरीतबोधो जायते। निपातातिरिक्तनामार्थयोरभेदसम्बन्धेनान्वयः। विशेषणवाचकपदोत्तरवर्तिविभक्तेरर्थकत्वमिति केचन। तस्या अन्यभेदार्थकत्वमित्यपरे। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वं। गुणे गुणानङ्गीकारः। सर्वाधारः कालः। जन्यानां कालोपाधित्वं। मूर्तानां दिगुपाधित्वं। नित्येषु कालिकायोगः. विभिन्नकालीनपदार्थयो र्विषयत्वान्यसम्बन्धेनाधाराधेयभावविरहः। उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठति। यो गुणो यदिन्द्रियग्राह्यस्तन्निष्ठाजातिस्तदभावश्च तेनेन्द्रियेण गृह्यते। नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमः। ध्वंसप्रागभावयो स्स्वप्रतियोगिसमवायिदेशवृत्तित्वं। अनुल्लेख्यमनजात्यखण्डोपाध्यतिरिक्तधर्माणां स्वरूपतो भाने प्रमाणाभावः. विशेषणाभावाद्विशिष्टाभावः विशेष्याभावाद्विशिष्टाभावः उभयाभावाद्विशिष्टाभावः। एकसत्वे द्वयं नास्ति। ध्वंसभिन्नं यज्जन्यं तदनित्यं। एकधर्मावच्छिन्नाऽधेयतैका। सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाऽन्याय्या। सविषयार्थबोधकधातुसमभिव्याहृतद्वितीयार्थीभूतकर्मत्वं विषयतारूपं। आदौ क्रिया क्रियातो विभागः विभागात्पूर्वसंयोगनाशः पूर्वसंयोगनाशादुत्तरसंयोगोत्पत्तिः॥

शब्दबुद्ध्योस्त्रिक्षणावस्थायित्वं। अर्थं बुद्ध्वाशब्दरचना। असन्निकृष्टपदार्थस्यप्रत्यक्षेभानं न संभवति। अपदार्थस्य शाब्दबोधे भानं न संभवति। आधारास्त्वनुयोगिनः आधेयाः प्रतियोगिनः। संबंधमात्रस्य किञ्चित्प्रतियोगिकत्वं किञ्चिदनुयोगिकत्वं। यत्र संबंध स्तत्र तेन संबंधेन संबंधी। एकसंबंधिज्ञानमपरसंबंधिस्मारकं। संबंध संबंध्युभयसत्तायास्संबंधिप्रतीतिनियामकत्वं। अभावमात्रस्य स्वप्रतियोगितावच्छेदकसंबंधावच्छिन्न स्वप्रतियोगितावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतया साकं विरोधः। पदार्थः पदार्थेनान्वेति नत्वेकदेशेन। समानज्ञानीय समानाधिकरण

प्रकारता विशेष्यतयां रभेद इति केचन। तथा स्वच्छेद्यावच्छेदक भाव इत्यपरे। यद्धर्मावच्छिन्नवाचकपदोत्तरं यावत्पदं सामान्य पदं वा श्रूयते तद्धर्मव्यापकत्वं विधेयांशे भासते। एकत्वे बाध के उद्देश्यतावच्छेदकधर्मव्यापकत्वम् विधेयांशे भासते। व्याप्य वृत्तिजातीयधर्माणामव्याप्यवृत्तित्वे प्रमाणाभावः। जातित्वेना भिमतखण्डस्य जातिबाधकत्वम्। द्रव्यत्वव्याप्यव्याप्यजातेः प रमाणुवृत्तित्वे प्रमाणाभावः। समुदायः प्रत्येकान्नातिरिच्यते। विशिष्टं शुद्धान्नातिरिच्यते। उभयत्वमुभयत्र पर्याप्तं नत्वेकत्र। भेदस्य व्याप्यवृत्तित्वनियमः। व्याप्यवृत्त्यवच्छेदके सद्भावे प्रमा णाभावः। सप्तम्यंतानुयोगिवाचकपदसमभिव्याहृतो नञः अत्यं ताभावार्थकत्वम्।

परिष्काराः

व्यापकत्वम् तदधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वमेकम् तदधिकरणवृत्तिभेदप्रतियोगितानवच्छेदकत्वमपरम् अधिकदेश वृत्तित्वरूपव्यापकत्वमप्यस्ति तच्च स्वसामानाधिकरण्ये सति स्वाभावसामानाधिकरण्यम्। व्याप्यत्वम् तदभाववदवृत्तित्वरू पमेकं स्वव्यापकतत्कत्वं (तत्सामानाधिकरण्यं) अपरं न्यूनदेशवृ त्तित्वरूपव्याप्यत्वमप्यस्ति तच्च स्वसमानाधिकरणत्वे सति स्व समानाधिकरणभेदप्रतियोगितावच्छेदकत्वमेकं स्वसमानाधिक रणत्वे सति स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमपरं। स्वव्यापकत्वे सति स्वव्याप्यत्वं स्वसमनियतत्वं। हेतुव्यापक साध्यव्यापकत्वं हेतौ समव्याप्तत्वं यथा सत्तावान् जातेरित्यत्र

च्छिन्नकार्यतानिरूपितकारणताश्रयत्वमसाधारणकारणत्वं । कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं साधारणकारणत्वं । अनुक्तस्य पदस्य प्रकृतशाब्दबोधोपयोगित्वेनानुसंधानमध्याहारः । पूर्वोक्तपदस्य प्रकृतशाब्दबोधोपयोगित्वेनानुसंधानमनुषङ्गः । स्वप्रतियोगि...त्वस्वानुयोगिवृत्तित्वोभयसंबंधेन भेदविशिष्टान्यद्रव्यविभाजकोपाधिमत्वमाकाशगतैकत्वं। प्रतियोगिवैयधिकरण्यं च प्रतियोग्यधिकरणावृत्तित्वरूपमेकम्. प्रतियोग्यनधिकरणवृत्तित्वरूपमपरम् । विशिष्टाभावोभयाभावादिकमादाय प्रसक्तस्यासंभवस्य वारकं व्यापकत्वं तदधिकरणवृत्त्यत्यन्ताभावीयवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताशून्यत्वरूपमेकं स्वानधिकरणतदधिकरणवृत्त्यत्यन्ताभावप्रतियोगि यद्यत्त्वं तद्भिन्नत्वरूपमपरं । इदं तदधिकरणवृत्त्यत्यंताभावप्रतियोगिपरम् । क्षणे क्षणाव्यवहितोत्तरत्वं च स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वध्वंसाधिकरणत्वं । क्षणे क्षणाव्यवहितपूर्वत्वं च स्वप्रागभावाधिकरणक्षणप्रागभावानधिकरणत्वे सति स्वप्रागभावाधिकरणत्वं । ज्ञानादौ ज्ञानाद्यव्यवहितोत्तरक्षणवृत्तित्वं च स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणीभूतः स्वाधिकरणक्षणध्वंसाधिकरणीभूतश्च यो क्षणः तद्वृत्तित्वरूपं ग्राह्यं। एवमेव ज्ञानादौ ज्ञानाद्यव्यवहितपूर्ववृत्तित्वमपि ग्राह्यं। अतीतत्वं वर्तमानध्वंसप्रतियोगित्वं । वर्तमानत्वं च शब्दप्रयोगाधिकरणकालवृत्तित्वं। अनागतत्वं च वर्तमानप्रागभावप्रतियोगित्वं । एकपदनिष्ठमपरपदपर्यायत्वं च अपरपदशक्यता

धकतावत्पुरुषांश्चरितत्वं ग्रन्थनिष्ठन्यूनत्वं स्वरूपसमवायाभयघ
टितसामानाधिकरण्यम् नाम स्वनिष्ठस्वरूपसम्बन्धावच्छिन्नाध
यतानिरूपिताधिकरणताश्रिरूपित समवायसम्बन्धावच्छिन्न
त्तित्वरूपम् । अकथनानुमितावोधकतावत्पुरुषत्वं ग्रन्थकर्तृनिष्ठ
न्यूनत्वम् । ज्ञाननिष्ठप्रामाण्यं तद्वतितत्प्रकारकत्वरूपं । मूतत्वं
च बहिरिन्द्रियजन्यप्रत्यक्षविषयविशेषगुणवत्वं । क्रियाश्रयत्वं
मूर्तत्वं । सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं । तद्धर्मावच्छिन्नशक्तत्वं
नाम तद्धर्मबोधकत्ववान् शब्दः स्वागमिकतत्पदजन्यशाब्दबोधी
यविशेष्यतावच्छेदकमुख्यविशेष्यकज्ञानजनकशब्दो वा भावप्र
धाननिर्देशः । संख्यात्वव्याप्यधर्मावच्छिन्नप्रकारकनिश्चयाविषय
त्वमसंख्याकत्वं तदेवानन्तत्वमुच्यते । तद्विषयकप्रतीत्यविषय
त्वं तत् घटितत्वं । तद्विषयताव्यापकविषयताकत्वं तत् घटक
त्वम् । समासार्थबोधकवाक्यत्वं विग्रहत्वम् ।

साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमिति
वा साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक पर्याप्त्यनुयो
गितावच्छेदकरूपावच्छिन्नानुयोगिताक पर्याप्तिकावच्छेदकताक
त्वमिति वा, स्वावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छे
दकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक
पर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमिति वा साध्यतावच्छेद
कतान्यूनवारकपर्याप्तिनिवेशप्रकारो विवेकः ।

साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वमितिससाध्यता

जातिरूपहेतौ एतद्रूपवानेतद्रसादित्यत्र तद्रसरूपहेतौ समव्याप्तहेतुत्वं वर्तते । स्वव्यापकसाध्याव्यापकत्वं हेतौ विषमव्याप्तत्वं यथा पर्वतो वह्निमान् धूमादित्यत्र धूमे विषमव्याप्तहेतुत्वं वर्तते । ग्रन्थे आद्यत्वं च स्वसमानाधिकरणपतनप्रतियोगिकध्वंसासमानकालिकम् यत्त्वं तद्भिन्नत्वं । चरमवर्णध्वंसस्समाप्तिः । वर्णचरमत्वं च स्वघटितग्रन्थघटकवर्णप्रागभावसमानकालिकत्वं यत्त्वं तद्भिन्नत्वं । विजातीयज्ञानानन्तरितसजातीयज्ञानपरम्पराध्यानं । स्वोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारो वन्दनं । कण्ठताल्वाद्यभिघातसंयोग उच्चारणं । आद्यकृतिरारम्भः । अनन्तराभिधानप्रयोजकजिज्ञासाजनकस्मरणप्रयोजक निरूप्यनिरूपकसम्बन्धत्वं सङ्गतित्वं । ज्ञानजनकशब्दघटकवर्णाभिव्यंजकरेखोपविलेखनं लिपिः। स्वविषयत्व स्वसामानाधिकरण्योभयसम्बन्धेन बाधकालीनेच्छाविशिष्टान्यत्वमनाहार्यत्वं । निरुक्तसम्बन्धद्वयेनाप्रामाण्यज्ञानविशिष्टान्यत्वमप्रामाण्यज्ञानानास्कन्दितत्वं । संशयभिन्नत्वं निश्चयत्वं । कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वं । प्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वं उत्तेजकत्वं । विषयतानिरूपकत्वं सविषयकत्वं । भेदकूटावच्छिन्नप्रतियोगिताकभेदवत्त्वमन्यतमत्वं । भेदद्वयावच्छिन्नप्रतियोगिताकभेदवत्त्वमन्यतरत्वं । ज्ञानशून्यावस्था सुषुप्तिः । परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्रसमावेशस्सङ्करः अथवा स्वसामानाधिकरण्य स्वाभावसामानाधिकरण्य स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वैतत्त्रितयसम्बन्धेन जातिविशिष्टत्वं तत् । अप्रामा

णिकानन्तसजातीयपदार्थकल्पनाप्रयोजनविश्रान्त्यभावोऽनवस्था। समवाये एकत्वं च स्वप्रतियोगिवृत्तित्व स्वानुयोगिवृत्तित्वो भयसम्बन्धेनभेदविशिष्टान्यपदार्थविभाजकोपाधिमत्त्वं । स्वप्रतियोगित्वस्वसामानाधिकरण्योभयसम्बन्धेनाभावविशिष्टत्व मव्याप्यवृत्तित्वं। निरुक्तसम्बन्धद्वयेनाभाव[अप्रा]...न्यत्वं व्याप्यवृत्तित्वं।

समवायस्वसमवायिसमवेतत्वोभयसम्बन्धेन सत्ताविशिष्टत्वं भावत्वं। निरुक्तसम्बन्धद्वयेन सत्ताविशिष्टान्यत्वमभावत्वं। वेदोक्तत्वज्ञानेन वेदविहितकर्मकारित्वं शिष्टत्वं। यत्सत्वे यत्सत्वमन्वयः यदभावे यदभावो व्यतिरेकः प्रथमद्वितीययत्पदे कार्यकारणत्वाभ्यामभिमतपरे। स्वेतरयावत्कारणसामग्रीसमवहितस्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगिकार्यत्व मन्वयव्यभिचारः। कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वं व्यतिरेकव्यभिचारः। भावनान्यो यो वायुवृत्तिवृत्तिस्पर्शावृत्तिधर्मसमवायी तदन्यत्वे सति गुरुत्वाजलद्रवत्वान्यगुणत्वं विशेषगुणत्वं। रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकसंयोगाविभागद्रवत्वावृत्तिजातिशून्यगुणत्वं सामान्यगुणत्वं।

कारणतावच्छेदकधर्मवत्वं स्वरूपयोग्यत्वरूपं कारणत्वम्। स्वजनकत्वसंबंधेन फलविशिष्टत्वम् फलोपधानरूपम् कारणत्वम्। उत्तरकालीनकृतिसाध्यत्वप्रकारकज्ञानजनकशब्दः प्रतिज्ञा। प्रतियोगिव्यधिकरणतदभावाभाववत्वं तदुपलक्षितत्वम्। आश्रयत्व संबंधेन विशेषणवत्वम् तद्विशिष्टत्वम्। कार्यत्वातिरिक्तधर्माव

योगिताक स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्तिप्रतियोग्यवच्छेदकताकत्वमिति वा स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमिति वा साध्यतावच्छेदकत्वेतरघारकपर्याप्तिनिवेशप्रकारो ज्ञेयः।

साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वे सति साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वमिति वा साध्यतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताक स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्याप्ति प्रतियोग्यवच्छेदकताकत्वमिति वा स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमिति वा साध्यतावच्छेदकतान्यूनेतरघारकपर्याप्तिद्वयनिवेशप्रकारो ग्राह्यः॥

साध्यतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गताकत्वमिति वा, साध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताक संसर्गताकत्वमिति वा; स्वनिरूपितसंसर्गतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमिति वा, साध्यतानिरूपितसंसर्गतावच्छेदकतान्यूनवारकपर्याप्तिनिवेशप्रकारो ग्राह्यः॥

साध्यतानिरूपित संसर्गतावच्छेदकातिरिक्तधर्मानवच्छिन्न संसर्गताकत्वमिति वा साध्यतानिरूपितसंसर्गतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपा वच्छिन्नानुयोगिताकस्वनिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्तिप्रतियोग्यवच्छेदकताकसंसर्गताकत्वमितिवा स्वनिरूपितसंसर्गता वच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन साध्यतानिरूपित संसर्गता वच्छेदकताप्रतियोगिक पर्याप्त्यनुयोगितावच्छेदकरूप वृत्तित्वमितिवा साध्यतानिरूपित संसर्गता वच्छेदकतेतरत्वारकपर्याप्तिनिवेशप्रकारो ग्राह्यः ॥

साध्यतानिरूपितसंसर्गतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसंसर्गताकत्वे सति साध्यतानिरूपितसंसर्गतावच्छेदकातिरिक्तधर्मानवच्छिन्नसंसर्गताकत्वमिति वा. साध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक पर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताक स्वनिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक पर्याप्तिप्रतियोग्यवच्छेदकताकसंसर्गताकत्वमिति वा स्वनिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन साध्यतानिरूपितसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमिति वा, साध्यतानिरूपितसंसर्गतावच्छेदकतान्यूनेतरत्वारकपर्याप्तिद्वयनिवेशप्रकारो ग्राह्यः ।

एवमेव हेतुतावच्छेदकत्वादिन्यूनेतरत्वारकपर्याप्तिनिवेशप्र

कारोपि ग्राह्यः तथा च सम्बन्धावच्छिन्नास्वाश्रयताप्रभृतिषु त त्तद्व्यपचारणाय निरुक्तविधपर्याप्तिनिवेशः कार्य इति सिद्धम् ॥

चक्षुर्ग्राह्यपदार्थ निरूपणम्

महत्त्वोद्भूतरूपालोकसंयोगविशिष्टद्रव्याणि तदभावाः तादृशद्रव्यवृत्तिजातयः तदभावाः तादृशद्रव्यवृत्त्युद्भूतरूपसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहाः तदभावाः तादृशगुणवृत्तिजातयः तदभावाः तादृशद्रव्यवृत्तिकर्म तदभावः तज्जातिः तदभावः तादृशद्रव्यवृत्तिसमवायः तदभावः तद्धर्मः तदभावः एते चक्षुरिन्द्रियेण गृह्यन्ते अमुमेवार्थं येनेन्द्रियेण ग्राह्यव्यक्तिर्गृह्यते तेनेन्द्रियेण तन्निष्ठाजातिस्तदभावश्च गृह्यते इति न्यायो बोधयति ॥

त्वगिन्द्रियग्राह्य पदार्थ निरूपणम्

महत्त्वोद्भूतरूपोद्भूतस्पर्शविशिष्टानि द्रव्याणि तदभावाः तज्जातयः तदभावाः रूपरूपत्वरूपाभावभिन्नं चाक्षुषप्रत्यक्षविषयीभूतं सर्वमपि त्वगिन्द्रियग्राह्यं भवति स्पर्शतदभावौ तज्जाति तदभावौ च त्वगिन्द्रियेण गृह्यन्त इति विशेषः ॥

रसनेन्द्रियग्राह्यपदार्थनिरूपणं

महत्त्वसमानाधिकरणरसाः तदभावाः तज्जातयः तदभावाः समवायः तदभावः तद्धर्मः तदभावः एते रसनेन्द्रियेण गृह्यन्ते ॥

घ्राणेन्द्रियग्राह्यपदार्थनिरूपणं

महत्त्वसमानाधिकरणगन्धाः तदभावाः तज्जातयः तदभावाः

समवायः तदभावः तद्धर्मः तदभावः घ्राणेन्द्रियेण गृह्यन्ते ॥

श्रोत्रेन्द्रियग्राह्यपदार्थ निरूपणम्

शब्दाः तदभावाः तज्जातयः तदभावाः समवायश्च श्रोत्रेन्द्रियेण गृह्यन्ते ॥

मनोग्राह्यपदार्थ निरूपणम्

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः तदभावाः तज्जातयः तदभावाः जीवः तदभावः मनइन्द्रियेण गृह्यन्ते येनेन्द्रियेणेति नियम एव तत्तदिन्द्रियाणां तत्तत्पदार्थग्राहकत्वमस्तीति सूचयति ॥

तथा च चाक्षुषप्रत्यक्षं प्रति महत्त्वोद्भूतरूपालोकसंयोगचक्षुस्सन्निकर्षाणाञ्चतुर्णां कारणत्वं अणुपरिमाणवतां परमाणूनां अनुद्भूतरूपवतां इन्द्रियाणां अन्धकारगतानां चक्षुस्संयोगरहितानां च पदार्थानां चाक्षुषवारणाय क्रमेण महत्त्वादीनां चतुर्णां कारणत्वभङ्गीकार्यं ॥

त्वाचप्रत्यक्षं प्रति महत्त्वोद्भूतरूपत्वक्संयोगानान्त्रयाणां कारणत्वं वाच्यम् ॥

रासनप्रत्यक्षं प्रति महत्त्वरसनेन्द्रियसन्निकर्षयोः द्वयोरेव कारणत्वं वाच्यं ॥

घ्राणजप्रत्यक्षं प्रति महत्त्वघ्राणेन्द्रियसन्निकर्षयोः द्वयोरेव कारणत्वं वाच्यं ॥

श्रावणप्रत्यक्षेपि महत्त्वश्रोत्रेन्द्रियसन्निकर्षयोः द्वयोरेव हेतुत्वम् ॥

मानसप्रत्यक्षे महत्त्वात्ममनस्सन्निकर्षयोः द्वयोरेव हेतुत्वं ज्ञेयं ॥

महत्त्वं तु षड्विधेऽपि प्रत्यक्षे हेतुरेव। अयमर्थो महत्त्व षड्विधेहेतुरित्यादिना विश्वनाथपञ्चाननभट्टाचार्येण निरूपितः। द्रव्यविषयकप्रत्यक्षे महत्त्वस्य समवायसम्बन्धेन द्रव्यसमवेतविषयकप्रत्यक्षे तस्य स्वसमवायिसमवेतत्वसम्बन्धेन द्रव्यसमवेतसमवेतविषयकप्रत्यक्षे तस्य स्वसमवायिसमवेतसमवेतत्वसम्बन्धेन च हेतुत्वं ज्ञेयं ॥

एवमेवोद्भूतरूपालोकसंयोगचक्षुरादीन्द्रियाणामपि प्रत्येकं हेतुत्वं ज्ञेयम्। शब्दप्रत्यक्षे श्रोत्रसमवायस्य प्राणयोगिनासम्बन्धेन हेतुत्वं। शब्दत्वप्रत्यक्षे श्रोत्रसमवेतसमवायस्य तेनैव सम्बन्धेन हेतुत्वं ज्ञेयम ॥

अभावनिरूपणम्

अत्यन्ताभावो बहुविधः सामान्याभावः विशेषाभावः विशिष्टाभावः उभयाभावः त्रितयाभावप्रभृतयः अन्यतराभावः समुदायाभावः प्रत्येकाभाव इत्यादिना। द्रव्यमादाय क्रमेणाभावाः दृष्टान्तपुरस्सरं प्रदर्श्यन्ते। आद्यः गुणे द्रव्यं नास्तीति प्रतीतिसिद्धाभावः। द्वितीयः भूतले घटाभावः। तृतीयः भूतले पृथ्वीत्वगवृत्तित्वविशिष्टद्रव्याभावः। चतुर्थः भूतले द्रव्यगुणत्वोभयाभावः। पञ्चमः द्रव्यगुणत्वकर्मत्वत्रितयाभावः। षष्ठः गुणे द्रव्यगुणान्यतराभावः। सप्तमः गुणे द्रव्यगुणगुणत्वकर्मकर्मत्वसमुदायाभावः। अष्टमः गुणे द्रव्याभावः गुणाभावः कर्माभावः कर्मत्वाभावादयः ॥

अन्योन्याभावोऽपि बहुविधः, सामान्यभेदः विशेषभेदः वि
शिष्टभेदः उभयभेदादिः अन्यतरभेदः समुदायभेदः अवच्छेदकभेद
इत्यादिना। आद्यः गुणे द्रव्यं नेति भेदः। द्वितीयः गुणो घटो
नेति प्रतीतिसिद्धभेदः। तृतीयः भूतलवृत्तित्वविशिष्टद्रव्यभेदः।
चतुर्थः द्रव्यगुणोभयभेदादिः। पञ्चमः द्रव्यगुणान्यतरभेदः। षष्ठः
द्रव्यगुणकर्मसमुदायभेदः। सप्तमः द्रव्यभेदः गुणभेदः कर्मभेदश्च।
भविष्यतीति प्रतीतिविषयः प्रागभावः। ध्वस्तो नष्ट इति प्रतीति
विषयः प्रध्वंसाभावः। नास्तीति, प्रतीतिविषयः अत्यन्ताभावः।
न भवतीति प्रतीतिविषयः अन्योन्याभावः। नास्तिपदाभिलाप
स्थल एवात्यन्ताभावो बोध्यते। परं तु तादात्म्यसम्बन्धेन नास्ती
त्यत्र नास्तिपदप्रयोगेऽप्यन्योन्याभाव एव बोध्यते। भूतले न घट
इत्यत्र नास्तिपदप्रयोगाभावेऽपि सप्तम्यन्तानुयोगिवाचकपदसम
भिव्याहृतनञः अत्यन्ताभावबोधकत्वमिति नियमेन अत्यन्ताभाव
एव बोध्यते। संयोगसम्बन्धेन द्रव्यत्वाभावः व्यधिकरणसम्ब
न्धावच्छिन्नप्रतियोगिताकाभावः. अयं च केवलान्वयी। सौ
न्दडमते घटत्वेन पटो नास्तीत्याकारकप्रतीतिसिद्धाभावः व्यधि
करणधर्मावच्छिन्नप्रतियोगिताकाभावः घटत्वेन. पटवान्नेत्याका
रकप्रतीतिसिद्धभेदः व्यधिकरणधर्मावच्छिन्नावच्छेदकताकप्रति
योगिताकभेदः द्रव्यत्वेन घटो नास्तीत्याकारकप्रतीतिसिद्धाभा
वः सामान्यरूपेण विशेषाभावः घटत्वेन द्रव्यं नास्तीत्याकारकः
विशेषरूपेण सामान्याभावश्च अङ्गीक्रियते। वह्नित्वेन नागीनाम
...भयं नास्ति घटत्वेन घटपटोभयं नास्तीत्याकारप्रतीतिसिद्धा ...
[illegible]

वृत्तिनियामकसम्बन्ध निरूपणम

संयोगसम्बन्धः समवायसम्बन्धः कालिकसम्बन्धः स्वरूपसम्बन्धः दिक्कृतविशेषणतासम्बन्धः पर्याप्तिसम्बन्धः स्वाभावच्छत्तित्वसम्बन्धप्रभृतयः वृत्तिनियामकसम्बन्धाः। वृत्तिनियामकत्वं च वृत्तितावच्छेदकत्वं। तच्च तेनसम्बन्धेनतज्ज्ञानानिप्रतीतिनिबन्धनं। द्रव्ययोरवयवावयविभिन्नयोः संयोगः सम्बन्धः। अयुतसिद्धयोः समवायः सम्बन्धः। अयुतसिद्धाश्च अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये च। सर्वस्य पदार्थस्य काले वर्तमानत्वे कालिकः सम्बन्धः अत्र च सर्वाधारः काल इति नियमो नियामकः। जन्ये पदार्थसत्वेपि कालिक एव सम्बन्धः तत्र जन्यानां कालोपाधित्वमिति नियमो नियामकः। नित्येषुकालिकायोगइतिनियमेन नित्यपदार्थेषु न कोपि पदार्थः कालिकसम्बन्धेन वर्तते। विभिन्नकालीनयोः विषयत्वान्यसम्बन्धेनाधाराधेयभावविरह इति नियमेन अन्येष्वपिभिन्नकालिकाः पदार्थाः न कालिकसम्बन्धेन वर्तन्ते। भिन्नकालिकयोरपि अधाराधेयभावः आगामिपदार्थविषयकज्ञानानुरोधेन अङ्गीक्रियते॥

निरूपककोटिप्रविष्टा अभावप्रभृतयः द्रव्यादिपञ्चकभिन्नाः स्वरूपसम्बन्धेन आश्रयेषु वर्तन्ते तथाच द्रव्यादिपञ्चकभिन्नानां आश्रयेषु वर्तमानत्वे स्वरूपसम्बन्धएव सम्बन्ध इति फलितम। मूर्तानां दिगुपाधित्वामितिनियमेन मूर्तेषु नित्येष्वनित्येषु च दिक्कृतविशेषणतासम्बन्धेन पदार्थाः वर्तन्ते। उभयत्वत्रित्वादिपरार्धपर्यन्तास्संख्याः अवच्छेदकताश्च पर्याप्तिसम्बन्धेनापि आ

श्रयेषु वर्तन्ते । उभयत्वादिव्यासज्यवृत्तिधर्माः उभयत्वाद्यवच्छे
दकेनैव पर्याप्तिसम्बन्धेन आश्रयेषूभयप्रभृतिषु वर्तन्ते । अवच्छेदक
तास्तु उभयत्वाद्यवच्छेदेन एकत्वावच्छेदेन च ... वर्तन्त
इतीयान् भेदः उभयत्वादीनां अवच्छेदकतानां ... वर्तते । केचि
त्तद्विषयताया अपि पर्याप्तिमङ्गीकुर्वन्ति । आर्द्रेन्धनसंयोगरूपो
पाधेः धूमवान् वह्ने रित्यत्र वह्निरूपहेतौ स्वाभाववद्वृत्तित्वसम्ब
न्धेन वर्तते । यद्वैशिष्ट्यं यत्र भासते स एव स्वपदार्थ इति निय
मेन स्वपदेनार्द्रेन्धनसंयोगस्य परिग्रहणे स्वाभाववदयोगोलकं
तद्वृत्तित्वं वह्नौ वर्तते इति । सम्बन्धमात्रं किंचित्प्रतियोगिकं
किंचिदनुयोगिकं च आधेयाः प्रतियोगिनः आधारास्त्वनु
योगिनः ॥

वृत्त्यनियामकसम्बन्धनिरूपणं

ते च निरूपककोटिप्रविष्टाः कार्यताप्रभृतयः परम्परास
म्बन्धाश्च एते च स्वसामानाधिकरण्य स्वसमानकालीनत्वादयः
एवमेवान्येपि ग्राह्याः । वृत्त्यनियामकत्वं च वृत्तितानवच्छेदक
त्वं तथतेन सम्बन्धेन तद्वानिति प्रतीत्यभावनिबन्धनम् ॥

लक्षणदोषनिरूपणं

अतिव्याप्तिः अव्याप्तिः असम्भवश्च आत्माश्रयः अन्योन्या
श्रयः चक्रकापत्तिरित्येते लक्षणदोषाः । अलक्ष्ये लक्षणसत्वमति
व्याप्तिः यथा गोश्शृंगित्वं लक्षणमुक्तंचेद्गोभिन्नमहिषादावपि शृं
गित्वस्य सत्वादतिव्याप्तं तल्लक्षणं भवति । केषुचिल्लक्ष्येषु लक्षणा
सत्वमव्याप्तिः, यथा गोः कलरूपवत्वं लक्षणमुक्तंचे त्कपिलरूप

वत्वलक्षणस्य श्वेतगव्यभावादव्याप्तं तल्लक्षणं । लक्ष्यमात्रे कुत्रापि लक्षणासत्वमसम्भवः, यथा गोरेकशफवत्वं लक्षणमुक्तंचेत्तस्य लक्ष्यभूते गोसामान्ये कुत्राप्यभावादसम्भवितल्लक्षणं । स्वग्रहाधीनस्वग्रहविषयत्वं आत्माश्रयः । स्वग्रहाधीनग्रहाधीनस्वग्रहविषयत्वमन्योन्याश्रयः । स्वग्रहाधीनग्रहाधीनग्रहाधीनस्वग्रहविषयत्वं चक्रकापत्तिः । दोषत्वं च दुष्टताप्रयोजकत्वं ॥

* हेतुदोषनिरूपणं *

व्यभिचारः विरोधः सत्प्रतिपक्षः आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिः बाधः सिद्धसाधनं अर्थान्तरं भागासिद्धिः साध्याप्रसिद्धिः साधनाप्रसिद्धिप्रभृतयो हेतुदोषाः । साध्याभाववद्वृत्तिहेतुर्व्यभिचारः न तु साध्याभाववद्वृत्तित्वमात्रं तन्मात्रस्य अनुमितिप्रतिबन्धकनातिरिक्तवृत्तिविषयताकत्वात् । साध्यभाववद्वृत्तित्वमात्रमपि हेतुनिष्ठव्यभिचारतया व्यवहारन्ति, तथापि न तस्य दोषेष्वन्तर्भावः । एवमेव निश्चितसाध्यव्द्व्यावृत्तहेतुरेवासाधारण्यं प्राचां । नवीनास्तु साध्यासमानाधिकरणहेतुमेवासाधारण्यं वदंति । एवमन्वयव्यतिरेकदृष्टान्तरहितहेतुरनुपसंहारित्वं प्राचीनमते, नवीनमते अत्यन्ताभावाप्रतियोगिसाध्यकत्वं तत् । साध्यव्यापकीभूताभावप्रतियोगिहेतुर्विरोधः ।

केचन एतादृशं विरोध मेवासाधारण्यं साध्यासामानाधिकरण्यमेव विरोधं चाहुः । प्राचीनमते साध्याभावव्याप्यप्रतिहेतुमत्तापरामर्शकालीनसाध्यव्याप्यप्रकृतहेतुमत्तापरामर्श विषय

त्वं सत्प्रतिपक्षदोषः। नवीनमते साध्याभावव्याप्यवत्पक्षः सत्प्रतिपक्षः। पक्षतावच्छेदकाभाववत्पक्ष आश्रयासिद्धिः। हेत्वभाववत्पक्षः स्वरूपासिद्धिः। साध्याभाववद्वृत्तित्वाभाववद्धेतुः व्याप्यत्वासिद्धिः। साध्याभाववत्पक्षो बाधः। पक्षे साध्यनिश्चयः सिद्धसाधनं। अनभिमतार्थसिद्धिरर्थान्तरं। पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभावो भागासिद्धिः। साध्यतावच्छेदकाभाववत्साध्यं साध्याप्रसिद्धिः। साधनतावच्छेदकाभाववत्साधनं साधनाप्रसिद्धिः। हेतुघटकविशेषणानां व्यभिचारवारकतया साध्यघटकविशेषणानामर्थान्तरसिद्धसाधनादिवारकतया पक्षघटकविशेषणानामपि क्वचिदाश्रयासिद्धिसिद्धसाधनादिवारकतया क्वचित्स्वोक्तावनौचित्यदोषसङ्गमनफलकत्वेन च सार्थक्यमवधेयम्॥

सर्वेषां च पदार्थानां क्लृप्तपदार्थेष्वन्तर्भावप्रकारः

तमः प्रौढप्रकाशकतेजःसामान्याभावरूपः। सादृश्यस्य तद्भिन्नत्वे सति तद्गतभूयोधर्मरूपतया तस्य साधारणधर्मेऽन्तर्भवति। अतः साधारणधर्मसमपदार्थान्तर्भूत एव। स्वरूपसम्बन्धः स्थलभेदेन प्रतियोग्यनुयोगिनोरन्तर्भावमुपैति। निरूपककोटिप्रविष्टाः कार्यताप्रभृतयः अधिकरणरूपतां भजन्ते यथा कार्यत्वं कार्यरूपं विषयत्वं विषयरूपं। कालिकदैशिककृतविशेषणतासम्बन्धौ अधिकरणरूपावेव। प्रतिबन्धकसद्भावासद्भावाभ्यामेव प्रकृतकार्योत्पत्त्यनुत्पत्त्योः निर्वाहे अतिरिक्तशक्तेरनभ्युपगमाच्छक्तेर्नातिरिक्तपदार्थता। लघुत्वं तु गुरुत्वाभावरूपं। मृदुत्वकठिनत्वयोः मृदुकठिनावयवसंयोगरूपत्वेन तयोः संयोगेऽन्तर्भावः।

एव मतिरिक्तत्वेन प्रतीयमानानां पदार्थानां उक्तेषु सप्तसु पदार्थे ष्वेवान्तर्भावः नपुनः पृथग्भूततेति ध्येयम् ॥

भावरूपाभावनिरूपणम्

घटाभावाभावो घटस्वरूपः। घटाभाववद्भेदोपि घटस्वरूपः समनैय्यत्यात्। घटभिन्नभेदो घटत्वरूपः। घटभेदाभावो घटत्व रूपः। घटवद्भिन्नभेदो घटस्वरूपः। घटवद्भेदाभावो घटस्वरूपः। घटावृत्तिर्नास्तीति प्रतीतिसिद्धाभावो घटत्वस्वरूपः स च अभा वः घटनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्वाभाववतः स्वरूपे ण नास्तीत्याकारकप्रतीतिसिद्धाभावः। घटध्वंसप्रागभावः घट प्रागभावध्वंसश्च घटस्वरूप एव। घटपटान्यतराभावाभावस्य घ टपटान्यतररूपतया अन्यतरान्तर्गतघटरूपत्वमपि सम्भवति। घटपटकुड्यान्यतमाभावाभावस्य घटपटकुड्यान्यतमस्वरूपतया अन्यतमान्तर्गतघटरूपत्वमपि सम्भवति। एताश्चाभावानां भाव रूपत्वस्वीकारे तद्भावाभावयोस्समनैयत्यमेवातिप्रसङ्गानापादक ताविशिष्टं प्रयोजकमिति पर्यवस्यति। पूर्वक्षणवृत्तित्वविशिष्टघ टाभावाभावस्य पूर्वक्षणवृत्तित्वविशिष्टघटरूपतया विशिष्टं शुद्धा न्नातिरिच्यत इति न्यायेन पूर्वक्षणवृत्तित्वविशिष्टघटस्य शुद्धघट स्यचैक्यात् पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावोपि घटरूप एव। जलवृत्तित्वविशिष्टो यः पटाभावः तदभावस्य घटे सत्वेन अभाव प्रतियोगिकाभावस्याधिकरणरूपत्वाङ्गीकर्तृमते जलवृत्तित्वविशि ष्टपटाभावाभावोपि घटरूप एव। अनयोरभावयोः भावसमनैय त्याभावेपि भावरूपत्वमेवाङ्गीकृतं कैश्चित्। एतन्मते प्रसक्ताति

प्रसङ्गः तत्तदभावाधिकरणत्वाभावेनैव वारणीयाः। घटाभाव स्तत्ज्ञानरूपः तत्ज्ञानकालस्वरूपः अधिकरणरूप इति च केचन मन्यन्ते तन्मते ज्ञानकालातीन्द्रियाधिकरणानां चक्षुरादिग्रहणा योग्यतया घटाभावस्यापि चक्षुराद्यग्राह्यत्वप्रसङ्गरूपा अतिप्रस क्त्यां दुर्वाराः॥

ज्ञायमानस्य कारणत्वप्रतिबन्धकत्वनिरासः

यदि ज्ञायमानं लिङ्गं अनुमितिकरणं तदा धूळीपटले धूम त्वभ्रान्तिमतो वह्निव्याप्यधूमवानयमिति परामर्शाद्धूळीपटलंधूम त्वेनावगाहमानादनुमितिर्नस्यात्। तदा लिङ्गज्ञानसत्वेऽपि ज्ञायमा नलिङ्गस्याभावात्। कारणाभावात्कार्याभावस्य सर्वसम्मतत्वात्। एवमेव ज्ञायमानं पदं यदि शाब्दधीहेतुः तदा[illegible]श्लोकादित इशाब्दबोधानुपपत्तिः; तदानीं कण्ठताल्वाद्यभिघात [illegible]गजन्य ध्वनिविशेषरूपस्य ज्ञायमानशब्दस्य अभावात्। एवमेव[illegible] वह्नि भ्रान्तिसत्वे तया च भ्रान्त्या ह्रदो वह्न्यभाववानिति ज्ञानं प्र[illegible]तिबध्य ते। यदि ज्ञायमानस्य प्रतिबन्धकता तदा ज्ञायमानस्य वह्नेः ह्रदेऽ भावात् तत्ज्ञानस्याप्रतिबध्यत्वापात्तिः। एवमेव स्थलविशेषेषु ग्राह्यं। सर्वत्रापि निश्चयस्यैव प्रतिबन्धकत्वकारणत्वयोरङ्गीकारे घटादिकं प्रति स्वरूपतः कारणानां दन्डकुलालसलिलादीनां नि श्चयभिन्नानां कारणत्वभङ्गः दाहादिकं प्रति स्वरूपतः प्रतिबन्ध कानां मण्यादीनां निश्चयभिन्नानां प्रतिबन्धकत्वभङ्ग श्चेति न शं कनीयम्। नास्माभिस्सर्वत्र ज्ञानस्यैव कारणत्वमुच्यते किन्तु ज्ञा नस्य कारणताप्रसक्तिस्थले ज्ञायमानस्य तन्निषिध्यते। अतः ज्ञा

यमानस्य न कारणत्वप्रतिबन्धकत्वे सम्भवतः; किन्तु ज्ञानस्यैव ते सम्भवत इति सिद्धान्तः ॥

कार्यकारणभाव विचारः

यत्सत्वे यत्सत्व मित्यन्वयः यदभावे यदभाव इति व्यतिरेकश्च कार्यकारणभावं ग्राहयतः। सर्वत्र कार्यकारणयोस्सामानाधिकरण्यमावश्यकं। समवाय्यसमवायिकारणस्थलयोस्समवायिकारणान्तर्भावेणोभयोः सामानाधिकरण्यं सम्भवतीति ज्ञेयम्। सर्वत्र समवायिकारणस्थले समवायिसम्बन्धेन जायमान घटादिकार्यं प्रति तादात्म्यसम्बन्धेन कपालादिसमवायिकारणानां कारणत्वं वक्तव्यं। अतः समवायिकारणस्थले समवायसम्बन्ध एव कार्यतावच्छेदकसम्बन्धः तादात्म्यसम्बन्ध एव कारणतावच्छेदकसम्बन्धश्च भवतः ॥

प्रथमासमवायिकारणस्थले समवायसम्बन्धेन जायमानघटादिकार्यं प्रति समवायसम्बन्धेनैव कपालसंयोगादिरूपासमवायिकारणस्य कारणत्वमित्यसमवायिकारणस्थले कार्यतावच्छेदकः कारणतावच्छेदकोपि सम्बन्ध स्समवाय एव।

द्वितीयासमवायिकारणस्थले समवायसम्बन्धेन जायमान घटरूपादिकार्यं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन कपालादिरूपस्य कारणत्वं घटाद्यन्तर्भावेण सामानाधिकरण्यं च बोध्यं।

परन्तु निमित्तकारणानां बहुविधत्वेन कार्यकारणभेदेन कार्यतावच्छेदककारणतावच्छेदकसम्बन्धभेदः। यथा समवायसम्बन्धेन जायमानघटंप्रति स्वजन्यभ्रमिजन्यभ्रमिवत्वसम्बन्धेन

दण्डस्य कारणत्वं उभयोः कपालान्तर्भावेण सामानाधिकरण्यं ।

विषयतासम्बन्धेन जायमानघटादिप्रत्यक्षं प्रति तादात्म्य सम्बन्धेन घटादिविषयस्य कारणत्वं । अत्र च विषयान्तर्भावेण सामानाधिकरण्यं ।

प्रतियोगितासम्बन्धेन जायमानघटादिध्वंसं प्रति तादात्म्यसम्बन्धेन घटादिप्रतियोगिनां कारणत्वं प्रतियोग्यन्तर्भावेण सामानाधिकरण्यं ।

विषयतासम्बन्धेन जायमानद्रव्यविषयकचाक्षुषप्रत्यक्षं प्रति महत्त्वोद्भूतरूपालोकसंयोगचक्षुस्संयोगानां समवायसम्बन्धेन कारणत्वं विषयान्तर्भावेण सामानाधिकरण्यं ।

समवायसम्बन्धेन जायमानानुमितित्वावच्छिन्नं प्रति समवायसम्बन्धेन परामर्शस्य करणत्वं आत्मान्तर्भावेण सामानाधिकरण्यं ।

एवमेव समवायसम्बन्धेन जायमानोपमितिशाब्दबोधौ प्रति सादृश्यज्ञानपदज्ञानयोस्समवायसम्बन्धेन हेतुत्वं आत्मान्तर्भावेण सामानाधिकरण्यं।

विषयतासम्बन्धेन जायमानबाह्यद्रव्यप्रत्यक्षं प्रतीन्द्रियस्य संयोगसम्बन्धेन हेतुत्वं विषयान्तर्भावेण सामानाधिकरण्यं ।

एवमेवात्मनिवर्तमानानां गुणानां परस्परकार्यकारणभावे प्राप्ते उभयत्रापि समवायसम्बन्धेनात्मान्तर्भावेण हेतुत्वं ज्ञेयं ।

मङ्गळं त्रिविधं ज्ञानात्मकं शब्दात्मकं क्रियात्मकञ्चेति ।

तत्रस्वप्रतियोगिचरमवर्णानुकूलकृतिमत्तासम्बन्धेन जाय

मानसमाप्तित्वावच्छिन्नं प्रति समवायसम्बन्धेन ज्ञानात्मकमङ्गळस्य कारणत्वं आत्मान्तर्भावेण सामानाधिकरण्यं ।

स्वरूपसम्बन्धेन जायमानसमाप्तिं प्रति समवायसम्बन्धेन गगनान्तर्भावेण शब्दात्मकमाङ्गळस्य हेतुत्वं बोध्यं ।

स्वप्रतियोगिचरमवर्णानुकूलकृतिमदवच्छेदकतासम्बन्धेन जायमानसमाप्तिं प्रति समवायसम्बन्धेन क्रियात्मकमङ्गळस्य शरीरान्तर्भावेण हेतुत्वं बोध्यं ॥

स्वप्रतियोगिचरमवर्णानुकूलकृतिमत्तासम्बन्धेन जायमानसमाप्तित्वावच्छिन्नं प्रति स्वजन्यविघ्नध्वंसवत्तासम्बन्धेन सर्वेषां मङ्गळानां कारणत्वं आत्मान्तर्भावेण सामानाधिकरण्य मवधेयं॥

स्वरूपसम्बन्धेन जायमानदाहत्वावच्छिन्नं प्रति संयोगसम्बन्धेन वह्ने रिन्धनान्तर्भावेण कारणत्वं बोध्यं ॥

कालिकसम्बन्धेन जायमानकार्यं प्रति तादात्म्यसम्बन्धेन कालस्य कालान्तर्भावेण कारणत्वं बोध्यं ॥

स्वानुकूलकृतिमत्वसम्बन्धेन जायमानकार्यं प्रति ईश्वरस्य तादात्म्यसम्बन्धेन कारणत्वं ईश्वरान्तर्भावेण सामानाधिकरण्यं॥

स्वाश्रयसंयोगिसंयुक्तत्वसम्बन्धेन जायमानकार्यं प्रति समवायेनादृष्टस्य कारणत्वं आत्मान्तर्भावेण सामानाधिकरण्यं ।

प्रतिबन्धकसत्वदशायां कार्योत्पत्त्यापत्तिवारणाय कार्यमात्रं प्रति प्रतिबन्धकाभावस्य कारणत्वं वाच्यं कार्योत्पत्त्यनन्तरं पुनस्तत्कार्योत्पत्त्यापत्तिवारणाय कार्यप्रागभावस्य च हेतुत्वं बोध्यं ॥

कार्यमात्रे प्रतिबन्धकाभावस्य लौकिकप्रत्यक्षे विषयस्य च कार्यसहभावेन कारणत्वं वक्तव्यं। अन्यथा कार्यकाले प्रतिबन्धकसत्त्वेऽपि [illegible]त्पत्त्यापत्तिः प्रत्यक्षकाले विषयाभावेपि लौकिक प्रत्य[illegible]पत्तिरित्यादिकं ग्राह्यं॥

प्रतिबध्यप्रतिबन्धकभावविचारः

तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयः तदभावव्याप्यवत्तानिश्चयः, तदभावावच्छेदकतया गृहीतधर्मवत्तानिश्चयश्च प्रतिबन्धकः, आद्यः ह्रदो वह्निमानिति बुद्धिं प्रति प्रतिबन्धकः वह्न्यभाववानिति निश्चयः, द्वितीयः वह्न्यभावव्याप्यवानिति निश्चयः, तृतीयः वह्न्यभाववज्जलवद्विषयकनिश्चयविशेष्यजलवद्ध्रदविषयकनिश्चयः. तादृशश्च निश्चयः वह्न्यभाववज्जलवद्वृत्ति जलवान् ह्रद इति निश्चयरूपः. जलवान् वह्न्यभाववान् ह्रदवान् ह्रदइत्यादिसमूहालंबननिश्चयरूपः जलवान् वह्न्यभाववानिति निश्चयविशिष्टजलवान् ह्रद इति निश्चयरूपश्च भवति॥

सन्निकर्षो द्विविधः. लौकिकसन्निकर्षः अलौकिकसन्निकर्षश्चेति. आद्यः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति षड्विधः। द्वितीयस्त्रिविधः. सामान्यलक्षणो ज्ञानलक्षणो योगजलक्षणश्चेति. एतदुदाहरणानि पूर्वमुक्तानि॥

प्रतिबध्यतावच्छेदकं तु लौकिकसंनिकर्षाजन्यदोषविशेषाजन्यतत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिबुद्धित्वमेव, नतुप्रत्यक्षत्वानुमितित्वोपमि

तित्वशाब्दबुद्धित्वनिश्चयत्वस्मृतित्वयथार्थानुभवत्वा यथार्थानुभवत्वादिकं किमपि, प्रत्यक्षत्वाद्यवच्छिन्नं प्रति प्रतिबन्धकत्व स्वीकारे अनुमित्यादीनां प्रतिबध्यतावच्छेदकधर्म... न प्रतिबन्धकसत्वदशायामपि अनुमित्यादीनामुत्... तद्धर्मावच्छिन्नं प्रति पृथक् पृथक् प्रतिबन्धकत्वस्वी... लक्ष... अतस्तादृशबुद्धित्वमेव प्रतिबध्यतावच्छेदकं... न... व्यं। प्रतिबन्धकतावच्छेदकं तु अनाहार्याप्रामाण्यज्ञानानास्कन्दिततत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिनिश्चयत्वमेव. न तु ज्ञानत्वादिकं किमपि. ज्ञानत्वादेः प्रतिबन्धकतावच्छेदकत्वे संशयादिदशायामपि तद्वत्ताबुद्धेः प्रतिबध्यत्वप्रसङ्गः अतस्तादृशनिश्चयत्वमेव प्रतिबन्धकतावच्छेदकमिति वक्तव्यम्।

म...मन्त्रादिन्यायेन चैकं प्रतिबन्धकत्वमस्ति, नतन्निश्चयाद्येव... यथा स्वरूपसम्बन्धेन जायमानदाहत्वावच्छिन्नं प्रति संयोगसम्बन्धेन मणेः प्रतिबन्धकत्वं, यथा वा समवायसम्बन्धेन-जायमानघटत्वावच्छिन्नं प्रति संयोगसम्बन्धेन वृष्टेः प्रतिबन्धकत्वं, यथा वा सर्पदंशनपिशाचादिजन्यबाधां प्रति मन्त्रस्य प्रतिबन्धकत्वम्।

मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वं च निश्चयत्वासमानाधिकरणप्रतिबन्धकत्वं, नचैवं सिद्धिनिष्ठस्य अनुमितित्वावच्छिन्ननिरूपितप्रतिबन्धकत्वस्य निश्चयत्वासामानाधिकरण्याभावेन सिद्धिनिष्ठप्रतिबन्धकत्वे तल्लक्षणासमन्वयप्रसङ्ग इति वाच्यम्।

बुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्वासमाना [illegible] निरुक्तप्रतिबन्धकत्वरूपत्वात्, साध्य [illegible]ावच्छिन्नं प्रत्येव प्रतिबन्धकत्वेन बुद्धित्वावच्छि [illegible] निरूपितप्रतिबन्धकत्वाभावेन तादृशप्रतिबन्धकत्वा [illegible] णप्रतिबन्धकत्वस्य तत्राक्षतत्वात्, न च साध्यासि [illegible] तावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्न [illegible] तानिरूपितपक्षतावच्छेदकावच्छिन्न विशेष्यताशालिबुद्धि [illegible] च्छिन्नं प्रति ग्राह्याभावावगाहित्वेन प्रतिबन्धकतया साध्य [illegible] अनुमित्यवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्ध कतायाः अपि निरुक्तबुद्धित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिब न्धकतासमानाधिकरणत्वेन सिद्धौ तादृशप्रतिबन्धकत्वासमा नाधिकरणप्रतिबन्धकत्वाभावेन तत्र मणिमन्त्रादिन्यायेनप्रतिबन्ध कत्वासम्भवप्रसङ्ग इति वाच्यं। बुद्धित्वावच्छिन्नप्रतिबध्यतानिरू पितप्रतिबन्धकत्वान्यप्रतिबन्धकत्वस्यैव मणिमन्त्रादिन्यायेन प्र तिबन्धकत्वशब्दार्थत्वात्, अनुमितित्वावच्छिन्नप्रतिबध्यतानिरू पितप्रतिबन्धकतामादाय सिद्धौ लक्षणसमन्वयसम्भवात्, का मिनीज्ञानान्यज्ञानत्वावच्छिन्नं प्रति कामिनीजिज्ञासायाः प्रति बन्धकत्वं इच्छायां विषयसिद्धेः प्रतिबन्धकत्वञ्च मणिमन्त्रादि न्यायेन प्रतिबन्धकत्वमेव ॥

नन्वेवमपि कामिनीजिज्ञासानिष्ठप्रतिबन्धकत्वस्यापि ज्ञान त्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्वान्यत्वाभावेनतत्र लक्षणासमन्वयप्रसङ्ग इति वाच्यम्, ज्ञानत्वातिरिक्तः किंचिद्ध र्मावच्छिन्नप्रकारतानिरूपितविशेष्यत्वाद्यतिरिक्तश्च यो धर्मः तद्

मानवच्छिन्नप्रतिवध्यतानिरूपितप्रतिबन्धकत्वस्य गुरुत्वा-
स्यैव निरुक्तप्रतिबन्धकत्वशब्दार्थत्वात्। ... न ...
सानिष्ठप्रतिबंधकतानिरूपितप्रतिबध्यताया ज्ञानत्व-
त्वातिरिक्तकामिनीज्ञानान्यत्वरूपधर्मावच्छिन्नत्वेन ना...
बध्यतामादाय दोषप्रसक्तेरभावात्।

अथ वा ज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितनिश्चयत्वावच्छिन्नप्रतिबन्धकत्वान्यप्रतिबन्धकत्वस्यैव निरुक्तप्रतिबन्धकतारूपत्वं वक्तव्यं. कामिनीजिज्ञासानिष्ठप्रतिबन्धकत्वस्य गौणमुख्यादिनिष्ठप्रतिबन्धकत्वानां च निश्चयत्वावच्छिन्नत्वाभावेन साध्यसिद्धिनिष्ठप्रतिबन्धकत्वस्यानुमितित्वावच्छिन्नप्रतिबध्यतानिरूपितत्वेपि ज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितत्वाभवेन विषयसिद्धिनिष्ठप्रतिबन्धकत्वस्येच्छात्वावच्छिन्नप्रतिबध्यतानिरूपितत्वेपि ज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितत्वाभावेन च मणिमन्त्रसाध्यसिद्धिविषयसिद्ध्यादिषु निरुक्तप्रतिबंधकत्वस्य न क्षतिः। ए-वमेव शब्दसाक्षात्कारादिप्रतिबन्धकेषु बाधिर्यमूकत्वदूरस्थत्वादिष्वपि निरुक्तप्रतिबंधकताभिन्नप्रतिबंधकत्वस्य न क्षतिः. नचैवमपि कम्बुग्रीवादिमदभावप्रतियोगितावच्छेदकत्वस्य कम्बुग्रीवादिषु स्वीकारे गौरवमिति गौरवानिश्चयस्य कम्बुग्रीवादौ निरुक्ताभावप्रतियोगितावच्छेदकत्वज्ञानं प्रति प्रतिबन्धकतया तन्निश्चये निरुक्तप्रतिबंधकताभिन्नप्रतिबंधकताश्रयत्वस्याभावादव्याप्तिरितिवाच्यं, तदभाववत्तानिश्चयत्वावच्छिन्नप्रतिबंधकताभिन्ना तदभावव्याप्यवत्तानिश्चयत्वावच्छिन्नप्रतिबंधकताभिन्ना निश्चयविशिष्टनिश्चयत्वावच्छिन्नप्रतिबंधकताभिन्ना या प्रतिबंधक

तदाश्रयत्वस्यैव निरुक्तप्रतिबन्धकत्वरूपत्वेन मणिमन्त्रादिषु
निःसिद्धिविषयक...इच्छात्वनिश्चयमूलत्वस्यानुगतत्वादपि निरु
...प्रतिबन्धकताश्रयत्वसत्वेन क्षत्यभावात्. न
...सिद्धिविषयसिद्धिकामिनोऽपि ...ज्ञानादिषु म
...न्यायेन प्रतिबन्धकत्वव्यवहारो...मित्येवेति वाच्यं, म
...रूपस्य मन्त्रस्य तादृशप्रतिबन्धकत्वासत्वे निरुक्तज्ञानेच्छादिषु
तादृशप्रतिबन्धकत्वाभावे विनिगमकाभावात्. तथा च तदभाव
वत्तानिश्चय तदभावव्याप्यवत्तानिश्चय तदभावावच्छेदकतयागृही
तधर्मवत्तानिश्चय भिन्नानां प्रतिबन्धकानां तत्तत्पदार्थं प्रति मणि
मन्त्रादिन्यायेनैव प्रतिबन्धकत्वमङ्गीकार्यम ॥

यदि च निरुक्तज्ञानेच्छाप्रभृतिष्वपि तदभाववत्तानिश्चयादि
निष्ठप्रतिबन्धकतासमशीलमेव प्रतिबन्धकत्वमनुभूयते मणिम
न्त्रादिन्यायेन प्रतिबन्धकत्वं नानुभूयत एवेत्युच्यते तदा आत्मगु
णत्वासमानाधिकरणप्रतिबन्धकत्वमेव मणिमन्त्रादिन्यायेन प्रति
बन्धकत्वं वाच्यम् । न च कामिन्यादिजन्यसुखसर्पादिजन्यदुःख
शत्रुद्वेषाभिमतकार्यविषयकप्रयत्नादिषु ज्ञानान्तरप्रतिबन्धकत्वे
नानुभूतेषु तत्प्रतिबन्धकत्वासमन्वयप्रसङ्ग इति वाच्यम्, ज्ञान
त्वेच्छात्वासमानाधिकरणप्रतिबन्धकत्वस्यैव निरुक्तप्रतिबन्धक
तारूपत्वात्. तथा च निरुक्तसुखादिषु सुवर्णादिनिष्ठोष्णस्पर्श
भास्वररूपोपलब्धिप्रतिबन्धकेषु पार्थिवरूपस्पर्शादिष्वपि निरुक्त
प्रतिबन्धकत्वस्य न क्षतिरिति. यदि ज्ञानेच्छयोरिव आत्मविशेष
गुणेषु सुखदुःखादिष्वपि तज्जातीयप्रतिबन्धकत्वस्यानुभवः त
दाऽऽत्मविशेषगुणत्वासमानाधिकरणप्रतिबन्धकत्वमेव मणिमन्त्रा

दिन्यायेन प्रतिबन्धकत्वं वाच्यं, तथा च मणिमन्त्रादिषु निरुक्त पार्थिवरूपस्पर्शादिषु दूरस्थत्वबाधिर्यमूकत्वादिषु च तत्तत्प्रति बन्धकेषु निरुक्तप्रतिबन्धकत्वमक्षतमिति न कापि अनुपपत्तिः॥

पक्षतावच्छेदकावच्छेदेन साध्यानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका, न तु सामानाधिकरण्येन साध्यसिद्धिरपि, सामानाधिकरण्येन सिद्धिसत्वेप्यवच्छेदकावच्छेदेन साध्यसंशयजननद्वारा अवच्छेदकावच्छेदेन साध्यानुमितिजननात्। पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन पक्षतावच्छेदकसामानाधिकरण्ये न च साध्यसिद्धिः प्रतिबन्धिका । पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकव्यापकविधेयप्रतियोगिकत्वं साध्यतावच्छेदकसम्बन्धांशे विशेषणतया भासते. तथा च पर्वतो वह्निमानित्यवच्छेदकावच्छेदेनानुमितिः पर्वतत्वव्यापकवह्निप्रतियोगिकसंयोगसम्बन्धावच्छिन्न वह्नित्वावच्छिन्न प्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनी भवति. निरुक्तसम्बन्धाविषयिणी केवलसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारता निरूपित पर्वतत्वावच्छिन्नविशेष्यताशालिनी अनुमितिः पर्वतस्वसामानाधिकरण्येन वह्न्यनुमितिः इति सामानाधिकरण्येनानुमितेरवच्छेदकावच्छेदेनानुमितेश्च भेदो ज्ञेयः। अवच्छेदकावच्छेदेन तद्वत्ताबुद्धिं प्रति अवच्छेदकावच्छेदेन सामानाधिकरण्येन च बाधनिश्चयः प्रतिबन्धकः, सामानाधिकरण्येन तद्वत्ताबुद्धिं प्रति अवच्छेदकावच्छेदेनैव बाधनिश्चयः प्रतिबन्धकः, न तु सामानाधि

करण्येन बाधनिश्चयः प्रतिबन्धकः; एकत्र बाधनिश्चये सत्यपि अन्यत्र तद्बुद्ध्युदयात्॥

विषयताविचारः

विषयता त्रिविधा, विशेष्यता प्रकारता संसर्गताचेति, प्रकारतैव विशेषणतेत्युच्यते, यथा संयोगसम्बन्धेन घटवद्भूतलमित्यत्र भूतले विशेष्यता घटे प्रकारता संयोगसम्बन्धे संसर्गता च वर्तते. एवमेव सविषयकपदार्थपक्षेऽपि विषयतात्रयं ग्राह्यं। अत्र विशेष्यता प्रकारता च अनुमितिनिरूपिताचेद्विशेष्यता उद्देश्यतेति प्रकारता विधेयतेति च व्यवह्रियते, यथा पर्वतो वह्निमानित्यनुमितौ पर्वतनिष्ठविशेष्यता उद्देश्यतेति वह्निनिष्ठा प्रकारता विधेयतेति च व्यवह्रियते। निर्विकल्पकज्ञाने तु विशेष्यता प्रकारता संसर्गता रूपविषयतात्रयं नास्ति, किं तु तत्र प्रति सविकल्पकादव्यवहितपूर्वं जायमाने घटविषयकनिर्विकल्पकप्रत्यक्षे विषयीभूतेषु घटघटत्वतत्समवायेषु तुरीयविषयताख्या एकैव विषयता त्रिष्वपि प्रत्येकं सम्भवति। अन्याः कृतिनिरूपिताश्च विषयताः उद्देश्यता, विधेयता उपादानताख्यास्तिस्रो वर्तन्ते, यथा जलानयनाय कपालाभ्यां घटमहं कुर्यामित्यत्र जलानयने उद्देश्यत्वाख्या कपालयोरुपादानताख्या घटे विधेयत्वाख्या च विषयता वर्तते. अनया रीत्या सर्वा अपि कृतिनिरूपितविषयताः ज्ञेयाः। घटं न जानामीत्यत्र द्वितीयार्थभूतविषयत्वस्य ज्ञाधात्वर्थीभूतज्ञाने समन्वयः, ज्ञानस्य नञर्थीभूताभावे च अन्वयः, तस्य च आख्यातार्थीभूताश्रयत्वेऽन्वयः, तथा च घटविषयकज्ञानाश्रयत्वाभाववानहमिति बोधोऽङ्गीक्रियते नैय्यायिकैः।

नञ्समभिव्याहृतज्ञा धातोर्भावरूपज्ञानार्थकत्वमङ्गीकृत्यत्रप्रमेय गकाज्ञानवानहमितिबोधोऽङ्गीक्रियतेवेदान्तिभिः॥

इदमत्रावधेयं. समानाधिकरणयोरेकज्ञानीययोः विशेष्यता प्रकारतयोः समनैयत्यादभेद इति केचन वदन्ति। तादृशयोः विशेष्यताप्रकारतयोः समनैयत्यादवच्छेद्यावच्छेदकभावइत्यपरे वदन्ति। यथा, आद्यमते घटवद्भूतलमितिज्ञाने घटो भूतलांशे विशेषणं घटत्वांशे विशेष्यं च भवति, अत्र घटनिष्ठायाः भूतल निष्ठविशेष्यतानिरूपितप्रकारतायाः घटत्वनिष्ठप्रकारतानिरूपित विशेष्यतायाश्च अभेदस्याङ्गीकृतत्वेन घटत्वादिष्ठप्रकारतानिरूपि ता या घटनिष्ठाप्रकारता तन्निरूपिता या भूतलनिष्ठा विशेष्यता इति तच्छालिबोधो भवतीत्यङ्गीक्रियते। द्वितीयमते घटवद्भूतल मित्यत्र घटत्वनिष्ठप्रकारतानिरूपिता या घटनिष्ठा विशेष्यता त दवच्छिन्ना या घटनिष्ठा प्रकारता तन्निरूपिता या भूतलनिष्ठा विशेष्यता इति तच्छालिबोधोऽङ्गीक्रियते। आद्यमते तादृशविशे ष्यताप्रकारतयोरभेदाङ्गीकारेपि तयोः प्रकारतारूपत्व, नविशे ष्यतारूपता. नातस्तन्मते घटत्वनिष्ठप्रकारतानिरूपिता या घट निष्ठा विशेष्यता तन्निरूपिता या भूतलनिष्ठा विशेष्यता इति तच्छालिबोधस्य सम्भवः॥

* क्रमेण प्रत्यक्षादिप्रमाणचतुष्टयनिरूपणे सङ्गतिनिरूपणम्

यन्निरूपणानन्तरं यन्निरूप्यते तत्तन्निरूपितसङ्गतिमदिति न्यायेन सङ्गतिमंतराऽनन्तरोक्तनिरूपणमसङ्गतं, अतस्सङ्गतिज्ञा नाय सा निरूपणीया सङ्गतित्वं च अनन्तराभिधानप्रयोजकजिज्ञा

साजनकस्मरणप्रयोजकनिरूप्यनिरूपकभावसम्बन्धत्वं. अत्रायं क्रमः. प्रथ मं निरूप्यनिरूपकस्य निरूपितसम्बन्धस्य ज्ञानं, तदन्वेकसम्बन्धिनो निरूपितस्य ज्ञानं, तदन्येकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमि ति नियमेन अपरसम्बन्धिनो निरूपणीयस्य स्मृतिः, तदनु सङ्ग तिमतोऽपरसम्बन्धिनो जिज्ञासा, तदभिधानम्. तथाच अनुमानस्य व्याप्त्यनुभवप्रयोज्यतया तस्य च प्रत्यक्षप्रमाणाधीन तया प्रत्यक्षानुमानयोरुपजीव्योपजीवकत्वयोर्वर्तमानतया तादृ शोपजीव्योपजीवकत्वसङ्गतौ लक्षणसमन्वयः प्रदर्श्यते. अनन्त राभिधानं नाम अनन्तरोक्तस्यानुमानस्य निरूपणं, तत्प्रयोजकी भूता या जिज्ञासा प्रत्यक्षप्रमाणनिरूपणानन्तरं अनुमानप्रमाण निरूपणं भूयादिति जिज्ञासा, तादृशजिज्ञासाजनकं यत्स्मरणं अनुमानस्मरणं, तत्प्रयोजको निरूप्यनिष्ठो यस्सम्बन्धः उपजी व्योपजीवकत्वरूपस्सम्बन्धः, तत्सम्बन्धत्वमुपजीव्योपजीवकभा वरूपसङ्गतौ वर्तत इति समन्वयः ॥ क. ३०

स प्रसङ्ग उपोद्घातः हेतुताऽवसरस्तथा, निर्वाहकैक्यकार्यैक्ये. षोढा सङ्गतिरिष्यते इति सङ्गतिनिरूपणादिग्रन्थेषि श्लोकेन तत्र स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः. स्मृतिप्रयोजकं च सारूप्यवैरू प्यादि. स्वज्ञानजनकज्ञानविषयत्वं उपोद्घातः. उपजीव्योपजीव कभावो हेतुता. उपजीव्यतान्युपजीव्यं, प्रयोजकमित्यर्थः. उप जीवतीत्युपजीवकं. प्रयोज्यमित्यर्थः, प्रतिबन्धकीभूतशिष्यजि ज्ञासानिवृत्त्युत्तरकालिनावश्यवक्तव्यत्वं अवसरः, स्वकारणज न्यत्वं निर्वाहकैक्यं, एतत्फलयोस्सङ्गतिरिति बोध्यं. स्वकार्यज नकत्वं कार्यैक्यं, एतत्कारणयोस्सङ्गतिरिति बोध्यं, अन्यास्सङ्ग

नयः फलकारणयोरुभयोरपि स्थलभेदेन सम्भवन्तीति बोध्यं। बहुप्रमाणमूलतया बहुवादिसम्मततया च प्रत्यक्षप्रमाणस्य प्रथमतो निरूपणं। प्रत्यक्षप्रमाणस्येन्द्रियरूपतया अनुमानस्य च व्याप्तिज्ञानरूपत्वे इन्द्रियाधीनतया प्रत्यक्षानन्तरमनुमाननिरूपणे उपजीव्योपजीवकभावस्सङ्गतिरिति बोध्यं। अनुमाननिरूपणानन्तरं उपमाननिरूपणेऽवसरसङ्गतिर्बोध्या। फलभूतायाः गवयो गवयपदवाच्य इत्याकारकोपमितेः शक्त्यात्मकवृत्तिज्ञानरूपतया तादृशवृत्तिज्ञानस्य शाब्दबोधप्रयोजकतया उपमितिशाब्दबोधयोः फलयोरेव उपजीव्योपजीवकभावसङ्गतिर्बोध्या॥

शाब्दबोधविचारः

शाब्दबोधो द्विविधः, खण्डशाब्दबोधः अखण्डशाब्दबोधश्चेति, आद्यो घटमानयेत्यत्र घटपदस्य घटोऽर्थः द्वितीयायाः कर्मत्वमर्थः आङ्पूर्वकनयधातोरानयनं अख्यातस्य कृतिश्चार्थः, एवंरूपः खण्डशाब्दबोधः, द्वितीयः घटकर्मकानयनानुकूलकृतिमांश्चैत्र इत्याकारकः, आद्यस्य शाब्दबोधत्वव्यवहारो गौणः, किन्तु शाब्दबोधार्थत्वेन वृत्तिज्ञानस्यैव खण्डबोधत्वव्यवहारः, स च खण्डबोधोन्तेवासिनां शाब्दबुद्धिसौकर्यायभवति, गौणत्वं च शक्तिज्ञानजन्योपस्थितिप्रयोज्यशाब्दबोधीयविषयत्वाभाववत्वम्।

न्यायमते प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधोऽङ्गीक्रियते यथा घटमानयेत्यत्र घटकर्मकानयनानुकूलकृतिमान् चैत्र इति।

वैय्याकरणमते भावप्रधानमाख्यातमिति नियमेन भावार्थमुख्यविशेष्यकबोधोऽङ्गीक्रियते, भावो नाम धात्वर्थः प्रधानं विशेष्यं, यथा तत्रैवचैत्रकर्तृकं घटकर्मकमानयनमिति।

मीमांसकमते चाख्यातार्थमुख्यविशेष्यकबोधोऽङ्गीक्रियते, यथा तत्रैव घटकर्मकानयनानुकूला चैत्रसमवेता कृतिरिति ।

परोक्षमनाहार्यमसन्दिग्धमितिन्यायेन शाब्दबोधस्य परोक्षतया आहार्यज्ञानभिन्नस्संशयभिन्नश्च भवति ।

पुनरपि शाब्दबोधो द्विविधः, लौकिको वैदिकश्चेति, आप्तवाक्यजन्यबोधो लौकिकः, श्रुतिस्मृत्यादिजन्यबोधो वैदिकः ॥

शक्तिज्ञानजन्यशाब्दबोधसामग्री प्रदर्श्यते, प्रथमं पदज्ञानं, तदनु शक्तिज्ञानं, द्वाभ्यामुपस्थितिः, तदनु शाब्दबोधः, यथा घटमानयेत्यत्र प्रथमं घटपदज्ञानं, तदनु अंपदज्ञानं, तदन्वाङ्पूर्वकनयधातुज्ञानं, तदन्वाख्यातज्ञानं । इदं पदज्ञानमुच्यते । तदनु घटपदस्य घटे शक्तिः, अम्पदस्य कर्मत्वे शक्तिः, आङ्पूर्वकनयधातोरानयने शक्तिः, आख्यातस्य कृतौ शक्तिः, इति ज्ञानं शक्तिज्ञानं । तदनु घटपदात् घट इत्युपस्थितिः, अम्पदात्कर्मत्वमित्युपस्थितिः, आङ्पूर्वकनयधातोः आनयनमित्युपस्थितिः, आख्यातात्कृतिरित्युपस्थितिश्च भवति । तदन्वाकांक्षायोग्यतासन्निधितात्पर्यज्ञानादिसामग्रीबलाद्घटकर्मकानयनानुकूलकृतिमांश्चैत्र इत्याकारकः घटकर्मकानयनानुकूलकृतिप्रकारकः चैत्रविशेष्यकश्च बोधो भवति ।

लक्ष्यार्थविषयकशाब्दबोधसामग्री प्रदर्श्यते, प्रथमं पदज्ञानं, तदनु शक्तिज्ञानं, द्वाभ्यां शक्यार्थोपस्थितिः, तदन्वन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा ज्ञानं, तदनु लक्ष्यपदार्थे तात्पर्यज्ञानं, तदनु लक्ष्यपदार्थोपस्थितिः, तदनु लक्ष्यपदार्थविषयकशाब्दबोध

इत्येवं क्रमः। उदाहरणं गङ्गायां घोष इत्यत्र प्रथमं गङ्गापदज्ञानं तदनुसप्तमीविभक्तिज्ञानं, तदनुघोषपदज्ञानं, तदनुगङ्गादिपदानां शक्तिज्ञानानि, तदनु प्रवाहाद्युपस्थितयः, तदनु प्रवाहवृत्तित्वं घोषेऽनुपपन्नमित्यन्वयानुपपत्तिज्ञानं, तदनु गङ्गापदस्य प्रवाहवाचकत्वे तीरेवक्तृतात्पर्यमनुपपन्नमिति तात्पर्यानुपपत्तिज्ञानं, तदनु गङ्गापदं तीरे लाक्षणिकमिति लाक्षणिकत्वज्ञानं, तदनु गङ्गापदात्तीरमित्युपस्थितिः तदन्वाकांक्षादिसामग्रीबलात्तीरवृत्तिर्घोष इति शाब्दबोधः।

लक्षणास्थले कुत्रचिदन्वयानुपपत्तिः लक्षणाबीजं, यथा गङ्गायां घोषः, मंचाः क्रोशन्तीत्यादौ। कुत्रचित्तात्पर्यानुपपत्तिर्लक्षणाबीजं, यथा यष्टीः प्रवेशय, छत्रिणो यान्तीत्यादौ इति केचन वदन्ति। तात्पर्यानुपपत्तेस्सर्वत्रापि सम्भवेन सर्वत्रापि तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति सिद्धान्तः। प्रकरणादिकं तात्पर्यग्राहकं, तच्च प्रकरणं सन्दर्भभेदेन देशकालाद्यन्यतमरूपतां भजते॥

नानार्थकस्थले सैंधवमानयेत्यादावेव तात्पर्यज्ञानस्यावश्यकता, न सर्वत्र शाब्दबोधे तस्यावश्यकतेति केषांचिदाशयः। शाब्दबोधमात्रं प्रति तात्पर्यज्ञानं कारणमिति अन्येषामाशयः॥

एतन्मते शक्तिर्लक्षणाचेति वृत्तिर्द्विविधैव, न व्यंजनावृत्तिरपि तृतीया अभ्युपेयते, यतः शब्दशक्तिमूलव्यंजनावृत्तिश्शक्त्या, अर्थशक्तिमूलव्यंजनावृत्तिरनुमानेन च चरितार्था भवति, यथा, दूरस्था भूधरा रम्या इत्यत्र भूधरपदस्य पर्वतनृपयोस्समाना शक्तिरेवाङ्गीक्रियते, गच्छ गच्छसि चेत्कान्त तत्रैव स्याज्ज

निर्ममेत्यादौ इयं कान्ता भर्तृगमनोत्तरकालिकमरणव्यापारवती एतादृशविलक्षणशब्दप्रयोगकर्तृत्वात् इत्यनुमानेनैवार्थशक्तिमूलव्यंजनया बोध्यस्य मरणरूपार्थस्य बोधनात् वृत्तिर्द्विविधैवेति सिद्धं ॥

अवच्छिन्नानवच्छिन्नविषयताविचारः

अनुल्लिख्यमानजात्यखण्डोपाध्यतिरिक्तधर्माणां स्वरूपतो भाने प्रमाणाभाव इति नियमानुरोधेन उल्लिख्यमानजात्यखण्डोपाधीनां तदतिरिक्तघटपटादिधर्माणां च स्वरूपतः (किञ्चिद्रूपमपुरस्कृत्य) भानं नास्तीति सिद्धं, तथा च पर्वतो वह्निमानित्यत्र जातेरनुल्लेखाद्वह्नित्वस्य स्वरूपत एव भानं न तु वह्नित्वत्वरूपेण भानं, यत्र वह्नित्वविशिष्टवानिति साध्यते तत्र वह्नित्वस्योल्लिख्यमानतया वह्नित्वत्वेन वह्नित्वस्य भानं, वह्नित्वनिष्ठा साध्यतावच्छेदकता वह्नित्वत्वावच्छिन्ना भवतीत्यर्थः, तथा च यत्र जातेरखण्डोपाधेर्वोल्लिखः तत्र जात्यखण्डोपाधिवृत्तिधर्मपुरस्कारेण भानं, यत्र चोल्लेखो नास्ति तत्र स्वरूपत एव भानं, जात्यखण्डोपाध्यतिरिक्तधर्माणां तु सर्वदापि किञ्चिद्रूपेणैव भानं न तु स्वरूपतः इत्यवधेयम ॥

विभक्त्यर्थ विचारः

अस्मिन् शास्त्रे प्रायशः स्वल्पविशेषेषु गुरुभिरुपदिष्टानेव शाब्दबोधप्रकारान् अन्तेवासिनोऽनधीतसंपूर्णशास्त्रा विज्ञातुं वक्तुं वा प्रभवन्ति, न पुनस्स्वातन्त्र्येण निरूपयितुं प्रभवन्ति, अतस्सर्वेषि प्रतिवाक्यमनायासेन यथा वा शाब्दबोधप्रकारं

निर्णेतुं प्रभवेयुः, तथा तदानुरूप्येण सुप्तिङ्विभक्त्यर्थान् अव्ययार्थान् अर्थनिर्णायकाणि मूलसूत्राणि दुरवगाहताभिया परिहाय सुलभया शैल्या यथामति निरूपयितुं प्रयते ।

द्वितीयाविभक्त्यर्थविचारः

द्वितीयाविभक्तेः, निष्ठत्वं, विषयत्वं, विशेष्यत्वं, प्रकारत्वं, प्रतियोगित्वं, निरूपितत्वं, व्यापकत्वं चार्थः ।

निष्ठत्वं, चैत्रो ग्रामं गच्छतीत्यत्र, ग्रामनिष्ठोत्तरदेशसंयोगानुकूलक्रियावान् चैत्र इति बोधः ।

विषयत्वं, घटं जानातीत्यत्र, घटविषयकज्ञानाश्रयश्चैत्र इति बोधः ।

विशेष्यत्वं, पृथिवीं लक्षयतीत्यत्र, पृथिवीविशेष्यकलक्षणप्रकारकज्ञानानुकूलकृतिमान् चैत्र इति बोधः, एवमेव पृथिवीं विभजते पृथिवीं निरूपयतीत्यादावपि बोधः, लक्षधातोः लक्षणप्रकारकज्ञानानुकूलव्यापारोऽर्थः । विपूर्वकभजधातोः परस्परविरुद्धसामान्यधर्मव्याप्यविशेषधर्मप्रकारकज्ञानानुकूलव्यापारोऽर्थः, निपूर्वकरूपधातोः लक्षणस्वरूपविभागप्रामाण्यादिप्रकारकज्ञानानुकूलव्यापारोऽर्थः ।

प्रकारत्वं, पृथिव्या लक्षणमाहेत्यत्र, पृथिवीविशेष्यकलक्षणप्रकारकज्ञानानुकूलव्यापारानुकूलकृतिमान् चैत्र इति बोधः ।

प्रतियोगित्वं, घटं नाशयतीत्यत्र, घटप्रतियोगिकनाशानुकूलव्यापारकर्ता चैत्र इति बोधः ।

निरूपितत्वं, घटं प्रति कारणं दण्ड इत्यादौ घटनिरूपित कारणतावान् दण्ड इति बोधः

व्यापकत्वं, मासमधीते चैत्र इत्यत्र, मासत्वव्यापकाध्ययनकर्ता चैत्र इति बोधः, क्रोशं कुटिला नदीत्यत्र क्रोशत्वव्यापककौटिल्यवती नदीति बोधः, कालाध्वनोरत्यन्तसंयोगे द्वितीयेति सूत्रेण कालाध्ववाचकपदोत्तरवर्तिद्वितीयाया अत्यन्तसंयोगरूपार्थे (व्यापकत्वरूपार्थे) विधानात्।

एवमेव द्वितीयाविभक्त्यर्थेऽन्यत्रापि संदर्भभेदेनार्थो ज्ञेयः॥

तृतीयाविभक्त्यर्थविचारः

तृतीयाविभक्तेः, कर्तृत्वं, करणत्वं, ज्ञानज्ञाप्यत्वं, अभेदः, साहित्यं, प्रतियोगित्वं, निरूपितत्वं, निष्ठत्वं, समवेतत्वं, समानकालिकत्वं, अवच्छिन्नत्वंचार्थः।

कर्तृत्वं, चैत्रेण पच्यते तण्डुल इत्यत्र, चैत्रकर्तृकपचनकर्मीभूतस्तण्डुल इति बोधः

करणत्वं, परशुना छिनत्तीत्यत्र, परशुकरणकच्छेदनकर्ता चैत्र इति बोधः।

ज्ञानज्ञाप्यत्वं, धूमेन वह्निमनुमिनोतीत्यत्र, धूमज्ञानज्ञाप्यवह्निविषयकानुमितिमान् चैत्र इत्याकारको बोधः।

अभेदः, धान्येन धनवानित्यत्र, धान्याभिन्नधनवानयमिति बोधः।

साहित्यं, पुत्रेणागतः पितेत्यत्र, पुत्रागमनसहितागमनकर्ता पितेति बोधः।

प्रतियोगित्वं, रूपेण रहित इत्यत्र, रूपप्रतियोगिकाभाववान् वायुरिति बोधः।

निरूपितत्वं, पुत्रेण सहित इत्यत्र, पुत्रनिरूपितसाहित्यवानयमिति बोधः।

निष्ठत्वं, व्याप्त्या विशिष्टमित्यत्र, व्याप्तिनिष्ठप्रकारतानिरूपकाभिन्नमिति बोधः।

समवेतत्वं, मया क्रियत इत्यत्र, मत्समवेतकृतिविषयोऽयमिति बोधः एवमेव मया ज्ञायत इत्यादावपि।

समानकालिकत्वं, धावता पुरुषेण पीतमित्यत्र, धावनसमानकालिकं पुरुषकर्तृकं पानमिति बोधः।

अवच्छिन्नत्वं, यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वमित्यत्र, यद्विषयकत्वावच्छिन्ना अनुमितिप्रतिबन्धकतेति बोधः॥

एवमेवान्यत्रापि तृतीयाविभक्त्यर्थो ज्ञेयः॥

'चतुर्थीविभक्त्यर्थविचारः'

उद्देश्यत्वं, तृप्तिप्रयोजकत्वं, सम्बन्धत्वं, निष्पत्तिप्रयोजकत्वं, विकारित्वं, वृद्धिप्रयोजकत्वं, आश्रितत्वं, विषयत्वं, स्वापहरणेच्छाप्रयोज्येच्छाविषयत्वं, प्रयोजकत्वं, इच्छाधीनेच्छाविषयत्वं च चतुर्थ्यर्थाः॥

उद्देश्यत्वं, ब्राह्मणाय गां ददातीत्यत्र, ब्राह्मणोद्देश्यकगोकर्मकदानवानयमिति बोधः।

तृप्तिप्रयोजकत्वं, भूतेभ्यो बलिरित्यत्र, भूततृप्तिप्रयोजकीभूतो बलिरिति बोधः।

समवेतत्वं, गवे सुखमित्यत्र, गोसमवेतं सुखमिति बोधः।

निष्पत्तिप्रयोजकत्वं, यूपाय दार्वित्यत्र, यूपनिष्पत्तिप्रयोजकीभूतं दार्विति बोधः।

विकारित्वं, कुण्डलाय प्रापदमित्यत्र, कुण्डलविकारि प्रापदमिति बोधः।

वृद्धिप्रयोजकत्वं, वृक्षायोदकं सिञ्चतीत्यत्र, वृक्षवृद्धिप्रयोजकीभूतसेचनकर्तायमिति बोधः।

आश्रितत्वं, नारदाय रोचते कलह इत्यत्र, नारदाश्रितप्रीतिविषयीभूतः कलह इति बोधः।

विषयत्वं, पुष्पेभ्यः स्पृहयतीत्यत्र, पुष्पविषयेच्छावानयमिति बोधः।

स्वाहरणेच्छाप्रयोज्येच्छाविषयगमनं, एधेभ्यो व्रजतीत्यत्र, इन्धनाहरणेच्छाप्रयोज्येच्छाविषयगमनकर्तायमिति बोधः।

प्रयोजकत्वं, अन्नाय यतत इत्यत्र, अन्नसम्पादनप्रयोजकीभूतयत्नवानयमिति बोधः।

इच्छाधीनेच्छाविषयत्वं, यागाय यातीत्यत्र, यागदर्शनेच्छाधीनेच्छाविषयगमनकर्तायमिति बोधः।

एवमन्यत्रापि चतुर्थ्यर्थो ज्ञेयः॥

* पञ्चमीविभक्त्यर्थविचारः *

अवधिमत्त्वं, प्रतियोगित्वं, जन्यत्वं, स्वकर्तृकोच्चारणाधीनत्वं, निरूपितत्वं, ज्ञानज्ञाप्यत्वं, आरम्भः, पर्यन्तः, तदपेक्षत्वं, इमेपञ्चम्यर्थाः।

अवधिमत्त्वं, वृक्षात्पर्णं पततीत्यत्र, वृक्षावधिकपतनाश्रयं पर्णमिति बोधः॥

प्रतियोगित्वं, घटः पटाद्भिन्नइत्यत्र, पटप्रतियोगिकभेदाश्रयो घट इति बोधः।

जन्यत्वं, दण्डाद्घट इत्यत्र, दण्डजन्यो घट इति बोधः।

निरूपितत्वं, साध्याभाववतोऽवृत्तिरित्यत्र, साध्याभाववन्निरूपितवृत्तित्वाभाववदिति बोधः।

ज्ञानज्ञाप्यत्वं, पर्वतो वह्निमान्धूमादित्यत्र, धूमज्ञानज्ञाप्यवह्निमान्पर्वत इति बोधः।

आरम्भः। आजननादभ्यस्यतीत्यत्र, जननारम्भकाभ्यासकर्तायमिति बोधः, आद्यशरीरप्राणसंयोगो जननं।

पर्यन्तः। आमरणाद्ध्यायतीत्यत्र, मरणपर्यन्तध्यानवानयमिति बोधः, चरमशरीरप्राणसंयोगध्वंसो मरणं।

तत्कर्तृकोच्चारणाधीनत्वं, पण्डितात्पुराणं शृणोतीत्यत्र, पण्डितकर्तृकोच्चारणाधीनश्रवणकर्ता अयमितिबोधः।

तदपेक्षत्वं, अयमस्माद्दीर्घ इत्यत्र, एतदपेक्षदीर्घत्ववानयमिति बोधः।

एवमन्यत्रापि पंचम्यर्था विज्ञेयाः॥

षष्ठीविभक्त्यर्थविचारः

विषयत्वं, विशेष्यत्वं, प्रकारत्वं, प्रतियोगित्वं, निरूपितत्वं, वृत्तिः, स्वामितानिरूपितस्वत्वं, प्रतिपादकत्वं, उच्चरितत्वं, प्रतियोगित्वानुयोगित्वे, अभेदः, कर्तृत्वं, कर्मत्वं, अवयवत्वं, करणत्वं, सम्बन्धत्वं, स्वसमभिव्याहृतपदार्थतावच्छेदकजातिशून्यपदान्तपदार्थव्यावृत्तत्वं च षष्ठ्यर्थाः॥

विषयत्वं, घटस्य ज्ञानमित्यत्र, घटविषयकं ज्ञानमिति बोधः॥

विशेष्यत्वं, घटस्य लक्षणमाहेत्यत्र, घटविशेष्यकलक्षणप्रकारकज्ञानानुकूलव्यापारानुकूलकृतिमानयमिति बोधः॥

प्रकारत्वं, पृथिव्या लक्षणस्य ज्ञानं जनयतीत्यत्र, पृथिवीविशेष्यकलक्षणप्रकारकज्ञानानुकूलव्यापारकर्तायमिति बोधः॥

प्रतियोगित्वं, घटस्य नाशइत्यत्र, घटप्रतियोगिको नाश इति बोधः॥

निरूपितत्वं, घटस्य कारणमित्यत्र, घटनिरूपितकारणतावानयमिति बोधः॥

वृत्तिः, घटस्य रूपमित्यत्र, घटवृत्ति रूपमितिबोधः॥

स्वामितानिरूपितस्वत्वं, राज्ञः पुरुष इत्यत्र, राजनिष्ठस्वामितानिरूपितस्वत्ववानयं पुरुष इति बोधः॥

प्रतिपादकत्वं, रामस्य नामगृहाणेत्यत्र, रामप्रतिपादकनामधेयमाहरेति बोधः॥

उच्चरितत्वं. आप्तस्य वाक्यमित्यत्र, आप्तोच्चरितं वाक्यमिति बोधः ॥

प्रतियोगित्वानुयोगित्वे. भूतलस्य घटस्य च संयोगसम्बन्धः इत्यत्र, भूतलानुयोगिको घटप्रतियोगिकस्संयोग इति बोधः॥

अभेदः. राहोश्शिरः. नाम्नोर्द्वयमित्यादौ क्रमेण राहुभिन्नं शिरः, नामाभिन्नं द्वयमिति बोधः ॥

कर्तृत्वं, चैत्रस्य भोजनमित्यत्र, चैत्रकर्तृकं भोजनमिति बोधः ॥

कर्मत्वं, विश्वस्य रक्षितेत्यत्र, विश्वकर्मकरक्षणकर्तेति बोधः॥

अवयवत्वं, चैत्रस्य हस्त इत्यत्र, चैत्रावयवो हस्त इति बोधः ॥

करणत्वं, नाग्निस्तृप्यति काष्ठानां न पुंसां वामलोचनेत्यादौ, काष्ठकरणकतृप्त्यभाववानग्निः, पुरुषकरणकतृप्त्यभाववती वामलोचनेति बोधो क्रमेण ज्ञेयौ ॥

समवेतत्वं, घटस्य रूपमित्यत्र, घटसमवेतं रूपमिति बोधः॥

स्वसमभिव्याहृतपदार्थतावच्छेदकजातिशून्यपष्ठ्यन्तपदार्थव्यावृत्तत्वं, नराणां क्षत्रियश्शूर इत्यत्र, क्षत्रियत्वशून्यनरव्यावृत्तशूरत्ववान् क्षत्रिय इति बोधः ॥

शेषे षष्ठीति सूत्रेणेतरविभक्तिभिरनिर्दिष्टेष्वर्थेषु षष्ठीविधानात् शतं षष्ठ्यर्था इति प्राचीनवचनाच्च षष्ठीविभक्त्यर्थानामनन्तत्वं. एवमन्यत्रापि सन्दर्भभेदेन षष्ठ्यर्था विज्ञेयाः ॥

* सप्तमविभक्त्यर्थविचारः *

आधेयत्वं, विषयत्वं, विशेष्यत्वं, निरूपितत्वं, व्यापकत्वं, अभेदः, अवच्छेद्यत्वं, घटकत्वं, प्रतिपाद्यत्वं, प्रकारत्वं, सामानाधिकरण्यरूपवैशिष्ट्यं, समानकालिकत्वं, पूर्वकालिकत्वं, उत्तरकालिकत्वं, अनुयोगित्वं, प्रतियोगित्वं, स्वविषयकेच्छाधीनत्वं, स्वसमभिव्याहृतपदार्थतावच्छेदकजातिशून्यसप्तम्यन्तप... व्यावृत्तत्वं, कार्यकारणभावः, एते सप्तम्यर्था भवन्ति ॥

आधेयत्वं, भूतले घट इत्यत्र, भूतलवृत्तिर्घट इति बोधः ॥

विषयत्वं, कान्तायां रतिः, सर्पे द्वेष इत्यादौ कान्ताविषयिणी रतिः, सर्पविषयको द्वेष इति बोधौ भवतः ॥

विशेष्यत्वं, पर्वते वह्निमनुमिनोमीत्यत्र, पर्वतविशेष्यकवह्निविधेयकानुमितिमानहमिति बोधः ॥

निरूपितत्वं, भूतले वर्तते घट इत्यत्र, भूतलान्वितवृत्तितावान्घटइति बोधः ॥

व्यापकत्वं, दिने दिने पठतीत्यत्र, दिनत्वव्यापकदिनानुकूलकृतिमानयमिति बोधः ॥

अभेदः, शिवे भागवत इत्यत्र, शिवाभिन्नभगवद्विषयकभक्तिमानयमिति बोधः ॥

अवच्छेद्यत्वं, अग्रे वृक्षः कपिसंयोगीत्यत्र, अग्रावच्छिन्नकपिसंयोगवान् वृक्ष इति बोधः ॥

घटकत्वं, वने वृक्षः, सूत्रे पदमित्यादौ, वनघटकीभूतो वृक्षः, सूत्रघटकं पदमिति बोधौ भवतः ॥

प्रतिपाद्यत्वं, शास्त्रे विषय इत्यत्र, शास्त्रप्रतिपाद्यो विषय इति बोधः ॥

प्रकारत्वं, पर्वते वह्नौ सन्दिहान इत्यत्र, पर्वतविशेष्यकवह्निप्रकारकसन्देहवानयमिति बोधः ॥

सामानाधिकरण्यरूपवैशिष्ट्यं, द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुण इत्यत्र, द्रव्यकर्मभिन्नत्वविशिष्टसामान्यवान् गुण इति बोधः ॥

समानकालिकत्वं, वित्ते नष्टे वितरणमहो कर्तुमिच्छन्ति मूढा इत्यत्र, वित्तनाशकालिकवितरणचिकीर्षावन्तोमूढा इति बोधः, पितरि समायाति पुत्रः पाठशालां गत इत्यत्राप्येवमेव ॥

पूर्वकालिकत्वं, पितरि गमिष्यति गत इत्यत्र, पितृगमनपूर्वकालिकगमनकर्तायमिति बोधः ॥

उत्तरकालिकत्वं, पितरि गते गत इत्यत्र, पितृगमनोत्तरकालिकगमनकर्ता पुत्र इति बोधः ॥

अनुयोगित्वं, भूतले घटसंयोग इत्यत्र, भूतलानुयोगिको घटसंयोग इति बोधः ॥

प्रतियोगित्वं, भूतलसंयोगो घट इत्यत्र, भूतलानुयोगिकः घटप्रतियोगिकः संयोग इति बोधः ॥

स्वविषयकेच्छाधीनत्वं, चर्माणि द्वीपिनं हन्तीत्यत्र चर्मविषयकेच्छाधीनद्वीपिहननकर्तायमिति बोधः ॥

स्वसमभिव्याहृतपदार्थतावच्छेदकजातिशून्यसप्तम्यन्तपदा

र्थव्यावृत्तत्वं, नरेषु क्षत्रियश्शूर इत्यादौ, क्षत्रियत्वशून्यनरव्यावृत्तशूरत्ववान् क्षत्रिय इति बोधः ॥

कार्यकारणभावः, पयःपाने तृषा शाम्यतीत्यत्र, पयःपानं जन्यतृषाशान्तिमानयमिति बोधः ॥

एवमेवान्यत्रापि सन्दर्भभेदेन सप्तम्यर्था निर्णेयाः ॥

अव्ययार्थविचारः

इववद्वायथादिपदानां सादृश्यमर्थः, चन्द्र इव मुखमित्यत्र सादृश्यस्य साधारणधर्मतोऽतिरिक्तताबादिमते चन्द्रस्येवशब्दार्थीभूतसादृश्ये निरूपितत्वसम्बन्धेन सादृश्यस्यचाह्लादकमित्यत्राह्लादकपदार्थैकदेशीभूताह्लादकत्वे प्रयोजकत्वसम्बन्धेनान्वये चन्द्रनिरूपितसादृश्यप्रयोजकाह्लादकत्ववन्मुखमिति बोधः ॥

आह्लादकपदाभावे चन्द्रवन्मुखमित्यादौ चन्द्रनिरूपितसादृश्यवन्मुखमिति बोधः । अह्लादकत्वेन चन्द्रवन्मुखमित्यादावाह्लादकत्वप्रयोज्यचन्द्रनिरूपितसादृश्यवन्मुखमिति बोधः । चन्द्रमुखी बालेत्यादौ चन्द्रपदस्य चन्द्रसादृश्यविशिष्टार्थकत्वे चन्द्रनिरूपितसादृश्यविशिष्टाभिन्नमुखविशिष्टा बालेति बोधः । चन्द्राह्लादकंमुखमित्यादौ चन्द्रपदस्य चन्द्रनिरूपितसादृश्यप्रयोजकार्थकत्वे चन्द्रनिरूपितसादृश्यप्रयोजकाभिन्नाह्लादकत्ववन्मुखमिति बोधः । चन्द्रवद्भातिमुखमित्यादौ भाधातोः ज्ञानार्थकत्वेन तदुत्तरवर्त्याख्यातस्य विषयत्वार्थकत्वेन वच्छब्दार्थसादृश्यस्य प्रकारतानिरूपकत्वसम्बन्धेन ज्ञानेऽन्वये चन्द्रनिरूपितसादृश्यप्रकारकज्ञानविषयो मुखमिति बोधः, चन्द्रवदाह्लादकं भातिमुख

मित्यत्र चन्द्रनिरूपितसादृश्यप्रयोजकाह्लादकत्वप्रकारकज्ञानविषयो मुखमिति बोधः। सादृश्यस्य साधारणधर्मतोऽनतिरिक्ततावादिमते प्रयोजकत्वस्थानेऽभेदो ज्ञेयः। एकदेशान्वयानङ्गीकारे चन्द्रवदाह्लादकं मुखमित्यादावाह्लादकपदस्यैव चन्द्रनिरूपितसादृश्यप्रयोजकाह्लादकत्वविशिष्टार्थकत्वं, अन्यस्य तात्पर्यग्राहकत्वं चाङ्गीकार्यं, इवादिशब्दसमभिव्याहारदशायामेवंक्रमेण शाब्दबोधा विज्ञेयाः॥

इत्युवाच नृपं विप्र इत्यादावितिशब्दस्य पूर्वोक्तवाक्यार्थ एवार्थः, अस्य च वचि धात्वर्थैकदेशीभूतज्ञाने विषयत्वसम्बन्धेनान्वयः, तथा च पूर्वोक्तवाक्यार्थविषयकज्ञानजनकशब्दप्रयोगकर्ता विप्र इति बोधः, इत्थमेवमादीनामेवमेवार्थो ज्ञेयः। स्थाणुः पुरुष इति ज्ञात इत्यत्रेतिशब्दस्य प्रकारतानिरूपकत्वमर्थः, पुरुषपदं च पुरुषत्वार्थकं, तथा च पुरुषत्वप्रकारकज्ञानविषयः स्थाणुरिति बोधः। ब्राह्मण इति नमस्करोतीत्यत्रेतिशब्दस्य स्वसमभिव्याहृतपदार्थतावच्छेदकप्रकारकज्ञानहेतुकत्वमर्थः, तथा च ब्राह्मणत्वज्ञानहेतुकनमस्कारकर्ताऽयमिति शाब्दबोधः। तमाल इति वृक्ष इत्यादावितिशब्दस्याभेदोऽर्थः, तथा च तमालाभिन्नो वृक्ष इति बोधः। ग्रन्थान्तेवर्तमानस्येतिशब्दस्य समाप्त्यार्थकत्वेन ग्रन्थस्समाप्त इति बोधः। किंपदसमभिव्याहृतेतिशब्दस्य जिज्ञासाविषयहेतुकत्वमर्थः, तथा च किमिति भगवन्तं भजत इत्यादौ जिज्ञासाविषयहेतुकभगवद्विषयकभक्तिमानयमिति बोधः। इतिशब्दस्य क्वचिच्छब्दस्वरूपमप्यर्थः, यथा, गवित्याहेत्यत्र गोशब्दस्वरूपाभिन्नज्ञानानुकूलव्यापारानुकूलकृतिमानयमितिबोधः॥

दृष्ट्वा गत इत्यादौ क्त्वाप्रत्ययान्ताव्ययानामुत्तरकालीनत्व मर्थः, तथा च दर्शनोत्तरकालिकगमनाश्रयोयमिति बोधः, .वि लोक्य प्रविश्येत्यादिल्यबन्तानामप्येवमेवोत्तरकालीनत्वमर्थः, शाब्दबोधः पूर्ववदेव, तथा च ल्यप्प्रत्ययान्तप ्र्थस्य क्त्वाप्रत्यया न्तपदार्थस्य च क्रियासामानाधिकरण्यं क्रियापूर्वभावित्वंचावश्य कम्। द्रष्टुं गत इत्यादितुमुन्नन्ताव्ययस्थले तुमुन्प्रत्ययस्येच्छा प्रयोज्यत्वं इच्छाधीनेच्छाविषयत्वं वा अर्थः. तथा च दर्शनेच्छा प्रयोज्यगमनकर्तायमिति बोधः॥

सम्यक्पठतीत्यादौ सम्यक्पदार्थश्श्रद्धापूर्वकत्वरूपः, तथा च श्रद्धापूर्वकत्वविशिष्टपठनकर्तायमिति बोधः,। सम्यक्स्वपिती त्यादौ जाग्रत्ज्ञानाभावसामानाधिकरण्यंचास्ययक्पदार्थः, तथा च जाग्रत्ज्ञानाभावसमानाधिकरणस्वापकर्तायमिति बोधः॥

सम्यक्फलतीत्यत्र सम्पूर्णत्वं, सम्यङ्नमस्करोतीत्यत्र भ क्तिपूर्वकत्वं, सम्यक्पश्यति कान्तामित्यादावनुरागपूर्वकत्वं,सम्य क्ताडयतीत्यादौ दयाराहित्यपूर्वकत्वं च सम्यक्पदार्थः, एवं स्थल भेदेन सम्यक्पदार्थो ज्ञेयः॥

* क्रियाविशेषणस्थले शाब्दबोधविचारः *

स्तोकं पचतीत्यादौ स्तोकपदार्थस्याल्पस्य पच्धात्वर्थीभूत पाके ऽभेदसम्बन्धेनान्वये ऽल्पाभिन्नपाकानुकूलकृतिमानयमिति बोधः सुखं शेते इत्यादौ सुखपदस्य सुखजनके लक्षणा, तथा च सुखजनकाभिन्नशयनकर्तायमिति बोधः। मधुरं रौति पिक इत्यादौ मधुराभिन्नकूजनकर्ता पिक इति बोधः॥

* जगदाविर्भावविषये मतभेदाः *

केचन आरम्भवादिनः, केचन परिणामवादिनः, तत्रचारम्भवादिनो नैय्यायिकाः, परिणामवादिनःसांख्याः, तत्रचारम्भवादिनः घटादिरूपावयविनः कपालाद्युपादानकारणैर्जन्यन्ते न तु कपालादय एव घटाद्यात्मना परिणमन्ति. अतः कपालादिभ्यो भिद्यन्ते घटादय इति वदन्ति। परिणामवादिनस्तु मृदाद्युपादानपरिणामा एव घटाद्यवयविनः, नतूपादानेभ्यो भिद्यन्तेऽवयविनः इति वदन्ति ॥

एवं नैय्यायिका असत्कार्यवादिनः, सांख्यादयस्तु सत्कार्यवादिनः, स्वोत्पत्तेः पूर्वं घटादिकार्यमसदेव कपालादिकारणैर्जन्यते इत्यसत्कार्यवादिनामाशयः। मृदाद्युपादानेषु संस्कारात्मना (सूक्ष्मरूपेण) स्वोत्पत्तेः पूर्वं वर्तमानमेव घटादिकार्यमाविर्भवतीति सत्कार्यवादिनामाशयः॥

* प्रत्यक्षादिप्रमाणैः पदार्थसिद्धिविचारः *

त्र्यणुकादिघटपर्यन्तानामवयविरूपाणां पृथिव्यप्तेजसां सिद्धिश्चक्षूरूपेण त्वग्रूपेण च प्रत्यक्षप्रमाणेन सम्भवति, बाह्यद्रव्यप्रत्यक्षे त्वक्चक्षुषोः कारणत्वात्, परमाणुरूपाणां द्व्यणुकरूपाणां च पृथिव्यप्तेजसां सिद्धिस्त्वनुमानप्रमाणेनैव भवति, तथाहि, जालसूर्यमरीचिस्थं सूक्ष्मतममुपलब्धिविषयीभूतं रजः सावयवं चाक्षुषद्रव्यत्वादित्यनुमानेन त्र्यणुकसिद्धिः, त्र्यणुकावयवोपि सावयवः महदारम्भकत्वात्तंतुवदित्यनुमानेन परमाणुसिद्धिः ॥

रूपवद्द्रव्यासमवेतस्स्पर्शः क्वचिदाश्रितः स्पर्शत्वात् पृथिवीसमवेतस्पर्शवत्। असति रूपवद्द्रव्याभिघाते पर्णादिषु योऽयं शब्दसन्तानः स स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः अविभज्यमानावयवद्रव्यसम्बन्धिशब्दसन्तानत्वात् दण्डाभिहतभेरीशब्दसन्तानवत्। नभसि तृणतूलस्तनयित्नुचीयमानानां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगहेतुका अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत्। रूपवद्द्रव्याभिघातमन्तरेण तृणे कर्म स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विजातीयकर्मत्वात् नदपराहतकाशादिकर्मवत् इत्याद्यनुमानैर्वायोस्सिद्धिर्द्रष्टव्या ॥

सुवर्णं तैजसं प्रतिबन्धकाभावविशिष्टात्यन्तानलसंयोगसमानकालीनानुच्छिद्यमानद्रवत्वाधिकरणत्वात् यन्नैवं तन्नैवं यथा घट इत्यनुमानेन सुवर्णस्य तैजसत्वसिद्धिः ॥

घ्राणेन्द्रियं पार्थिवं गन्धेतराव्यञ्जकत्वे सति गन्धव्यञ्जकत्वे सति द्रव्यत्वात् कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत् इत्यनुमानेन घ्राणेन्द्रियस्य पार्थिवत्वं सिद्ध्यति ॥ रसनेन्द्रियं जलीयं गन्धाव्यञ्जकत्वे सति रसव्यञ्जकत्वे सति द्रव्यत्वात् सक्तुरसाभिव्यञ्जकोदकवत् इत्यनुमानेन रसनेन्द्रियस्य जलीयत्वं सिद्ध्यति ॥ चक्षुः तैजसं परकीयस्पर्शाव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वे सति द्रव्यत्वादित्यनुमानेन चक्षुषस्तैजसत्वसिद्धिः ॥

त्वगिन्द्रियं वायवीयं रूपाद्यव्यञ्जकत्वे सति स्पर्शव्यञ्जकत्वे सति द्रव्यत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकपवनवदि

त्यनुमानेन त्वगिन्द्रियस्य वायवीयत्वं सिद्ध्यति। पार्थिवपरमाण्वादिषु मणिचन्द्रकान्तिसूर्यकान्तिप्रभृतिषु च पृथिवीत्वादिहेतुभिः गन्धादिसिद्धिर्द्रष्टव्या॥

शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादित्यनुमानेन शब्दस्य पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं सिद्ध्यति। शब्दो द्रव्यसमवेतः गुणत्वात् संयोगवदित्यनुमानेन शब्दसमवायितयाऽकाशसिद्धिः। शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षविषयत्वात् सुखवत्, पाकजरूपादौ व्यभिचारवारणाय सत्यन्तं, पटरूपादौ व्यभिचारवारणाय विशेष्यं, जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति. अनेनचानुमानेन पृथिव्यादिचतुष्ट्ये शब्दाश्रयत्वाभावस्सिद्ध्यति, शब्दो न दिक्कालमनसां गुणः विशेषगुणत्वात्, शब्दो नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् इत्यनुमानद्वयेन कालादिचतुष्ट्ये शब्दाभावस्सिद्ध्यति, शब्दो विशेषगुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्वात् स्पर्शवत् इत्यनुमानेन शब्दे विशेषगुणत्वं सिद्ध्यति, अतः पूर्वानुमानेन शब्दसमवायितया प्रतीयमानं द्रव्यमाकाशमेवेति सिद्धम्॥

कालिकपरत्वापरत्वे सासमवायिकारणे (असमवायिकारणजन्ये) जन्यगुणत्वादित्यनुमानेन कालिकपरत्वापरत्वासमवायिकारणीभूतकालपिन्डसंयोगाश्रयत्वेन कालसिद्धिः॥

दिक्कृतपरत्वापरत्वे सासमवायिकारणे जन्यगुणत्वात् रूपवदित्यनुमानेन तदुभयासमवायिकारणीभूतदिक्पिण्डसंयोगाश्रयतया दिक्सिद्धिर्द्रष्टव्या॥ घटाकाशो मठाकाशः अतीतकालः अनागतकालः प्राची प्रतीचीत्यादिव्यवहाराणामाकाशकालदिशामनेकत्वभासकानां घटपटादिरूपोपाधिनिमित्तकत्वेन वास्तविकानेकत्वमाकाशकालदिशां नास्त्येवेति बोध्यम्॥

अहं सुखी अहं दुःखी इत्यादिप्रतीतिविषयीभूताहंपदार्थस्यैव जीवात्मतया मनोरूपप्रत्यक्षप्रमाणेन शरीरेन्द्रियाणि कर्तृजन्यकार्यजनकानि करणत्वात्कुठारादिवदित्यनुमानेन च जीवात्मसिद्धिर्द्रष्टव्या। परदेहादौ चेष्टा प्रयत्नसाध्या चेष्टात्वात् मदीयचेष्टावदित्यनुमानेन चेष्टासाधनप्रयत्नाश्रयत्वेन परजीवात्मासिद्धिर्द्रष्टव्या॥

क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद्घटवदित्यनुमानेन क्षित्यङ्कुरादिकर्तृतया यस्सर्वज्ञस्ससर्वविन् विश्वस्य कर्ता भुवनस्य गोप्तेत्यादिशब्दप्रमाणेनचेश्वरसिद्धिः॥

सुखादिसाक्षात्कारः सासमवायिकारणः जन्यगुणत्वादित्यनुमानेन सुखादिसाक्षात्कारासमवायिकारणात्ममनस्संयोगाश्रयत्वेन मनसस्सिद्धिः, अमुमेवार्थं आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षमुत्पद्यत इति न्यायसूचयति॥

एवं द्रव्यसिद्धिर्निरूपिता॥

इदानीं गुणसिद्धिः निरूप्यते। त्र्यणुकाद्यवयविगतरूपादिचतुष्टयस्य त्वक्चक्षूरूपप्रत्यक्षप्रमाणेनैव सिद्धिः। त्र्यणुकगतरूपादिचतुष्टयं सासमवायिकारणं जन्यगुणत्वात् इत्यनुमानेन त्र्यणुकरूपादिचतुष्टयासमवायिकारणीभूतद्व्यणुकगतरूपादिचतुष्टयसिद्धिः। द्व्यणुकगतरूपादिचतुष्टयं सासमवायिकारणं जन्यगुणत्वादित्यनुमानेन परमाणुगतरूपादिचतुष्टयस्य सिद्धिरवगन्तव्या॥

त्र्यणुकादिषु वर्तमाना एकत्वद्वित्वादिसंख्या कुत्रचित्त्वचा कुत्रचिच्चक्षुषा च अयमेक इमौ द्वौ इति प्रत्यक्षप्रतीतितो गृह्यते। त्र्यणुकगतपरिमाणं सासमवायिकारणं जन्यपरिमाणत्वात् द्व्यणुकगतपरिमाणं सासमवायिकारणं जन्यपरिमाणत्वादित्यनुमानद्वयेन द्व्यणुकगतत्रित्वसंख्यायाः परमाणुगतद्वित्वसंख्यायाश्च सिद्धिः। अथवा अ...दार्थेष्वेकत्वादिपरार्धपर्यंतायास्संख्याया श्शाब्दप्रमाणेनैव सि...द्धिरवगंतव्या॥

द्व्यणुकादिघटपर्यन्तेष्ववयविषु परिमाणं चक्षुरादिप्रत्यक्षप्रमाणेन गृह्यते, त्र्यणुकपरिमाणं सासमवायिकारणं जन्यगुणत्वात् रूपवत्, द्व्यणुकपरिमाणं सासमवायिकारणं जन्यगुणत्वात् इत्यनुमानद्वयेन द्व्यणुकगतस्यपरमाणुगतस्यचाणुपरिमाणस्य सिद्धिर्नैकथमपि निरूपयितुं शक्या, पारिमाण्डल्यभिन्नानां कारणत्वस्य साधर्म्यत्वमुपपादयता विश्वनाथपञ्चाननभट्टाचार्येण परिमाणमात्रस्य स्वसमानजातीयस्वोत्कृष्टपरिमाणजनकत्वमित्यादियुक्तिभिः अणुपरिमाणे कारणत्वस्य निराकृतत्वात्,

नच त्र्यणुकपरिमाणस्य महत्त्वरूपतया द्व्यणुकपरिमाणस्याणु त्वरूपतया द्वयोरसजातीयत्वाभावेन परिमाणमात्रस्येतिनियमेन द्व्यणुकपरिमाणस्य त्र्यणुकपरिमाणजनकत्वासम्भवेन त्र्यणुक परिमाणं स्वासमवायिकारणमित्यनुमानेन द्व्यणुकपरिमाणासि द्ध्यभावेऽपि द्व्यणुकपरमाणुपरिमाणयोरणुत्वरूपतया साजात्येन द्व्यणुकपरिमाणं स्वासमवायिकारणमित्यनुमानतः परमाणुपरि माणं सिद्ध्यतीतिवाच्यं, अपकृष्टमहत्त्वंप्रत्यनेकद्रव्यवत्त्वस्य (समवे तसमवेतवृत्तिद्रव्यत्वस्य) प्रयोजकत्वात् त्र्यणुकपरिमाणं प्रति अनेकद्रव्यवत्त्वस्यैव प्रयोजकत्वाङ्गीकारेण त्र्यणुकपरिमाणं स्वास मवायिकारणमित्यनुमानेन त्र्यणुकपरिमाणकारणत्वेन द्व्यणुक परिमाणस्यैवासिद्धतया तदसमवायिकारणत्वेन परमाणुपरिमा णस्यासिद्धेः दुर्निरूपत्वात्, नचपरमाणुद्व्यणुकयोः परिच्छिन्नप रिमाणवत्त्वरूपमूर्तत्वव्यवहारान्यथानुपपत्त्या पारिशेष्यादुभयत्रा ण्यणुपरिमाणं सिद्ध्यतीति वाच्यं, क्रियाश्रयत्वरूपमूर्तत्वेनापि मूर्तत्वव्यवहारोपपत्तेः तत्र परिमाणानङ्गीकारेऽपि बाधकाभावात्, नच परमाण्वन्तरोत्पादकत्वरूपप्रयोजनाभावेऽपि विभुपदार्थेषु परिमाणमिव परमाणुद्व्यणुकयोरप्यणुपरिमाणमङ्गीक्रियते इति वाच्यं, सर्वत्र शब्दोपलब्ध्यन्यथानुपपत्त्या गगने सर्वत्रेदानींघट स्तदानींघटइत्यादिप्रत्यक्षप्रतीत्यन्यथानुपपत्त्या काले सर्वत्रायम्प्रा च्योऽयम्प्रतीच्यइत्यादिप्रत्यक्षप्रतीत्यन्यथानुपपत्त्या दिशि च पर ममहत्परिमाणस्याङ्गीकृतत्वेन गगनादिविभुषु विद्यमानस्य परिमाण स्य किञ्चिदुत्पादकत्वरूपप्रयोजनाभावेऽपि प्रयोजनान्तरवत्त्वेन द्व्यणुकादिपरिमाणस्येव निष्प्रयोजनत्वाभावात्, नच गगनादि

त्विके महत्वाङ्गीकरणे निरुक्तप्रयोजनसत्वेपि आत्मनि परिमाणा ङ्गीकारे न किञ्चिदपि प्रयोजनमिति वाच्यं, जीवात्मनि मध्यम परिमाणाङ्गीकारे यन्मध्यमपरिमाणवत्तदनित्यमितिव्याप्त्या अ नित्यत्वप्रसङ्गेन अणुपरिमाणाङ्गीकारे सर्वशरीरावच्छेदेन सुखा द्युपलब्ध्यसम्भवप्रसङ्गेन तत्र महत्वपरिमाणस्यैवानङ्गीकारे प्रत्य क्षेमहत्वस्यकारणत्वेनात्मतद्गतसुखादिप्रत्यक्षानुपपत्त्या च जीवा त्मनि परममहत्परिमाणस्य अङ्गीकरणीयत्वेन सर्वजगत्कारणत्वा न्यथानुपपत्त्या परमात्मनि च विभुपरिमाणस्यावश्यमङ्गीकरणी यत्वेनात्मपरिमाणस्यापि सप्रयोजनत्वात्, निष्प्रयोजनत्वेन द्व्य णुकपरमाणुपरिमाणयोः एव सिद्धिर्नसम्भवतीति न वाच्यं, द्व्य णुकं परमाणुर्वा परिमाणवान् द्रव्यत्वादित्यनुमानेन तयोरपि परि माणस्याङ्गीकृतत्वात्, नच परमाण्वादावपि द्रव्यत्वसाम्येन घटा दाविव कुतो न महत्वपरिमाणमङ्गीक्रियत इति वाच्यं, तदङ्गीकारे तयोः प्रत्यक्षत्वापत्तेः, अपकृष्टमहत्वप्रयोजकस्यानेकद्रव्यत्वस्याभा वेन च तत्र महत्वस्यानङ्गीकरणीयत्वात्, नच द्व्यणुकं सपरिमाणं द्रव्यत्वादित्यनुमानेन द्व्यणुके परिमाणसिद्धौ द्व्यणुकपरिमाणं सासमवायिकारणं जन्यगुणत्वादित्यनुमानेन कुतो न परमा णुपरिमाणस्य सिद्धिरिति वाच्यं, द्व्यणुकपरिमाणस्य परमाणुप रिमाणजन्यत्वे परिमाणमात्रस्येतिनियमानुसारेण द्व्यणुकपरि माणस्य परमाणुपरिमाणत उत्कर्षावश्यंभावेन परमाणुतो द्व्य णुकस्याणुतरत्व प्रसंगात्, नच निरुक्तानुमानाभ्यां द्व्यणुकपरमा ण्वोरणुपरिमाणसिद्धावपि तत्परिमाणाङ्गीकारेण न किमपि प्रयोजनमस्तीति,वाच्यं, यत्र द्रव्यत्वं तत्र परिमाणमिति व्याप्य

व्यापकभावभङ्गवारणस्यैव प्रयोजनत्वात्, तथाच परमाणुः सपरिमाणः द्रव्यत्वाद्धटवत्, द्व्यणुकं सपरिमाणं द्रव्यत्वाद्धटवदित्यनुमानाभ्यां द्व्यणुकपरमाण्वोरपि परिमाणसिद्धिर्द्रष्टव्या ॥

त्र्यणुकादिघटपर्यन्तेष्ववयविषु अयमस्मात्पृथगिति प्रात्यक्षिकव्यवहारेण पृथक्त्वसिद्धिः । पृथक्त्वद्रव्यानुयोगिकभेदयोस्समनैयत्येन अयं परमाणुः इतरभिन्नः एतद्विशेषादित्याद्यनुमानैः परमाण्वादिष्वितरभेदसिद्धौ अयं परमाणुः स्वतरेभ्यः पृथक् पृथक्त्वसमनियतद्रव्यानुयोगिकभेदाश्रयत्वात् इत्याद्यनुमानैः परमाणुष्वपि पृथक्त्वसिद्धिः, द्व्यणुकेष्वेवमेवपृथक्त्वसिद्धिर्द्रष्टव्या । त्र्यणुकादिपृथक्त्वं सासमवायिकारणं जन्यगुणत्वादित्यनुमानेन वा परमाण्वादिषु पृथक्त्वसिद्धिर्द्रष्टव्या ॥

त्र्यणुकादिषु इमौसंयुक्ताविति प्रत्यक्षेणसंयोगसिद्धिः । त्र्यणुकं सासमवायिकारणं जन्यद्रव्यत्वात्, द्व्यणुकं [illegible] समवायिकारणं जन्यद्रव्यत्वादित्यनुमानद्वयेन द्व्यणु[illegible]संयोग[illegible] [illegible]रमाणुसंयोगस्य च सिद्धिर्द्रष्टव्या ॥

त्र्यणुकादिषु इमौविभक्ताविति व्यवहारेण प्रत्यक्षसिद्धेन विभागसिद्धिः । द्व्यणुकं द्व्यणुकान्तरात् विभक्तं त्र्यणुकनाशवत्वात् ध्वंसप्रागभावयोस्स्वप्रतियोगिसमवायिदेशवृत्तित्वनियमेन न स्वरूपासिद्धिः, अनेन च अनुमानेन द्व्यणुकद्वयविभागस्सिध्यति, द्व्यणुकं नाशप्रतियोगि जन्यभावत्वादित्यनुमानेन द्व्यणुकनाशसिद्धौ परमाणुः परमाण्वन्तराद्विभक्तः द्व्यणुकनाशवत्वादित्यनुमानेन परमाणुद्वयविभागस्सिध्यति ॥

त्र्यणुकादिषु अयं परः अयं अपर इति व्यवहारात्परत्वापरत्वयोस्सिद्धिः। त्र्यणुकपरत्वापरत्वे सासमवायिकारणे जन्यगुणत्वात् द्व्यणुकपरत्वापरत्वे सासमवायिकारणे जन्यगुणत्वादित्यनुमानाभ्यां द्व्यणुकपरमाणुगतयोः परत्वापरत्वयोः सिद्धिर्द्रष्टव्या॥

त्र्यणुकादिषु अयं गुरुत्ववान् आद्यपतनवत्त्वादित्याद्यनुमानेन गुरुत्वसिद्धिः। त्र्यणुकादिगुरुत्वं सासमवायिकारणं जन्यगुणत्वादित्यनुमानप्रमाणेन द्व्यणुकपरमाण्वोरपि गुरुत्वसिद्धिर्द्रष्टव्या॥

त्र्यणुकादिषु इदं द्रवं इति प्रतीत्या द्रवत्वसिद्धिः. त्र्यणुकनिष्ठं द्व्यणुकनिष्ठं वा द्रवत्वं सासमवायिकारणं जन्यगुणत्वात् इत्यनुमानतः [illegible]कपर[illegible]ण्वोरपि द्रवत्वसिद्धिः॥

त्र्य[illegible]ण्यपि इदं स्नेहवत् पिण्डीभावजनकत्वादित्यनुमानेन स्नेहसिद्धिः। त्र्यणुकादिस्नेहः सासमवायिकारणः जन्यगुणत्वादित्याद्यनुमानेन द्व्यणुकपरमाण्वोरपि स्नेहसिद्धिः॥

अयं ध्वन्यात्मकश्शब्दः अयं वर्णात्मकश्शब्दः इति व्यवहारेण श्रोत्रेन्द्रियरूपप्रत्यक्षप्रमाणसिद्धेन श्रोत्रदेशोत्पन्नशब्दस्य सिद्धिः, अयं शब्दःसासमवायिकारणः जन्यगुणत्वादित्याद्यनुमानैः उत्तरोत्तरशब्दासमवायिकारणीभूतानां पूर्वपूर्वशब्दानां सिद्धिर्भवति. न तु श्रोत्रोत्पन्नशब्दातिरिक्तानां पूर्वपूर्वशब्दानां प्रत्यक्षतो ग्रहणं. तेषु श्रोत्रावच्छिन्नतमवायाभावात् ॥

ज्ञानविषयकसाक्षात्कारोऽनुव्यवसायः। उत्तरोत्तरोत्पन्नानुव्यवसायेनपूर्वपूर्वोत्पन्नज्ञानं गृह्यते यथा घटं जानामीत्यनुव्यवसायेन घटज्ञानसामान्यस्य सिद्धिः, घटं स्मरामि अनुभवामि यथार्थतोजानामि अयथार्थतोजानामि साक्षात्करोमि अनुमिनोमि उपमिनोमि शब्दात्प्रत्येमि सन्दिहे निश्चिनोमि तर्कयामि सम्भावयामि इत्याद्यनुव्यवसायैः मानसिकप्रत्यक्षरूपैः मनोरूपप्रत्यक्षप्रमाणजन्यैः स्मरणादीनां प्रत्यक्षं भवति। निर्विकल्पकस्यातीन्द्रियत्वेन गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीपुरुषइतिविशिष्टज्ञानवत् इत्यनुमानेन विशिष्टज्ञानजनकीभूतविशेषणज्ञानरूपं निर्विकल्पकज्ञानं सिद्ध्यति, नचास्य ज्ञानस्य ज्ञानत्वभङ्गः ज्ञानत्वव्यापकसविषयकत्वाभावादिति वाच्यं, तत्र प्रकारत्वादिविषयतात्रयाभावेपि तुरीयविषयताख्याया विषयतायाः तस्य सविषयकत्वभङ्गवारणायाङ्गीकृतत्वात्॥

ज्ञाननिष्ठं प्रामाण्यं स्वतो ग्राह्यमिति मीमांसका वदन्ति, अत्र प्रामाण्यं तद्वति तत्प्रकारकत्वरूपं प्रमात्वमेव, न तु प्रमाकरणत्वरूपं प्रामाण्यं अत्र विवक्षितं, सर्वत्र प्रत्यक्षादिज्ञानेषु प्रमाकरणत्वरूपस्य प्रामाण्यस्य बाधितत्वात्॥

स्वतोग्राह्यत्वञ्च तदप्रामाण्याग्राहकज्ञानग्राहकसामग्रीजन्ययावद्ग्रहविषयत्वं, तथ तदप्रामाण्याग्राहिका या ज्ञानग्राहिका सामग्री तज्जन्ययावद्ग्रहविषयत्वमिति, तथा च यावत्पदस्य व्यापकत्वार्थकतया तदप्रामाण्याग्राहकज्ञानग्राहकसामग्रीजन्यग्रहत्वव्यापकीभूतविषयताश्रयत्वमिति फलितम्. तदर्थः, तदप्रामा

ष्याग्राहिका तद्धर्मप्रकारकज्ञानग्राहिका या सामग्री तज्जन्यग्रह त्वव्यापकीभूता या विषयता तदाश्रयत्वमिति । गुरूणां मुरारि मिश्राणां भाट्टानां च मतेषु त्रिष्वपि स्वतोग्राह्यत्वं ज्ञानमाधार णं भवति, तथाहि, गुरुमते सर्वेष्वपि ज्ञानेषु ज्ञानज्ञातृज्ञेयरूपत्र यं भासते, तन्मतेऽयंघट इत्यादिघटमात्रावगाहिज्ञानं नास्त्येव, अस्मिन् ज्ञाने ज्ञेयविषयकत्वस्यसम्भवेपि ज्ञानज्ञातृविषयकत्वा भावात्, अतो गुरुमते सर्वमपिज्ञानं निरुक्तत्रितयविषयकं अयं घटः घटमहं जानामीत्यादिरूपं ज्ञेयं, घटं जानामीत्यस्य घटविष यकज्ञानवानहमित्यर्थः, अस्मिन् ज्ञाने घटरूपं ज्ञेयम् घटज्ञानरूपं ज्ञानं अहंपदार्थजीवरूपो ज्ञाताचेतत्त्रितयं विषयोभवति । मिश्र मते घट इति ज्ञानानन्तरं घटमहंजानामीत्यनुव्यवसायोङ्गीक्रिय ते, अस्मिन् मते व्यवसायोत्पत्त्यनन्तरमनुव्यवसाय उत्पद्यते तेन च प्रामाण्यं गृह्यते, अनुव्यवसायो नाम ज्ञानविषयकं मान सं प्रत्यक्षं, अस्मिन् ज्ञानेपि निरुक्तत्रितयं विषयोभवति । भाट्ट मते ज्ञानस्यातीन्द्रियतया ज्ञाततालिङ्गकानुमितेरेव प्रामाण्यं गृ ह्यते, ज्ञातता च सविषयको ज्ञानजन्यः प्रत्यक्षविषयीभूतः ज्ञान विषयत्वातिरिक्तो घटादिनिष्ठःकश्चन पदार्थ इति तन्मतं, अनु मानप्रयोगस्तु, घटः घटत्ववद्विशेष्यकघटत्वप्रकारकज्ञानविषयः घटत्वप्रकारकज्ञाततावत्वात् यन्नैवं तन्नैवं यथापट इति ॥

अथवा ज्ञाततां पक्षीकृत्य इयं ज्ञातता घटत्ववद्विशेष्यकघ टत्वप्रकारकज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञाततात्वात् या यद्वृत्तिः यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानज न्या यथा पटे पटत्वप्रकारिका ज्ञाततेति अत्र मतत्रयेपि व्यव

सायानुव्यवसायानुमितिषु ज्ञानस्य विषयत्वेन तत्ज्ञानगतज्ञानत्ववत् ज्ञानत्वसमशीलस्य ज्ञाननिष्ठप्रामाण्यस्यापि विषयत्वे बाधकाभावात् घटादिज्ञाननिष्ठप्रामाण्यमपि विषयीभवतीत्यङ्गीक्रियते. तथाच मतत्रयेपि प्रामाण्ये स्वतोग्राह्यत्वस्य लक्षणमन्वयप्रकार इत्थं. गुरुमते मिश्रमते चं तत्पदेन यस्मिन् घटादिज्ञाने प्रामाण्यं गृह्यते तद्घटादिज्ञानं ग्राह्यं तस्मिन्नप्रामाण्यज्ञानं तदप्रामाण्यज्ञानं इत्यनेन घटादिज्ञानविशेष्यकाप्रामाण्य प्रकारकज्ञान लभ्यते तद्ग्राहिका ज्ञानग्राहिका या सामग्री आत्ममनस्संयोगविशेषणज्ञानादिरूपा सामग्री तज्जन्यग्रहः घटमहंजानामीत्याकारको ग्रहः तद्विषयत्वं घटज्ञानत्व इव तत्समशीले प्रामाण्येपि वर्तत इति। भाट्टमते तदप्रामाण्याग्राहिका[illegible]ग्राहिका यासामग्री इत्युक्तौ आत्ममनस्संयोगपरामर्शादिरूपा।
तज्जन्यो यो ग्रहः घटः मद्विशेष्यकघटत्वप्रकारकज्ञानविषयः इत्याकारकानुमितिरूपो ग्रहः तद्विषयत्वं ज्ञानत्व इव तत्समशीले प्रामाण्येपि वर्तत इति। नैय्यायिकास्तु अयं घट इति ज्ञानान्तरं घटमहंजानामीति अनुव्यवसायस्य सम्भवेपि न तस्मिन् ज्ञाने तत्प्रामाण्यस्य विषयत्वं सम्भवति अन्यथा ज्ञानत्वसमशीलानां तद्व्यक्तित्वतद्गुणत्वप्रत्यक्षत्वादीनामपि तत्ज्ञानविषयताप्रसङ्गात्, किञ्च अनुव्यवसायादिनैव प्रामाण्यस्यग्रहणे अनभ्यासदशायां (प्राथमिकघटादिग्रहोत्तरदशायां) इदं प्रमा वा नवेति प्रामाण्यसंशयो न स्यात्, अतः प्रामाण्यं परतोग्राह्यमेवेति वदन्ति, परतोग्राह्यत्वञ्च अनुमानादिग्राह्यत्वं, यज्ज्ञानीयज्ञानोत्तरं जायमाना प्रवृत्तिस्सफला भवति तत् ज्ञानं प्रमेति. यथा, अयं

घटः इदं रजतं इत्यादिज्ञानं प्रमा सफलप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथा अप्रमेतिव्यतिरेकेणा द्वितीयादिज्ञानेषु इदं ज्ञानं प्रमा सफलप्रवृत्तिजनकत्वात् पूर्वोत्पन्नज्ञानवदित्यन्वयव्यतिरेकिणापि प्रामाण्यं गृह्यते ॥

नच शब्दवदाकाशमित्यादिज्ञानानां प्रवृत्तिजनकत्वाभावेन प्रमात्वं कथं सिद्ध्यतीति वाच्यं. अनुमानशब्दान्यतरग्राह्यत्वस्यैव परतोग्राह्यत्वरूपत्वेन वक्तव्यतया शब्दवदाकाशमित्यादि ज्ञानं प्रमा इत्याद्याप्तवाक्येभ्यः तत्तज्ज्ञानेषु प्रामाण्यसिद्धेरप्रत्यूहत्वात्. नच यत्र रजते इदं रजतमितिज्ञानं जातं प्रवृत्तिस्तु न जाता तत्र प्रमात्वं दुर्निरूपमिति वाच्यं. यत्र प्रवृत्त्यादिकमाप्तवाक्यं वा नास्ति तत्र वास्तविकप्रमात्वसत्त्वेपि प्रामाण्यसंशयस्यैव सत्वेन प्रामाण्यनिश्चयानुपपत्तेरिष्टत्वात्. अथवा तादृश ज्ञाने प्रवृत्तिप[illegible]ध्यायकत्वाभावेपि प्रवृत्तिस्वरूपयोग्यताया अक्षतत्वे[illegible]लिङ्गे, तत्रापि ज्ञाने प्रमात्वनिर्णयस्सूपपाद एव। सर्वमते [illegible] इदं ज्ञा[illegible] अप्रमा विफलप्रवृत्तिजनकत्वात् इत्याद्यनुमानेनैवाप्रामाण्यसिद्धेरप्युक्त्या। ज्ञातो घट इत्यादौ ज्ञाततायाः ज्ञानविषयतारूपत्वेनैवोपपत्तौ सविषयिकायाः ज्ञाततायाः पार्थक्यं न कल्पनीयं गौरवान्मानाभावाच्च ॥

अहं सुखी, अहं दुःखी. अहमिच्छामि, अहं द्वेष्मि. अहं करोमीत्यादिमानसप्रत्यक्षैः आत्मीयास्सुखदुःखेच्छाद्वेषप्रयत्ना गृह्यन्ते। परकीयं बुद्ध्यादिषट्कन्तु मुखसङ्कोचविकासादिनाअनुमीयते, तथाहि. अयं घटविषयकज्ञानवान् घटविषयकेच्छावत्त्वात्, अयं घटविषयकेच्छावान् घटविषयककृतिमत्वात्, अयं

घटविषयककृतिमान् कपालविषयककृतिमत्वात्, अयं सुखवान् मुखविकासवत्वात्, अयं दुःखवान् मुखसङ्कोचवत्वात् इति। अयं सुखी अयं दुःखीत्याद्यामवाक्यैर्वा परकीयं बुद्ध्यादिषट्कं ग्रहीतुं शक्यते। धर्माधर्मभावनाख्यसंस्काराणां आत्मीयानां परकीयानां वा सिद्धिस्तु, अयं धर्मवान् अहं धर्मवान् वा ऐश्वर्यसुखादिमत्वात् अयमधर्मवानहमधर्मवान्वा निर्धनत्वाद्दुःखित्वाच्च, अयमहं वा भावनाख्यसंस्कारवान् स्मृतिमत्वात् प्रत्यभिज्ञावत्वाद्वा इत्याद्यनुमानैरेव भवति॥

त्र्यणुकादिवेगः प्रत्यक्षसिद्धः, त्र्यणुकादिवेगः सासमवायिकारणः जन्यगुणत्वादित्याद्यनुमानतः द्व्यणुकपरमाण्वोरपि वेगसिद्धिर्द्रष्टव्या कटादिषु अयं स्थितस्थापकसंस्कारवान् विलक्षणक्रियावत्वादित्यनुमानेन स्थितस्थापकसंस्कारसिद्धिर्द्रष्टव्या। कटाद्यवयवेषु परमाणुपर्यन्तेषु कटादिनिष्ठस्थितस्थापकः सासमवायिकारणः जन्यगुणत्वात् इत्याद्यनुमानैः स्थितस्थापकसंस्कारस्य सिद्धिर्द्रष्टव्या, एवंगुणसिद्धिः निरूपिता॥

इदं चलति इत्यादिचाक्षुषप्रत्यक्षेण त्र्यणुकादिनिष्ठं कर्म गृह्यते, त्र्यणुकं द्व्यणुकं वा, सासमवायिकारणं इत्यनुमानतः द्व्यणुकसंयोगस्य परमाणुसंयोगस्य च सिद्धौ कर्मणस्संयोगासमवायिकारणत्वेन त्र्यणुकादिसंयोगस्सासमवायिकारण इत्याद्यनुमानतः द्व्यणुकपरमाण्वोरपि क्रियासिद्धिः, हस्तादिनिष्ठस्योत्क्षेपणादिपञ्चकस्य प्रत्यक्षतो ग्रहणे तदुत्क्षेपणं सासमवायिकारणं इत्याद्यनुमानैः तदवयवेष्वपि परमाणुपर्यन्तेषु उत्क्षेपणादीनां सिद्धिर्द्रष्टव्या, एवंकर्मसिद्धिर्ग्राह्या॥

* अथ जातिसिद्धिर्निरूप्यते *

पदार्थत्वं न जातिः समवायादिवृत्तित्वात्. द्रव्यत्वं गुणत्वं कर्मत्वं च जातिरेव, जतुघृतकाष्ठादिषु द्रव्यत्वव्यवहाराभावेन न प्रत्यक्षतो द्रव्यत्वजातिसिद्धिस्सम्भवति. किन्त्वनुमानेनैव अनुमानप्रकारः, संयोगविभागादिसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटानिरूपितदण्डनिष्ठकारणतावदित्यनुमानेन विभागादिसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिः. न च स धर्मो घटत्वादिर्भवितुमर्हति, कारणताया मन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वेन घटत्वपटत्वादिव्याप्यजातीनां विभागादिसमवायिकारणताया अन्यूनत्वाभावेन सत्ताजातेस्तदनतिप्रसक्तत्वाभावेन गुणत्वादिजातिषु विभागादिकारणत्वप्रसक्तेरेवाभावेन च तत्कारणताया अन्यूनानतिप्रसक्तधर्मः द्रव्यत्वमेव भवतीति तत्सिद्धिर्द्रष्टव्या। न च द्रव्यत्वस्य तत्कारणतायामन्यूनानतिप्रसक्तत्वेऽपि तस्य जातित्वे प्रमाणाभाव इति वाच्यम्, वह्निव्याप्यधूमवानिति परामर्शस्य सत्त्वेऽपि महानसीयवह्न्यन्तरवह्न्यभाववानितीतरबाधसहकारेण महानसीयवह्निमानित्यनुमितिरिव अनेकसमवेतस्य द्रव्यत्वस्य जातित्वे लाघवं इति लाघवज्ञानसहकृतात् किञ्चिद्धर्मावच्छिन्नत्वव्याप्यकारणतात्ववती विभागादिसमवायिकारणता इति परामर्शात् तत्कारणतावच्छेदकतया जातिरूपद्रव्यत्वमेव सिद्ध्यति ॥

एवमेव गुणपदशक्यता किञ्चिद्धर्मावच्छिन्ना शक्यतात्वात् घटपदशक्यतावत् इत्यनुमानेन गुणत्वजातिसिद्धिः। अस्यापि प्रत्यक्षप्रमाणतो जातित्वासिद्धौ दुःखद्वेषादिषु गुणत्वव्यवहारा

भावो मूलमित्यवधेयं। कर्मत्वजातिस्तु चलतीत्यादिप्रत्यक्ष सिद्धैव ॥

सामान्यादिचतुष्टये जातिर्नास्ति. तथाहि, घटत्वपटत्वादि जातिषु जातित्वरूपजातिस्वीकारे जातिरूपस्यापि जातित्वेन ता दृशजातित्वे घटत्वादौ च पुनर्जातित्वजातिः स्वीकार्या. तथा स्वीकारे घटत्वादौ तन्निष्ठजातित्वे एतज्जातित्वनिष्ठजातित्वे च पुनर्जातित्वजातिस्वीकारापत्तिः इत्यनवस्थाप्रसङ्ग इति सामान्ये जातिर्नाङ्गीक्रियते ॥

विशेषेषु विशेषत्वजातिस्वीकारे निस्सामान्यत्वे सति सामान्यभिन्नत्वे सति समवेतत्वमिति विशेषलक्षणस्य भङ्गः प्रसज्येतेति रूपहानिरूपदोषप्रसक्तेः विशेषेषु जा[illegible] [illegible]क्रियते, रूपहानिर्नाम लक्षणहानिः। रूपहानिपदस्य [illegible]त्वं [illegible]त्वात्मकस्य रूपस्य हानिः इत्यर्थान्तरं प्रकल्प्य त[illegible] जा[illegible]त्यादिना [illegible] वदन्ति वहवः, तत्प्रकारः, घटादिद्व्यणुकपर्यन्[illegible]ष्ववयवावयवेषु स्वावयवसमवेतत्वरूपहेतुना इतरभेदस्साधयितुंशक्यते. तत्प्रकारः, घटः इतरभिन्नः कपालसमवेतत्वात्, द्व्यणुकं स्वेतरभिन्नं परमाणुसमवेतत्वादित्यादिना घटादिद्व्यणुकान्तेष्वितरभेदस्साधयितुं शक्यते, परमाणूनामवयवाभावेन परमाणुष्वितभेदसाधको नैतादृशो हेतुस्सम्भवति, अतस्सर्वेष्वपि परमाणुषु. प्रत्येकमेकैकं विशेषमङ्गीकृत्य सर्वपरमाणुषु प्रत्येकं अयं परमाणुः इतरभिन्नः एतद्विशेषादित्याद्यनुमानैः तेष्वितरभेदः साधनीयः, एवं स्थिते. विशेषेषु विशेषत्वजातिस्वीकारे सामान्याश्रयस्य सामान्यरूपेषे

22

त्वसाध्यसाधकत्वमितिनियमेन सामान्यात्मकविशेषत्वरूपेणैव विशेषाणां हेतुता वाच्या, ननु सामान्यानात्मकेनैतद्विशेषत्वरूपेण, अयं परमाणुः इतरभिन्नः विशेषादिति सामान्यरूपेण हेतुता स्वीकारे तु इतरभेदाभाववत्यन्यपरमाणावपि विशेषरूपहेतोस्सत्वाद्व्यभिचारप्रसङ्गः, अतो विशेषेषु जातिर्नाभ्युपेया। विशेषेष्वपि अयं विशेष इतरभिन्नः तादात्म्यसम्बन्धेनैतद्विशेषात् इत्याद्यनुमानैः सर्वविशेषेषु प्रत्येकमितरभेदस्साधनीयः, एवञ्च स्वतोव्यावर्तकत्वं सम्भवति, स्वतोव्यावर्तकत्वञ्च स्ववृत्त्यसाधारणधर्मपुरस्कारेण व्यावर्तकत्वं, सच असाधारणधर्मः एतद्विशेषत्वादिः। नचैवं अयं परमाणुः इतरभिन्नः तादात्म्यसम्बन्धेनैतत्परमाणोः, अयं परमाणुः इतरभिन्नः समवायसम्बन्धेनैतद्रूपादित्याद्यनुमानैरेव परमाणुष्वितरभेदसिद्धौ विशेषाङ्गीकारणमनावश्यकमिति [illegible] परमाण्वेतद्रूपादिहेतुभिरितरभेदसाधने [illegible] सा[illegible]न्यरूपेण साध्यसाधकत्वनियमभङ्गप्रसङ्गा[illegible]त्वरूप[illegible]दिहेतुभिस्सामान्यरूपैस्साधने च व्यभिचारप्रसङ्गात्, अतः परमाणुष्वितरभेदसाधनार्थं विशेषा अङ्गीकर्तव्याः, विशेषेषु च जातिर्नस्वीकार्येति च सिद्धम् ॥

असम्बन्धः समवायाभावयोर्जातिस्वीकारे बाधकः, असम्बन्धो नाम समवायप्रतियोगित्वसमवायानुयोगित्वान्यतराभावः, समवायाभावयोः कस्यापि पदार्थस्य समवायसम्बन्धेनावर्तमानत्वेन तयोस्समवायेन कस्यापि पदार्थस्य अनधिकरणत्वेन च निरुक्तान्यतराभावस्सम्भवतीति समवायाभावयोर्नजातिस्स्वीकरणीया। एवंगगनत्वादिकं न जातिः एकव्यक्तिवृत्तित्वात्,

घटत्वं कलशत्वाभिन्नजातित्वाभाववत् कलशत्वसमनियतत्वात्, इत्याद्यनुमानैर्घटत्वादीनां भिन्नजातित्वं न सिद्ध्यति। तत्र व्यक्त्यभेद तुल्यत्वयोस्सत्त्वात्, एवं भूतत्वशरीरत्वेन्द्रियत्वोद्भूतत्वादीनां क्रमेण मूर्तत्वपृथिवीत्वशुक्लत्वादिना साङ्कर्यात् नैव जातित्वं, परस्परात्यन्ताभावसमानाधिकरणयोः धर्मयोः एकत्र समावेशः सङ्करः. मूर्तत्वाभाववति गगने भूतत्वं. भूतत्वाभाववति मनसि, मूर्तत्वं, उभयोस्समावेशः पृथिव्याद्यन्तर्भावेण वर्तत इति मूर्तत्व साङ्कर्येण भूतत्वस्य न जातित्वं। पृथिवीत्वाभाववति जलीयशरीरे शरीरत्वं, शरीरत्वाभाववति घटादौ पृथिवीत्वं. उभयोस्समावेशः पार्थिवशरीरान्तर्भावेण वर्तत इति पृथिवीत्वादिना साङ्कर्याच्छरीरत्वस्य न जातित्वम्। पृथिवीत्वाभाववति जलीयेन्द्रिये इन्द्रियत्वं, इन्द्रियत्वाभाववति घटादौ पृथिवीत्वं. उभयोस्समावेशः पार्थिवेन्द्रियान्तर्भावेण वर्तत इति पृथिवीत्वादिना साङ्कर्यादिन्द्रियत्वस्य न जातित्वम्॥

शुक्लत्वाभाववत्युद्भूतनीले उद्भूतत्वं. उद्भूतत्वाभाववत्यनुद्भूतशुक्ले शुक्लत्वं, उभयोस्समावेश उद्भूतशुक्लान्तर्भावेण वर्तत इति शुक्लत्वादिना साङ्कर्यादुद्भूतत्वस्य न जातित्वं। पृथिवीत्वाभाववति जलीयपरमाणौ परमाणुत्वं, परमाणुत्वाभाववति घटादौ पृथिवीत्वं, उभयोस्समावेशः पार्थिवपरमाणाविति पृथिवीत्वसाङ्कर्येण परमाणुत्वस्य न जातित्वं, एवं द्व्यणुकत्वत्र्यणुकत्वयोरपि पृथिवीत्वसाङ्कर्येण न जातित्वं। शरीरत्वेन्द्रियत्वयोरविषयत्वस्यापि पृथिवीत्वादिसाङ्कर्येण न जातित्वं। नीलपृथिवीत्वा

भाववति पीतघटे घटत्वं, घटत्वाभाववति नीलपटे नीलपृथिवीत्वं; उभयोस्समावेशो नीलघटे वर्तत इति घटत्वादिसाङ्कर्येण नील पृथिवीत्वस्य न जातित्वं । घटत्वाभाववति नीलपटे नीलद्रव्यत्वं, नीलद्रव्यत्वाभाववति पीतघटे घटत्वं. उभयोस्समावेशो नीलघटे वर्तत इति घटत्वादिसाङ्कर्येणनीलद्रव्यत्वादीनांनजातित्वं । एवं नित्यत्वानित्यत्वयोरपि पृथिवीत्वादिसाङ्कर्येण नित्यत्वस्य सामान्यादिवृत्तितया अनित्यत्वस्य प्रागभावसाधारण्येन च न तयोर्जातित्वं । रूपत्वाभाववति जलीयपरमाणुरसादौ नित्यगुणत्वं, नित्यगुणत्वाभाववति घटीयरूपादौ रूपत्वं, उभयोस्समावेशो नित्यरूपे वर्तत इति रूपत्वादिसाङ्कर्येण नित्यगुणत्वस्य न जातित्वं । एवं नित्यद्रव्यत्वस्यापि पृथिवीत्वादिसाङ्कर्येण न जातित्वं । रूपत्वादिसाङ्कर्येणानित्यगुणत्वस्य पृथिवीत्वादिसाङ्कर्येणानित्यद्रव्यत्वस्य च न जातित्वं । शुक्लत्वाभाववति घटनीले घटरूपत्वं, घटरूपत्वाभाववति पटशुक्ले शुक्लत्वं, उभयोस्समावेशः घटशुक्ल इति शुक्लत्वादिना साङ्कर्येण घटरूपत्वादेर्नजातित्वं॥

नच पृथिवीत्वादिसाङ्कर्येण शरीरत्वादीनामिव शरीरत्वादिसाङ्कर्येण पृथिवीत्वादीनामपि जातित्वं नस्यादिति वाच्यं, जातित्वेनाभिमतसङ्करस्यैव जातिबाधकत्वनियमेन जातित्वेनानभिमतशरीरत्वादिसाङ्कर्यस्य पृथिवीत्वादिजातित्वबाधकत्वाभावात्, नच शरीरत्वादिसाङ्कर्यसत्वेन पृथिवीत्वादीनामपि कथं जातित्वेनाभिमतत्वमिति वाच्यम्, गन्धसमवायिकारणतावच्छेदकतया पृथिवीत्वस्य जातित्वसिद्धेः, शरीरत्वस्य तादृशजातित्व-

व्यवस्थापकाभावात् । नच गुणपदशक्यतावच्छेदकतया गुणत्व जातेरिव शरीरपदशक्यतावच्छेदकतया शरीरत्वस्यापि जातित्वं सिद्ध्यतीति वाच्यम् , शरीरत्वे जातित्वव्यवहाराभावेन तदसिद्धेः. एतादृशान् जातिबाधकान्. व्यक्तेरभेदस्तुल्यत्वं, सङ्करोऽथानवस्थितिः, रूपहानिरसम्बन्धो. जातिबाधकसङ्ग्रहः, इत्यनेननीलकन्ठविश्वनाथपञ्चाननप्रभृतयःप्रादर्शयन् ॥

भेदत्वाविषयतात्वादिकमखंडोपाधिरितिसिद्धांतः गन्धसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिरूपितदण्डनिष्ठकारणतावदित्यनुमानेन लाघवज्ञानसहकृतेन पृथिवीत्वस्य जातित्वसिद्धिः । एवं जन्यस्नेहसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन जन्यस्नेहसमवायिकारणतावच्छेदकतया जन्यजलत्वजा[illegible]तादृशजन्यजलत्वावच्छिन्नसमवायिकारणता [illegible] प्रत्यक्ष का[illegible]णतात्वादित्यनुमानेन जलत्वजातिसिद्धि[illegible] [illegible] साधकानुमानस्थलेषुलाघवज्ञानस्यसहकारित्वंग्राह्यम् । नच [illegible]मानद्वयमंतरा स्नेहसमवायिकारणतावच्छेदकतयैव कुतो न जलत्वजातिसिद्धिरिति वाच्यम् . स्नेहत्वस्यानित्यानित्यस्नेहवृत्तितया कार्यतातिप्रसक्तत्वेन कार्यतावच्छेदकत्वाभावात्, कार्यताया अन्यूनानतिप्रसक्तधर्मस्यैव कार्यतावच्छेदकत्वात्, नच जन्यस्नेहसमवायिकारणतावच्छेदकतयैव कुतो न जलत्वजातिसिद्धिरिति वाच्यम्, जलत्वजातेः परमाण्वन्तर्भावेण जन्यस्नेहसमवायिकारणत्वातिप्रसक्तत्वेन तत्कारणतावच्छेदकत्वाभावात्, अपिच जन्यस्नेहसमवायिकारणतावच्छेदकधर्मस्य परमाणुष्वङ्गी

कार्यतया नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमेन परमाणुष्वपि कदाचिज्जन्यस्नेहोत्पत्तिप्रसङ्गः अतश्च न स्नेहस मवायिकारणतावच्छेदकतया जलत्वजातिसिद्धिः, किन्तु निरुक्तानुमानद्वयेनैव तत्सिद्धिर्द्रष्टव्या. स्वरूपयोग्यत्वं च फलजनकतावच्छेदकधर्मवत्वं ज्ञेयं, घटत्वपटत्वादीनां जातित्वं प्रत्यक्षसिद्धं, जातिबाधकाभावे प्रत्यक्षानुमानाभ्यां तत्सिद्धिर्बोध्या ॥

जन्योष्णस्पर्शसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन जन्यतेजोमात्रसाधारणवैजात्यसिद्धिः, तदवच्छिन्नसमवायिकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानेन तेजस्त्वस्य जातित्वे लाघवमिति लाघवज्ञानसहकृतेन तेजस्त्वस्य जातित्वसिद्धिः । एवं अपाकजजन्यानुष्णाशीतस्पर्शनिष्ठवैजात्यावच्छिन्नसमवायिकारणतावच्छेदकतया जन्यवायुगतवैजात्य[illegible]दवच्छिन्नसमवायिकारणतावच्छेदकतय[illegible]यत्व[illegible] आकाशत्वस्य कालत्वस्य दिक्त्वस्य चैक[illegible]त्वात् [illegible] जातित्वं ॥ ज्ञानसुखादिसमवायिकारण[illegible]च्छेदकतया आत्मत्वजातिसिद्धिः, नचास्या जातेरीश्वरेप्यङ्गीकारे नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमेनेश्वरे कदाचित्सुखादेरुत्पत्तिप्रसङ्ग इति वाच्यं, तादृशनियमस्यानङ्गीकृतत्वात्, ईश्वरेऽदृष्टाभावेन सुखाद्यजननात् । अथवा, ईश्वरे सा जातिर्नास्त्येव, जीवात्मन्येव साङ्गीक्रियते, ईश्वरेप्यात्मत्वव्यवहारस्तु ज्ञानाश्रयत्वविषयक एव, नात्मत्वजातिविषयक इत्यपि केचिद्वदन्ति ॥ सुखाद्युपादानकारणतावच्छेदकतया मनस्त्वजातिसिद्धिर्द्रष्टव्या ॥

घृतजतुप्रभृतिषु पृथिवीत्वस्य हिमखण्डकरकादौ जलत्वस्य सुवर्णादौ तेजस्त्वस्य च व्यवहाराभावेन न पृथिवीत्वजलत्वतेजस्त्वजातीनां प्रत्यक्षप्रमाणसिद्धत्वम, वायोर्मनसश्च स्वतः प्रत्यक्षत्वासम्भवेन जीवात्मनोऽहंसुखीत्यादिप्रत्यक्षविषयत्वसम्भवेपि परात्मनः प्रत्यक्षाविषयत्वेन न वायुत्वात्मत्वमनस्त्वजातीनां प्रत्यक्षसिद्धत्वम्, अतोऽनुमानेनैव तेषां सिद्धिरङ्गीकार्या । नच घृतादिकं परित्यज्य परमाण्वन्तर्भावेण पृथिवीत्वादिजातीनां व्यवहारव्यभिचारः कुतो न प्रदर्शित इति वाच्यम्, तथा सतिरूपत्वादिजातीनामप्यप्रत्यक्षपरमाणुरूपवृत्तित्वात् प्रत्यक्षासिद्धत्वप्रसङ्गात्, अतो योग्यपदार्थान्तर्भावेणैव प्रत्यक्षत्वव्यवहारव्यभिचारे प्रसक्ते अनुमानप्रमाणेन जातिसिद्धिर्वक्तव्या. अयोग्यान्तर्भावेण व्यवहारव्यभिचारस्यापि जातेः प्रत्यक्षासिद्धतानियामकत्वेऽदृष्टचरदूरस्थदण्डादावपि दण्डइत्यादिव्यवहाराभावेन दण्डत्वादिजातीनामपि प्रत्यक्षासिद्धत्वप्रसङ्गः, अयोग्यत्वंचात्र प्रत्यक्षकारणसामग्र्यभावप्रयुक्तप्रत्यक्षाविषयत्वं बोध्यम्, अतो दूरस्थदण्डादिषु परमाणुष्वपि प्रत्यक्षकारणीभूतमहत्वचक्षुःसंयोगाद्यभावेन तदभावप्रयोज्यप्रत्यक्षाविषयत्वरूपमयोग्यत्वं दूरस्थदण्डादीनां परमाणूनामप्यक्षतम् । यत्र धर्मी स्वत एवाप्रत्यक्षः तद्वृत्तिजातेर्नियतमनुमानेन शब्देन वा सिद्धिर्वक्तव्या. अतो जातिबाधकरहितानां बहुष्वनुगतानां प्रत्यक्षलाघवज्ञानसहकृतानुमानादिसिद्धानामेव धर्माणां जातित्वं वक्तव्यमिति फलितम् ॥

इदंरूपमिदंरूपमित्याकारकप्रात्यक्षिकप्रतीत्यैव रूपत्वजातिसिद्धिः नच सर्वेष्वपि रूपेषु रूपत्वव्यवहाराभावात् कथं प्रत्यक्षतो रूप

त्वजातिसिद्धिरिति वाच्यम्, सर्वत्र रूपशब्दोल्लेखिन्याः प्रतीते रभावेपि वर्णशब्दोल्लेखिन्याः प्रतीतेस्सत्वात्, वर्णरूपपदयोः प र्यायत्वात्, अतो रूपत्वजातिसिद्धिः प्रत्यक्षत एव भवति। नच तथापि इदंरूपमिति प्रतीतिबलात्प्रतीयमानं रूपत्वादि कमधिकरणभेदेन भिन्नमनेकमेव भवतीति न तस्य जातित्वमिति वाच्यम्, अनुगतधर्ममन्तराऽनुगतप्रतीतिरसम्भव इति नियमेन इदंरूपमिदंरूपमित्याद्यनुगतप्रतीत्यनुरोधेन सर्वरूपानुगतस्यैकस्य रूपत्वस्यैव जातित्वेन सिद्धेस्सम्भवात्. एवमेव रूपत्वव्याप्या नां शुक्लत्वनीलत्वादीनामपि जातित्वं प्रत्यक्षप्रमाणत एव सि ध्यतीति ज्ञेयम्. एवं पृथिवीत्वव्याप्यानां घटत्वपटत्वादीनां जा तित्वसिद्धिः प्रत्यक्षत एव ग्राह्या. नच रूपत्वस्य नित्यानित्यरूप वृत्तितया नित्यरूपस्यातीन्द्रियत्वेन तत्र प्रात्यक्षिकरूपत्वव्यवहा रस्य दुर्निरूपतया नित्यरूपे कथं रूपत्वजातिसिद्धिरिति वाच्यम्, सर्वेषु योग्येषु तादृशव्यवहारसम्भवे अयोग्ये कुत्रचित्तादृशव्यव हाराभावेपि बाधकाभावात्॥

एवमेव रसत्वतद्व्याप्यमधुरत्वादीनां गन्धत्वतद्व्याप्यसुरभित्वा दीनां स्पर्शत्वतद्व्याप्योष्णत्वादीनां जातीनां सिद्धिःप्रत्यक्षत ए वं ग्राह्या॥. एवमेव संख्यात्वपरिमाणत्वपृथक्त्वसंयोगत्वविभा गत्वपरत्वापरत्वजातीनां तत्तद्व्याप्यानां च सिद्धिः प्रत्यक्ष त एवग्राह्या॥ आद्यपतनासमवायिकारणतावच्छेदकतया गुरु त्वत्वजातिसिद्धिः॥ इदंद्रवमितिप्रात्यक्षिकप्रतीत्या द्रवत्वत्वजा तिसिद्धिः॥ पिन्डीभावकारणतावच्छेदकतया स्नेहत्वजातिसि द्धिः॥ अयं ध्वन्यात्मकश्शब्दः अयं वर्णात्मकश्शब्द इत्यादि

प्रात्यक्षिकप्रतीत्या शब्दत्वजातिसिद्धिः। जानामि, स्मरामि, अनुभवामि, साक्षात्करोमि, अनुमिनोमि, उपमिनोमि, शाब्दयामि सन्दिहे, निश्चिनोमीत्याद्यनुव्यवसायैः ज्ञानत्वस्मृतित्वानुभवत्वप्रत्यक्षत्वानुमितित्वोपमितित्वशाब्दत्वसंशयत्वनिश्चयत्वप्रभृतीनां जातीनां सिद्धिर्भवति। अहं सुखी, अहं दुःखी, अहमिच्छामि, अहं द्वेष्मि, अहं करोमीत्यादिमानसप्रत्यक्षैस्सुखत्व दुःखत्वेच्छात्वद्वेषत्वप्रयत्नत्वजातीनां सिद्धिर्भवति। स्वर्गादिसाधनतावच्छेदकतया धर्मत्वजातेः नरकादिसाधनतावच्छेदकतया अधर्मत्वजातेः स्मृतिजनकतावच्छेदकतया भावनात्वजातेश्च सिद्धिः। वेगत्वजातिः प्रत्यक्षसिद्धा, कटादिनिष्ठवैलक्षण्यापादकतावच्छेदकतया स्थितस्थापकसंस्कारत्वजातिसिद्धिः। अथवा, गुणदीधितौ भट्टाचार्योक्तक्रमेण स्थितस्थापकपदशक्यतावच्छेदकतया स्थितस्थापकसंस्कारत्वजातिसिद्धिः। ... त्र चक्षुरि... ... द्धिः

चलतीत्याकारकप्रात्यक्षिकप्रतीत्या द्रव्य... ... वेतसमवेसामान्यादिचतुष्टये यथा जातिर्नास्ति तथा प्रागादि... ... णतायुक्तानां जातीनामानुगत्यमतीन्द्रियवृत्तिताप्रसक्तजातित्वभङ्गभावश्च रूपत्वजातिस्थलइवबोध्यम्। सत्ताजातिस्तु सदित्याकारकव्यवहारतो न सिद्ध्यति, सामान्यादावपितत्प्रतीतेस्समत्वात्, नाप्यनुमानंलिङ्गाभावात्, अतःप्रामाणिकव्यवहारपथसत्ताजातिसिद्धौप्रमाणमन्वेष्यम्। सत्पदशक्यतावच्छेदकतयावासत्ताजातिसिद्धिः क्रियासमवायिकारणतावच्छेदकतयामूर्तत्वजातिसिद्धिः॥

ननु विभुत्वप्रभावटसंयोगत्वादीनां जातिबाधकसाङ्कर्यादेरप्यभावात्कुतो न जातित्वं, नच विभुत्वस्य प्रभावटसंयोगत्वा

देश्च जातित्वग्राहकप्रमाणाभावेन न तेषां जातित्वमिति वाच्यम्, विभुपदशक्यतावच्छेदकतया विभुत्वस्य प्रभाघटसंयोगपदशक्यतावच्छेदकतया प्रभाघटसंयोगत्वस्य च गुणपदशक्यतावच्छेदकतया गुणत्वस्येव जातित्वसिद्धौ बाधकाभावादिति वाच्यम्, गुणत्व इव विभुत्वप्रभाघटसंयोगत्वादौ जातित्वव्यवहाराभावात्। निरूपककोटिप्रविष्टानां कार्यत्वकारणत्वप्रभृतीनां अवच्छेदकतानिरूपकाणां केषांचित्सामान्यादिचतुष्टयवृत्तित्वेन केषांचिन्माधुर्येण च न जातित्वमित्यवधेयं। इत्थंच यत्र जातिबाधकाभावः जातित्वेनप्रत्यक्षादिप्रमाणसिद्धत्वं नित्यत्वमनेकसमवेतत्वं च निर्विवादं परिदृश्यन्ते तस्यैव जातित्वं वक्तव्यमिति परमार्थः। विशेषसिद्धिस्तु विशेषेषु जात्यभावनिरूपणावसरे परमाणुष्वितरभेदसाधनार्[illegible]न्यथानुपपादितं प्रागेव। गुणक्रियाविशिष्टबु[illegible] विशे[illegible]न्धविषया विशिष्टबुद्धित्वात् दण्डीपुरु[illegible]वदित्यनुमानेन संयोगादीनां वा भावात्समवाय

येनेन्द्रियेण याव्यक्तिर्गृह्यते तेनेन्द्रियेण तन्निष्ठाजातिस्तदभावश्च गृह्यत इति न्याये सामान्यतो व्यक्तिपदग्रहणेन द्रव्यगुणकर्मणां सामान्यतोऽभावपदग्रहणेन प्राक्प्रध्वंसात्यन्तान्योन्याभावानां च ग्रहणं च भवति, तथा च घटस्य त्वक्चक्षुर्ग्राह्यत्वेन घटाभावस्यापि तद्ग्राह्यत्वं। रूपस्य चक्षुर्ग्राह्यत्वेन रूपाभावस्यापि चक्षुर्ग्राह्यत्वं। रसस्य रसनेन्द्रियग्राह्यत्वेन रसाभावस्यापि रसनेन्द्रियग्राह्यत्वं। गन्धस्य घ्राणेन्द्रियग्राह्यत्वेन गन्धाभावस्यापि घ्राणेन्द्रियग्राह्यत्वं। शब्दस्य श्रोत्रेन्द्रियग्राह्यत्वेन शब्दाभावस्यापि

श्रोत्रेन्द्रियग्राह्यत्वं । सुखदुःखादेर्मनइन्द्रियग्राह्यत्वेन सुखदुःखाद्यभावस्यापि मनइन्द्रियग्राह्यत्वं । संसर्गाभावप्रत्यक्षे प्रतियोगियोग्यताऽपेक्षिता, अतो गुरुत्वाभावस्य प्रत्यक्षं सम्भवति प्रतियोगिनो गुरुत्वस्यायोग्यत्वात्. योग्यत्वं चात्र प्रत्यक्षविषयत्वं ग्राह्यं। अन्योन्याभावप्रत्यक्षेऽधिकरणस्य योग्यताऽपेक्षिता. अतः स्तम्भादौ पिशाचभेदप्रत्यक्षस्य नानुपपत्तिः. प्रतियोगिनः पिशाचस्यायोग्यत्वेऽप्यधिकरणीभूतस्य स्तम्भस्य योग्यत्वात् ॥

द्रव्याधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता सन्निकर्षः, यथा, घटाभाववद्भूतलमित्यत्र घटाभावे चक्षुरादीन्द्रियसंयुक्तभूतलविशेषणतायास्सत्त्वात् । द्रव्यसमवेताधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणता सन्निकर्षः, यथा, घटरूपं घटत्वाभाववदित्यत्र घटरूपनिष्ठघटत्वाभावे च चक्षुरिन्द्रियसंयुक्तघटसमवेतरूपविशेषणतायास्सत्त्वात् । द्रव्यसमवेतसमवेताधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता सन्निकर्षः,यथा,रूपत्वं नीलत्वाभाववदित्यत्रचक्षुस्संयुक्तघटसमवेतरूपसमवेतरूपत्वविशेषणतायाः रूपत्वनिष्ठनीलत्वाभावे सत्त्वात् । एवं शब्दाभावः श्रोत्रावच्छिन्नविशेषणतया गृह्यते । कादौ खत्वाभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया गृह्यते । कत्वादौ खत्वाभावः श्रोत्रावच्छिन्नसमवेतसमवेतविशेषणतया गृह्यते । एवं कत्वावच्छिन्नाभावे गत्वाभावः श्रोत्रावच्छिन्नविशेषणविशेषणतया गृह्यते । घटाभावादौ पटाभावः चक्षुस्संयुक्तविशेषणविशेषणतया गृह्यते । स्पर्शाभावे घटाभावः त्वक्संयुक्तविशेषणविशेषणतया गृह्यते । रसाभावे घटाभावः रसनेन्द्रियसंयुक्तवि

शेषणविशेषणतया गृह्यते। गन्धाभावे घटाभावः घ्राणेन्द्रियसंयुक्तविशेषणविशेषणतया गृह्यते। सुखाद्यभावे दुःखाद्यभावो मनस्संयुक्तविशेषणविशेषणतया गृह्यते। एषा रीतिः द्रव्याश्रितयोग्याभावे इतराभावविशेषणकप्रत्यक्षस्थले ग्राह्या। घटरूपाश्रितघटाभावः पटाभाववानिति प्रत्यक्षे तु इन्द्रियसंयुक्तसमवेतविशेषणविशेषणता सन्निकर्षः। घटरूपत्वविशिष्टघटाभावः पटाभाववानिति प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणविशेषणता सन्निकर्षः। एवं द्रव्याद्याश्रितयोग्याभावे अन्योन्याभावादिविशेषणकप्रत्यक्षस्थलेष्वपि निरुक्तरीत्या सन्निकर्षाः ग्राह्याः॥

एवं भूतले घटाभाव इत्यत्र इन्द्रियसंयुक्तविशेष्यता सन्निकर्षः, एतन्मते प्रथमान्तार्थस्य घटाभावस्यैव विशेष्यतया अङ्गीकार्यत्वात्। घटरूपे घटाभाव इति प्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेष्यता सन्निकर्षः। घटरूपत्वे घटाभाव इति प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेष्यता सन्निकर्षः। एवं कादौ खत्वाभाव इति प्रत्यक्षे श्रोत्रावच्छिन्नसमवेतविशेष्यता सन्निकर्षः। कत्वावच्छिन्नाभावे गत्वाभाव इति प्रत्यक्षे श्रोत्रावच्छिन्नविशेषणविशेष्यता सन्निकर्षः। एवं स्पर्शाभावे घटाभाव इत्यत्र त्वक्संयुक्तविशेषणविशेष्यता। रसाभावे घटाभाव इत्यत्र रसनेन्द्रियसंयुक्तविशेषणविशेष्यता। गन्धाभावे घटाभाव इत्यत्र घ्राणेन्द्रियसंयुक्तविशेषणविशेष्यता। सुखाद्यभावे दुःखाद्यभाव इत्यत्र मनस्संयुक्तविशेषणविशेष्यता च सन्निकर्षः। एवं घटाश्रितपटाभावे घटाभाव इति प्रत्यक्षे इन्द्रियसंयुक्तविशेषणविशेष्यता सन्निकर्षः। घट

रूपाश्रितपटाभावे घटाभाव इति प्रत्यक्षे इन्द्रियसंयुक्त समवेत विशेषणविशेष्यता सन्निकर्षः। घटरूपत्वाश्रितपटाभावे घटाभाव इति प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणविशेष्यता सन्निकर्षः। एवमेव द्रव्याद्याश्रितयोग्याभावविशेषणकान्योन्याभावादिविशेष्यकप्रत्यक्षस्थलेषु सन्निकर्षाः ग्राह्याः. तथाच स्थल भेदेन विशेषणविशेष्यभावं निर्णीय विशेषणविशेष्यभावसन्निकर्षप्रभेदा निर्धार्य इत्यलं प्रसक्तानुप्रसक्तविचारेण ॥

* एवकारविचारः *

एवकारस्त्रिविधः, विशेष्यसङ्गतः, विशेषणसङ्गतः, क्रियासङ्गतश्चेति। तत्र विशेष्यसङ्गतस्य तस्य अन्ययोगव्यवच्छेदः, विशेषणसङ्गतस्य तस्य अयोगव्यवच्छेदः. क्रियासङ्गतस्य तस्य अत्यन्तायोगव्यवच्छेदश्चार्थः। अन्ययोगव्यवच्छेदो नाम, अन्यः अस्मिन् योगव्यवच्छेदः अन्ययोगव्यवच्छेदः, यत्र यस्मिन्नभ्यत् परिदृश्यते, विशेषणस्य बोध्यः व्यवच्छेदो नामाभावः, तथाहि अन्याहीत रूपम्, शेषणसम्बन्धाभाव इति फलितम्, प्रकृतविशेष्यादन्यत्रापि विशेषणसम्भावनायां प्रसक्तायां तन्निवृत्तिज्ञापनं यथावश्यकं तदा प्रथमो विशेष्यसङ्गतैवकारः प्रयोज्यः. विशेष्यसङ्गतत्वञ्च विशेष्यवाचकपदाव्यवहितोत्तरोच्चारितत्वम्, यथा पार्थ एव धनुर्धर इत्यत्र पार्थादन्यत्रापि धनुर्धरत्वे सम्भाविते तन्निवृत्त्यर्थं प्रयुक्तः अयं एवकारः. तथाच पार्थो धनुर्धरः पार्थान्यो धनुर्धरत्वाभाववान् इति बोधः अत्र विज्ञेयः। अयोगव्यवच्छेदो नाम, योगस्याभावः अयोगः तस्य व्यवच्छेद इति व्युत्पत्त्या प्रकृतविशेष्यनिष्ठः विशेषणसम्बन्धाभावाभाव इति फलितम्, प्रकृतविशेष्यताव

च्छेदकाश्रये कुत्रचित् विशेषणाभावे प्रसक्ते तन्निवृत्तिज्ञापनं य स्यावश्यकं तदा विशेषणसङ्गतैवकारः प्रयोज्यः, यथा शंखः पाण्डुर एवेत्यत्र कस्मिंश्चिच्छंखे पाण्डुरत्वाभावे प्रसक्ते तन्निवृत्तिज्ञापनायायमेवकारः, शंखत्वव्यापकपाण्डुरत्वाभावाभावप्रतियोगिकसमवायसम्बन्धेन पाण्डुरत्वाभावभाववान् शंख इति बोधः अत्र भवति. विशेषणसङ्गतत्वञ्च विशेषणवाचकपदाव्यवहितोत्तरवर्तित्वम्। अत्यन्तायोगव्यवच्छेदो नाम, अत्यन्तमयोगः अत्यन्तायोगः. विशेष्यतावच्छेदकावच्छेदेन विशेषणसम्बन्धाभावः तस्य व्यवच्छेद इति व्युत्पत्त्या प्रकृतविशेष्यनिष्ठान्यन्तविशेषणसम्बन्धाभावाभाव इति फलितम्, विशेष्यतावच्छेदकधर्मावच्छेदेन विशेषणाभावे प्रसक्ते तन्निवृत्तिज्ञापनाय क्रिया: क्रियासङ्गतैवकारः प्रयोज्यः, क्रियासङ्गतत्वञ्च क्रियावाचकपदाव्यवहि[illegible]रितत्वम्, यथा नीलमुत्पलं भवत्येवेत्यत्र उत्पल[illegible]भावे प्रसक्ते तन्निवृत्तिज्ञापनायायमेवकारः, [illegible]लत्वा[illegible]वाभाववदिति सामानाधिकरण्येन बोधः। [illegible]रणमेव पङ्कजमित्यत्र एवकारस्याभेदप्रकारकारोपविषयत्वंअर्थः, तथाच चरणाभेदप्रकारकारोपविशेष्यं पङ्कजं इति बोधः॥

एवकारसमभिव्याहृतसप्तविभक्तिस्थलेषु शाब्दबोधप्रकारः इत्थम्, चैत्र एव मैत्रं ताडयतीत्यत्र चैत्रः मैत्रकर्मकताडनकर्ता चैत्रान्यः मैत्रकर्मकताडनकर्तृत्वाभाववानिति बोधः। कामी कान्तामेव कामयते इत्यत्र कान्ताविषयकेच्छावान् कान्तान्यविषयकेच्छाभाववांश्च कामीति बोधः। कुठारेणैव छिनत्ति वृक्षमित्यादौ कुठारकरणकवृक्षकर्मकच्छेदनकर्ता कुठारान्यकरणकवृक्ष

कर्मकच्छेदनकर्तृत्वाभाववांश्च अयं पुरुष इति बोधः। ब्राह्मणायैव गां ददातीत्यत्र ब्राह्मणेतरोद्देश्यकगोकर्मकदानकर्ता ब्राह्मणेतरोद्देश्यकगोकर्मकदानकर्तृत्वाभाववांश्चायमिति बोधः। मृत्योरेव बिभेतीत्यत्र मृत्युभिन्नजन्यभयाभाववान् मृत्युजन्यभयवांश्चायमिति बोधः। चैत्रस्यैवेदं गृहमित्यत्र चैत्रेतरासम्बन्धि चैत्रसम्बन्धि चेदं गृहमिति बोधः। द्रव्यमेव गुण इत्यत्र द्रव्येतरानिरूपितवृत्तित्वाभाववान् द्रव्यनिरूपितवृत्तितावांश्च गुण इति बोधः। एषु सप्तविभक्तिस्थलेषु विद्यमानस्य एवकारस्य अन्ययोगव्यवच्छेद एवार्थः, अन्ययोगव्यवच्छेदबोधकैवकारस्थलेषु सर्वत्रापि भावाभावयोरुभयोरप्यन्वयः अपेक्षितः, अभावमात्रान्वयाङ्गीकारे गगनस्य केनापि सम्बन्धेन द्रव्यवृत्तित्वेन द्रव्याभिन्ननिरूपितवृत्तित्वाभावस्यापि गगनेऽक्षतत्वेन वृक्षो गगनमित्याकारकप्रामाणिकव्यवहारापत्तिः, अतो भावान्वयावश्यकता। भावमात्रान्वयाङ्गीकारे द्रव्यवृत्तित्वस्य सत्तायामक्षतत्वेन द्रव्य एव सत्तेति प्रामाणिकव्यवहारापत्तिः, अतः अभावान्वयः अवश्यमङ्गीकर्तव्यः। मात्रपदस्य एवकारसमानार्थकत्वं कुत्रचित् परिदृश्यते, यथा, मृत्युमात्रात् बिभेत्ययं पुरुषः, चक्षुर्मात्रेण गृह्णाति रूपम्, कामी कान्तामात्रं कामयते इत्यादौ, इत्यलं विस्तरेण॥

सर्वं श्रीपरमेश्वरार्पणमस्तु

श्रीमत्तेनालि संस्कृत विद्याशालायां तर्कालङ्कार शास्त्रा
ध्यापकेन कुरगंटुपाटिय श्रीरामशास्त्रिणा बु
भुत्सूनां न्यायशास्त्रीयपदार्थस्य सुखा
वबोधाय रचितः पारिभाषिकपदा
र्थ सङ्ग्रहस्समाप्तिमगमत्

श्री श्री श्री

[illegible]नोथका [illegible]

नि[illegible]रम् ।

[illegible] [illegible] फुत्वलस्य



श्रीगणेशाय नमः

तर्कसंग्रहसर्वस्वे

प्रत्यक्षपरिच्छेदप्रारम्भः

प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमाचरितं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् प्रेक्षावत्प्रवृत्तिप्रयोजकीभूतमनुबन्धचतुष्टयं दर्शयन् चिकीर्षितं प्रतिजानीते निधायेति। अनुबन्धचतुष्टयञ्च विषयप्रयोजनसम्बन्धाधिकारिरूपम् भवति तत्र तर्कसङ्ग्रहपदेन द्रव्यादिपदार्थरूपविषयः प्रतिपाद्यप्रतिपादकभावरूपसम्बन्धश्च निर्दिष्टौ. बालानामित्यनेनाधिकारी. सुखबोधायेत्यत्र पदार्थतत्वज्ञानरूपप्रयोजनञ्च निर्दिष्टम्।

ननु शिष्टाचारात् ग्रन्थादौ मङ्गलस्य कर्तव्यत्वेपि केवलस्येश्वरध्यानस्य गुरुवन्दनस्य वा केवलस्य पर्याप्तत्वेन उभयादरे किं बीजमितिचेन्न, केवलेश्वरध्यानमात्रादरे ॥श्लो॥ यस्य देवे परा भक्तिः यथा देवे तथा गुरौ, इति स्मरणात् गुरुवन्दनस्यापि कर्तव्यताप्राप्त्या तदभावे गुरुतिरस्कारः प्रसज्येतेति तदादरणम्। गुरुवन्दनमात्रादरे प्रत्यक्षमेकं चार्वाका. इति चार्वाकादीनां प्रत्यक्षमात्राङ्गीकर्तृत्वेन तन्मतेऽनुमानादिप्रमाणसिद्धेश्वराद्यनङ्गीकरणात् तन्मते गुरुवन्दनादीनामेवेश्वरध्यानादिस्थानीयतया अत्र गुरुवन्दनमात्रादरे एतन्मतेपीश्वराद्यनङ्गीकरणं तेषांमिति प्रसज्येत

ग्रन्थप्रारम्

तत्प्रसक्तौ च अत्र आस्तिका न प्रवर्तेरन् इति विश्वेश्वरध्याना दरणम् ॥

निधायेतिश्लोकस्य शाब्दबोधप्रकार इत्थम्, निधाय हृदि विश्वेशमित्यत्र ॥ निपूर्वकधाधातोः ध्यानमर्थः, तदुत्तरवर्तिल्यपः उत्तरकालिकत्वम्, हृत्पद्मं मनःपरम्, सप्तम्यर्थः (सप्तम्यधिकरणे) इति सूत्रादधिकरणत्वम्, विश्वस्येश इत्यत्र षष्ठ्याः निरूपितत्वम्, ईशशब्दस्य नियामकतावानर्थः, तादृशनिरूपितत्वस्य नियामकतायां स्वरूपसम्बन्धेनान्वयः, ईशमित्यत्र द्वितीयायाः कर्मत्वम्, तच्चात्र विषयतारूपम्, (सविषयार्थबोधकधातुसमभिव्याहृत द्वितीयार्थीभूतकर्मत्वं विषयतारूपम्, इति न्यायात्, हृच्छब्दो त्तरवर्ति[illegible]भूताधिकरणत्वस्य धाधात्वर्थीभूतध्याने निरूप [illegible], तथाच हृदधिकरणकविश्वनिरूपितकारण [illegible]कध्याने[illegible]त्तरकालिकीतिफलितम् । विधाय गुरुवन्दन मित्यत्र ॥ विपूर्वकधाधातोः विधानमर्थः, तत्र ल्यपः उत्तरकालिकत्वं, गुरूणां वन्दनमित्यत्र षष्ठ्याःकर्मत्वं, द्वितीयायाः विषयत्वम्, तस्य विपूर्वकधाधात्वर्थीभूतकृतौ निरूपकत्वसम्बन्धेनान्वयः, तथाच गुरूद्देश्यकवन्दनविषयककृत्युत्तरकालिकीति फलितम्। बालानां सुखबोधायेत्यत्र॥बालानामित्यत्र षष्ठ्याः समवेतत्वम्, सुखबोधः अनायासपूर्वकपदार्थतत्वज्ञानम्, चतुर्थ्याः प्रयोजकत्वं, तथाच बालसमवेतानायासपूर्वकबोधफलिकेति फलितम्, क्रियते तर्कसङ्ग्रह इत्यत्र॥मयेत्यध्याहार्यं, अस्मच्छब्दस्याश्रयः, तृतीयायाः समवेतत्वं, कृञ्धातोः कृतिरर्थः, तदुत्तरव

स्याख्यातस्य वर्तमानकालिकत्वं विषयत्वञ्चार्थः, तर्क्यन्ते प्रतिपाद्यन्त इति तर्काः पदार्थाः, तेषां सङ्ग्रहः संक्षेपेण स्वरूपकथनं, समवेतत्वस्य वर्तमानकालिकत्वस्य च कृतावन्वयः, कृतेः निरूपितत्वसम्बन्धेन विषयतायां विषयतायाः तर्कसङ्ग्रहे स्वरूपसम्बन्धेनचान्वयः, अयं कैश्चिदखण्डशाब्दबोध इति व्यवह्रियते, वस्तु तस्तु, अस्य सूरिज्ञानत्वव्यवहारस्समुचितः। अखण्डशाब्दबोधप्रकारास्त्वित्थम्, हृदधिकरणकाविश्वनिरूपितकारणतावाद्विषयकध्यानोत्तरकालिकी, गुरूद्देश्यकचन्दनविषयककृत्युत्तरकालिकी, बालसमवेतानायासपूर्वकपदार्थतत्वज्ञानफलिका, अन्नंभट्टसमवेता, वर्तमानकालिकी, या कृतिः तादृशकृतिविषयः तर्कसङ्ग्रहः इति॥

* अन्नम्भट्टकृततर्कसङ्ग्रहाख्यमूलग्रन्थप्रारम्भः *

मूलग्रन्थः॥

निधाय हृदि विश्वेशं, विधाय गुरुवन्दनम्।
बालानां सुखबोधाय, क्रियते तर्कसङ्ग्रहः॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः/पदार्थान्विभजते-द्रव्येति॥

ननु सामान्यलक्षणज्ञानाभावे विशेषजिज्ञासा नोदेति, विशेषजिज्ञासाभावे विशेषविभागोऽनुपपन्नः, यथा, अत्रैव गन्धवती पृथिवीत्यनेन पृथिव्याः गन्धवत्वरूपसामान्यलक्षणकथनानन्त

विजातीयज्ञानानन्तरितसजातीयज्ञानपरम्परा ध्यानम्।
ननु ध्यानस्य पर्यवसाने ज्ञानरूपतया एतन्मते आत्मनः एव ज्ञा

रमेव वा कतिविधेति विशेषजिज्ञासाया उदयात् तन्निवृत्त्यर्थं मित्याभित्याचेति विशेषविभागः कृतः, तथाच पदार्थविभागा त्प्राक् पदार्थसामान्यलक्षणस्यानिरूपणेन पदार्थविभागोऽनुपपन्न इति चेन्न, विभागवाक्यघटकपदार्थपदमेव पदस्यार्थः पदार्थ इति व्युत्पत्त्या अभिधेयत्वरूपसामान्यलक्षणं बोधयतीति नानु पपत्तिः। ननु विभागवाक्यघटकपदार्थपदस्य विभागवाक्यान्ता चरितत्वेन सामान्यलक्षणस्य विभागवाक्यात्प्रागप्रतिपादकत्वे न अनुपपत्तिः तदवस्थैवेति वाच्यम्, अग्निहोत्रं जुहोति यवागूं पचतीत्यत्रेव पाठक्रमादर्थक्रमस्य प्राबल्यमङ्गीकृत्य विभागवा क्यान्तराचरितपदार्थपदस्य प्रथमं योजनयाऽनुपपत्तिर्वारणी या, योजनाप्रकारश्च, पदार्थाः द्रव्यगुणकर्मसामान्यविशेषसम वायाभावाख्यसप्तेति, अथवा, पूर्वोक्ततर्कसङ्ग्रहपदेनैव पूर्वोक्तव्यु त्पत्त्या प्रतिपाद्यत्वरूपसामान्यलक्षणं विभागवाक्यात्प्रागेव ल भ्यत इति नानुपपत्तिः॥

पदार्थविभागवाक्यस्य शाब्दबोधप्रकार इत्थम्, अत्र द्र व्यादिपदं भावप्रधाननिर्देशेन द्रव्यत्वादिपरम्, सप्तपदस्य विभा जकधर्मसप्तकान्यतमवति लक्षणाङ्गीकार्या, द्रव्यत्वादीनां विभा जकधर्मसप्तकान्यतमत्वावच्छिन्नेऽभेदसम्बन्धेनान्वयः, तथाच द्रव्यत्वगुणत्वकर्मत्वसामान्यत्वविशेषत्व समवायत्वाभावत्वरूप विभाजकधर्मसप्तकान्यतमवदभिन्नाः पदार्था इति शाब्दबोधः

नाधिकरणत्वेन हृदधिकरणकत्वं ध्याने न सम्भवतीति चेन्न; स मानयसम्बन्धेन हृदधिकरणकत्वं ज्ञाने न निषेध्यते, किन्तुहृद

(विभागवाक्यघटकपदार्थतावच्छेदकधर्माः विभाजकधर्माः), सप्तपदं तु अतिरिक्तपदार्थव्यवच्छेदे पर्यवसन्नम्। ननु द्रव्यादिपदानां द्रव्याद्यर्थकत्वस्वीकारेणैव सामंजस्ये द्रव्यत्वादिपरत्वमफलमिति चेन्न, कस्मिन्नपि पदार्थे द्रव्यादिसप्तकाभेदस्य असम्भवेन तत्परत्वमङ्गीकृत्य तादृशार्थोभग्यावश्यमङ्गीकर्तव्यत्वात्॥

मूलम्— तत्र द्रव्याणि, पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव॥ रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः चतुर्विंशतिः गुणाः॥ उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि [illegible] कर्माणि॥

[illegible] यम [illegible] सम्बन्धेना [illegible] त्वाच्च

द्रव्याणि विभजते नवेति, तच्छब्देन [illegible] सप्तपदं विशेषा इति बोध्यः। [illegible] यन्ते, तल्प्रत्ययस्य घटकत्वमर्थः, अत्रापि पृथिव्यादिपदं [illegible] समवाय इति [illegible] त्वादिपरम्, नवपदस्य विभाजकधर्मनवकान्यतमवति लक्षणा, [illegible] वात् तथा च पृथिवीत्वाप्त्वतेजस्त्ववायुत्वाकाशत्वकालत्वदिक्त्वात्मत्वमनस्त्वरूपविभाजकधर्मनवकान्यतमवन्ति सप्तपदार्थघटकीभू

धिकरणकत्वस्य विश्वेश्वरेऽन्वये स्वविषयकज्ञानजनकत्वसम्बन्धेन तस्यान्वयः कर्तव्यः, स्वपदं विश्वेश्वरपरं तस्य ध्यानेऽन्वये तु स्वाश्रयसंयुक्तत्वसम्बन्धेन तस्यान्वयो वक्तव्यः, स्वपदं ध्यानपरम्। यद्वा जनकत्वसम्बन्धेन हृदधिकरणकत्वस्य ध्यानेऽन्वयः कार्यः। अथवा, हृत्पदेनात्मैव लक्ष्यते, हृत्पदशक्यमनस्सम्बन्धरूपलक्षणाया आत्मनि सत्त्वात्। यद्वा, हृदीत्यत्र सप्तम्या जन्यत्व

तानि द्रव्याणि इति शाब्दबोधः। नवपदं नमःप्रभृत्यधिकद्रव्य व्यवच्छेद एव पर्यवसन्नम्। नन्वत्रापि द्रव्यादीनां सामान्यलक्ष णान्यनिरूप्य तेषां विभागकरणेन ग्रन्थकर्तुः न्यूनत्वमिति चेत्, पदार्थविभागवाक्येनैव व्यावहारिकाणां द्रव्यत्वादिसामान्यलक्ष णानां लभ्यत्वेन न काचिदनुपपत्तिः॥ गुणान् विभजते रूपेति, अन्वयक्रमः पूर्ववत्, अखण्डशाब्दबोधस्तु, रूपत्वरसत्वगन्धत्व स्पर्शत्व संख्यात्वपरिमाणत्वपृथक्त्वसंयोगत्वविभागत्वपरत्वा परत्वत्वगुरुत्वत्वद्रवत्वत्वस्नेहत्वशब्दत्व बुद्धित्व सुखत्व दुःखत्वे च्छात्वद्वेषत्वप्रयत्नत्व धर्मत्वाधर्मत्वसंस्कारत्वरूप विभाजकधर्म चतुर्विंशत्यन्यतमवन्तो गुणा इति। अत्रापि चतुर्विंशतिपदं लघु त्वमृदुत्वाद्यतिरिक्तगुणव्यवच्छेदार्थमेवेति ज्ञेयम्॥ कर्म विभजते उत्क्षेपणेति, उत्क्षेपणत्वापक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्व रूपविभाजकधर्मपञ्चकान्यतमवन्ति कर्माणीति शाब्दबोधः। पञ्चपदं उत्क्षेपणाद्यतिरिक्तकर्मव्यवच्छेदार्थमेव, अन्वयक्रमः पूर्व व

न्वयो वक्तव्यः, तस्य ध्यानेन्वयः कार्यः॥ नन्वेवं हृत्पदस्याव्या वर्तकतापत्तिः, ज्ञानमात्रस्य मनोजन्यत्वेन तज्जन्यत्वकथनस्य नि ष्फलत्वादितिचेन्न, हृत्पदस्य हृदयरूपशरीरावयवार्थकत्वेन निपू र्वकध्याधातोः वृत्तित्वप्रकारकाहार्यज्ञानार्थकत्वेन सप्तम्या निरूपि तत्वार्थकत्वेन च शरीरावयवरूपहृदयनिरूपितवृत्तित्वप्रकारका हार्यज्ञानोत्तरकालिकत्वस्य कृतौ लाभात् न कस्याप्यव्यावर्तकत्व शंकाप्रशक्तिः॥ स्वोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारो वन्दनम्॥

मूलम् सामान्यं द्विविधं परमपरञ्चेति । नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव । समवायस्त्वेक एव । अभावश्चतुर्विधः, प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावश्चेति ॥

सामान्यं विभजते सामान्यमिति. विभागवाक्येच विभाजकधर्मद्वयान्यतरत्वे लक्षणा स्वीकार्या. (द्विपदं तात्पर्यग्राहकम्, अन्वयक्रमः पूर्ववत्. तथाच परत्वापरत्वरूपविभाजकधर्मद्वयान्यतरवत्सामान्यमिति बोधः । घटत्वपटत्वादिजातीनामपरत्वमेव, सत्ताजातेः परत्वमेव, द्रव्यत्वपृथिवीत्वादिजातीनां परत्वापरत्वे उभेऽपि सम्भवत इति ज्ञेयम् ॥ विशेषानाह नित्यद्रव्येति पृथिव्यादिचतुष्टयपरमाणवः आकाशादिपञ्चकञ्च नित्यद्रव्याणि. नित्यद्रव्येषु वृत्तय इत्यत्र सप्तम्याः निरूपितत्वमर्थः, वृत्तयः वृत्तिमन्तः, निरूपितत्वस्य वृत्तौ स्वरूपसम्बन्धेनान्वयः, तथाच नित्यद्रव्यनिरूपितवृत्तितावन्तः असंख्याकाः विशेषा इति बोधः। समवायमाह समवायेति, एकत्वविशिष्टाभिन्नस्समवाय इति बोधः। समवायगतैकत्वं न संख्यारूपम् द्रव्येतरवृत्तित्वात्, किन्तु यथाश्रुते स्वसजातीयधर्म्यन्तररहितत्वरूपं तत् ज्ञेयम्,

---

ग्रहणधारणपटुः बालः॥ सङ्ग्रहः संक्षेपेणस्वरूपकथनं, तच्च बहुतरार्थबोधकन्यूनसंख्याकशब्दसन्दर्भः ॥

[illegible] गन्धवती पृथिवीत्यत्र शाब्दबोधप्रकारः॥ गन्धोऽस्यामस्तीति गन्धवती, इदंशब्देन पृथिवी प्रतिपाद्यते, सप्तम्यां अधिकरण

समवायान्तरस्याभावेन स्वसजातीयधर्म्यन्तरराहित्यत्वं सम्भव स्येव। अभावं विभजते प्रागभाव इति, अन्वयक्रमः पूर्ववदेव, प्रागभावत्वप्रध्वंसाभावत्वात्यन्ताभावत्वान्योन्याभावत्वरूपविभाजकधर्मचतुष्टयान्यतमवान् अभाव इति शाब्दबोधः॥

मूलम् तत्र गन्धवती पृथिवी॥

पृथिवीं लक्षयति गन्धवतीति, तच्छब्देन नवद्रव्याणि प्रतिपाद्यन्ते, त्रल्प्रत्ययस्य घटकत्वम्, (निपातातिरिक्तनामार्थयोरभेदसम्बन्धेनान्वयः, इति न्यायेन नवद्रव्यघटकीभूता गन्धाधिकरणाभिन्ना पृथिवीति शाब्दबोधः। पृथिव्याः किंवा लक्षणमित्युक्तौ गन्धवत्वं लक्षणम्, गन्धवत्वञ्च गन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वम्, अत्र गन्धः आधेयः पृथिवी अधिकरणं, गन्धे आधेयता वर्तते पृथिव्यामधिकरणता वर्तते, आधेयताया अधिकरणतायाश्च निरूप्यनिरूपकभावः सम्बन्धः, स च कश्चन

त्वम्, अस्धातोराधेयत्वं, तदुत्तरवर्तितिप्प्रत्ययस्याश्रयत्वम्, पृथिव्याः अधिकरणत्वे आधेयत्वसम्बन्धेनान्वयः, पृथिवीनिष्ठाधिकरणतायाः आधेयत्वे निरूपकत्वसम्बन्धेनान्वयः, तिबर्थाश्रयत्वस्य स्वरूपसम्बन्धेन गन्धेऽन्वयः, तथाच पृथिवीनिष्ठाधिकरणतानिरूपकाधेयताश्रयो गन्ध इति विग्रहवाक्यजन्यो बोधः, (विग्रहवाक्याद्यादृश विशेषणविशेष्यभावापन्नपदार्थविषयकबोधो जायते समासवाक्यात्तद्विपरीतबोधो जायते, इति नियमानुरोधेन गन्धवतीति समासवाक्यात् तद्विपरीतः गन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयाभिन्ना पृथिवीति शाब्दबोधो जायते॥

स्वरूपसम्बन्धविशेषः, तथाच गन्धनिष्ठा या आधेयता पृथिव्यां गन्धोऽस्तीत्याकारकप्रतीतिसिद्धा गन्धनिष्ठाऽधेयता, तन्निरूपिता या अधिकरणता पृथिवीनिष्ठाऽधिकरणता, तदाश्रया पृथिवी तदाश्रयत्वं पृथिव्यां वर्तत इति लक्ष्ये लक्षणसमन्वयः। नन्वेवं सति कालेऽतिव्याप्तिः, सर्वाधारः काल इत्याकारकन्यायेन कालिकसम्बन्धेन कालस्य सर्वाधारत्वेन गन्धस्यापि सर्वान्तर्गतत्वेन गन्धनिष्ठा या आधेयता इत्युक्ता कालिकसम्बन्धावच्छिन्ना गन्धनिष्ठाऽधेयता गृह्यते, तन्निरूपिता या अधिकरणता इत्युक्ता कालनिष्ठाधिकरणता, तदाश्रयत्वस्य काले वर्तमानत्वादिति चेन्न, तद्वारणाय गन्धनिष्ठाधेयतायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात्, तन्निवेशे च कृते कालिकसम्बन्धेन गन्धस्य विद्यमानत्वेन कालिकस ... पुष्पादिवृत्ति ... ल्वेन गन्धनिष्ठ ... त्यजाति ... पृथिवीलक्षणे, आधेयतात्वेन ... गत। ... गन्धनिष्ठाधेयत्वनि... धिकरणतां च अप्रवेश्य गन्धनिष्ठा या तन्निरू... ...निरूपिताधि करणत्वमित्येतावत एव लक्षणत्वस्वीकारे गन्धनिष्ठाधिकरणता ... ताधेयतामादाय गन्धत्वेऽतिव्याप्तिप्रसङ्गः। समवायिसम्बन्धावच्छिन्ना गन्धनिष्ठा या तन्निरूपिता या इति निवेशे तु समवायसम्बन्धावच्छिन्नगन्धनिष्ठप्रकारतानिरूपितप्रकारितामादाय गन्धवती पृथिवीतिज्ञानेऽतिप्रसङ्गः, अतः आधेयतात्वादिना आधेयत्वादिनिवेशः कार्यः। गन्धनिष्ठा या तन्निरूपिता या अधिकरणता तदाश्रयत्वमिति लक्षणाङ्गीकारे तु स्वनिष्ठाधेयतानिरूपितत्ववत् स्वनिरूपितत्वस्याप्यधिकरणतायामङ्गीकृतत्वेन गन्धनिष्ठलक्षणतानिष्ठाधेयतानिरूपिताधिकरणत्वस्यैव गन्धनिष्ठलक्षण-

धेयतानिरूपिताधिकरणताश्रयत्वस्य विद्यमानत्वेपि काले सम
वायसम्बन्धेन गन्धाभावेन समवायसम्बन्धावच्छिन्नगन्धनिष्ठा
धेयतानिरूपिताधिकरणताश्रयत्वाभावेन अतिव्याप्तेरभावात् ।
नचैवमपि जलादावतिव्याप्तिः, कथम्, गन्धे द्वे आधेयते वर्तेते
एका गन्धत्वावच्छिन्ना अपरा गुणत्वावच्छिन्ना, तत्र गन्धनिष्ठा
या आधेयता इत्युक्तौ गुणत्वावच्छिन्नाधेयता गृह्यते, एकाश्रया
वच्छिन्नाधेयता एकैवेति न्यायेन गन्धशीतस्पर्शादिनिष्ठाया गुण
त्वावच्छिन्नाधेयताया एकत्वात्, तन्निरूपिता याऽधिकरणता
जलादिनिष्ठाधिकरणता, तदाश्रयत्वस्य जलादौ विद्यमानत्वादि
ति वाच्यम्, तस्यामेवाधेयतायां गन्धत्वावच्छिन्नत्वस्यापि निवे
शनीयत्वात्, तन्निवेशे तु जलादौ शीतस्पर्शादिगुणानां सत्वेन
गुण[illegible]त्वावच्छिन्नाधेयतानिरूपिताधिकरणताश्रयत्वस्य सत्वेपि ग

त[illegible]धिकरणत्वस्यापि गन्धे सत्वात्तत्रातिव्याप्तिप्रसङ्गः,
[illegible]स[illegible]त्वावच्छिन्ना गन्धनिष्ठा या तन्निरूपिता या अधि
[illegible]ति ल[illegible]णकरणेपि गन्धनिष्ठसमवायसम्बन्धावच्छिन्नलक्ष
णतानिरूपिताधिकरणतामादाय गन्ध एवातिप्रसङ्गः, अतः आ
धेयतात्वेनाधेयता प्रवेशनीया । गन्धनिष्ठाधेयतानिरूपिता या
तदाश्रयत्वमिति लक्षणकरणे तु गन्धनिष्ठाधेयतानिरूपितावच्छे
दकतामादाय गन्धत्वेतिप्रसङ्गः, आधेयतायां समवायसम्बन्धा
वच्छिन्नत्वनिवेशेपि एनामाधेयतावच्छेदकतामादायैव गन्धत्वे
तिव्याप्तिर्वक्तव्या, अतः अधिकरणतात्वेनाधिकरणता प्रवेशनी
या । ननुगन्धनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वमिति निष्कृ
ष्टलक्षणेपि (स्वनिष्ठाधेयतानिरूपितत्ववत् स्वनिरूपितत्वमप्यधि

न्धस्याभावेन गन्धत्वावच्छिन्नाधेयतानिरूपिताधिकरणताश्रयत्व स्याभावेन अतिव्याप्तेरभावात्। ननु तथापि उत्पन्नविनष्टघटा दावव्याप्तिः, (उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठतीति, न्या येन उत्पत्तिक्षणे तत्र गुणस्यानुत्पन्नत्वेन द्वितीयक्षणे घटस्यैव न ष्टत्वेन समवायसम्बन्धावच्छिन्नगन्धनिष्ठाधेयतानिरूपिताधिकर णताश्रयत्वस्याभावात्, नचैव नियमो नाङ्गीक्रियत इति वाच्यम्, उत्पत्तिक्षण एव द्रव्ये गुणादिस्वीकारे द्रव्यस्य स्वगतगुणादिकं प्रति कारणत्वाभावप्रसङ्गः द्रव्यस्य तदा गुणादिपूर्ववृत्तित्वाभा वात् इति वाच्यम्, समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नग न्धनिष्ठाधेयतानिरूपिताधिकरणतावद्वृत्तिजातिमत्त्वस्य लक्षणत्वे न विवक्षितत्वात्, उत्पन्नविनष्टघटे समवायसम्बन्धेन गन्धाश्रय त्वविरहेऽपि तादृशाधिकरणतावत्पृथिव्यादिवृत्तिपृथिवीत्वजातिम

करणतायां सम्भवतीति, न्यायानुसारेण गन्धनिष्ठाधेयत्वनिष्ठा धेयतानिरूपिताधिकरणत्वस्यैव गन्धनिष्ठाधेयतानिरूपिताधिकर णत्वस्यापि गन्धे सत्वादतिव्याप्तिस्सम्भवतीति चेन्न, गन्धनिष्ठा धेयत्वनिष्ठाधेयत्वानिरूपिता गन्धनिष्ठाधेयतानिरूपिता या अधि करणता तदाश्रयत्वमिति वा गन्धनिरूपिताधिकरणत्वमिति वा लक्षणाङ्गीकरणे निरुक्तदोषाभावात् इति॥

उत्पन्नविनष्टघटेऽव्याप्तिवारणाय समवायस्वसमवायिसम वेतत्वान्यतरसम्बन्धेन गन्धविशिष्टत्वमिति लघुलक्षणं वा परि ष्करणीयम्, तथाच उत्पन्नविनष्टघटे समवायसम्बन्धेन गन्धा भावेपि स्वसमवायिसमवेतत्वसम्बन्धेन गन्धविशिष्टत्वं सम्भव तीति नाव्याप्तिः, स्वपदं अवयवगतगन्धपरं बोध्यम्, प्रथमस

त्वस्य उत्पन्नविनष्टघटेऽपि विद्यमानत्वेनाव्याप्त्यभावात् । अतएव सुरभ्यसुरभ्यन्यतरवारणद्वयेऽपि नाव्याप्तिः ॥

नन्वेवमपि जलादावतिव्याप्तिः तदवस्थैव, तादृशाधिकरणतावत्पुष्पादिवृत्तिसत्तारूपजातिमत्त्वस्य जलादावपि सत्त्वादिति वाच्यम्, जातौ गन्धसामानाधिकरण्यस्येव द्रव्यत्वव्याप्यत्वस्यापि निवेशनीयत्वात्, तन्निवेशे तु सत्ताजातेः द्रव्यत्वाभाववद्गुणादिवृत्तित्वेन द्रव्यत्वाभाववदवृत्तित्वरूपव्याप्यत्वस्याभावेन न तां जातिमादायातिप्रसक्तिः । नन्वेवमपि गन्धसमानाधिकरणद्रव्यत्वाभाववदवृत्तिद्रव्यत्वजातिमत्त्वस्य जलादौ सत्त्वात् पुनरप्यतिव्याप्तिः तत्र दुर्वारेति वाच्यम्, तत्र व्याप्यत्वं न तद्

स्वन्धानुपादाने परमाणुषु द्वितीयसम्बन्धानुपादाने उत्पन्नविनष्टघटे चाव्याप्तिरित्युभयोपादानम् । अस्मिन् लक्षणे जातिघटितलक्षणकरणावश्यकता नास्ति ॥

☞ सा द्विविधा नित्याऽनित्या चेत्यत्र, अत्र नित्यत्वानित्यत्वरूपविभाजकधर्मद्वयान्यतरवती पृथिवीति शाब्दबोधाङ्गीकारे घटः द्विविधः नित्योऽनित्यश्चेति वाक्यस्य प्रामाण्यापत्तिः, अत्रापि विषयस्याबाधितत्वात्, अतः तद्वारणाय उद्देश्यतावच्छेदकसामानाधिकरण्यस्य विधेयभूतविभाजकधर्मेषु सर्वेष्वप्यन्वयोऽङ्गीकार्यः, अत्र घटत्वसामानाधिकरण्यस्य नित्यत्वेऽभावान्नापत्तिः । एवमपि घटो द्विविधः पृथिवी द्रव्यं चेति वाक्यस्य प्रामाण्यापत्तिर्दुर्वारा, तद्वारणाय उद्देश्यतावच्छेदकव्याप्यत्वस्य विधेयभूतविभाजकधर्मान्यतरत्वावच्छिन्ने (अन्यतमत्वावच्छिन्ने) अन्वयः

भावदवृत्तित्वरूपं निवेश्यते, किन्तु (न्यूनदेशवृत्तित्वरूपं) तद्र धिकरणवृत्तिभेदप्रतियोगितावच्छेदकत्वरूपं तत् निवेश्यते. त थाच द्रव्यत्वाधिकरणं घटः तद्वृत्तियों भेदः द्रव्यं नेत्याकारकप्र तीतिसिद्धो भेदः न सम्भवति, किन्तु पटो नेति भेदः तत्प्रतियो गितावच्छेदकीभूता जातिः पटत्वादिजातिरेव न तु द्रव्यत्वजातिः द्रव्यत्वाधिकरणं सत्तावत्त्वेनभेदस्याप्यसम्भवेन सत्ताजातिरपि तद्वृत्तिभेदप्रतियोगितावच्छेदकीभूता न भवति. अतः सत्ताजा ति द्रव्यत्वजातिश्चाऽऽदाय जलादौ नातिव्याप्तिः। नच तथापि जातित्वेन जातिमनिवेश्य गन्धसमानाधिकरणः द्रव्यत्वव्याप्यो यो धर्मः तादृशधर्मवत्त्वं इत्येतावदेव लक्षणं भवत्विति वाच्यम्, द्रव्यत्वाधिकरणाकाशादिनिष्ठभेदप्रतियोगितावच्छेदकत्ववृथि

अङ्गीकार्यः। एवमपि द्रव्यं द्विविधं घटः पटः ..त माण्यापत्तिः. तद्वारणाय उद्देश्यतावच्छेदकं व्यापक नित्यानित्यपदे नित्य वोक्तिः अन्यतरत्वावच्छिन्ने (अन्यतमत्वावच्छिन्ने) भानमङ्गीकार्य ...द्योतकः, वि म्। एवमपि नटो द्विविधः कंबुग्रीवादिमानन्द्रश्चेति वाक्यस्य प्रामाण्यापत्तिः, तत्र निरुक्तव्याप्यत्वव्यापकत्वसामानाधिकर ण्यानामबाधितत्वात्, अतस्तद्वारणाय विभाजकधर्मेषु परस्पर विरुद्धत्वस्यापि भानमङ्गीकार्यमेव। विधेयभूतयोर्विभाजकधर्मेषु उद्देश्यतावच्छेदकसामानाधिकरण्यभानाङ्गीकारेण घटो द्विविधः पृथिवी जलञ्चेत्याद्यापत्तेः दुरुपपादतया विभाजकधर्मेषु परस्पर विरुद्धत्वभानाङ्गीकारेण घटो द्विविधः पृथिवी द्रव्यञ्चेत्याद्यापत्ते रपि दुरु..दतया व्याप्यत्वभानाङ्गीकारावश्यकता नास्ति। अत एव नित्यत्वानित्यत्वयोः पृथिवीत्वाभाववज्जलादिवृत्तित्वेन व्या

वीजलान्यतरत्वरूपधर्ममादाय जलादावतिप्रसङ्गात्। नच सम वायेन तादृशधर्मवत्वं निवेश्यते, तादृशान्यतरत्वस्य भेदरूपतया स्वरूपसम्बन्धेनैव तस्य जलादौ विद्यमानतया समवायसम्बन्धे न तादृशधर्मवत्वस्य जलादावविद्यमानत्वेन अतिप्रसङ्गाभावाद कत्वेन च एतदर्थं लक्षणमुच्यत इति वाच्यम्, द्रव्यत्वाधिकरणं वाय्वादिः, तद्वृत्तियों भेदः पृथिवीजलसंयोगवान्नेति भेदः, तत्प्र तियोगितावच्छेदकोभूतः गन्धसमानाधिकरणो यो धर्मः पृथि वीजलसंयोगरूपो धर्मः, समवायसम्बन्धेन तादृशधर्मवत्वस्य ज लादौ सत्वादतिव्याप्त्यापत्तेः, जातित्वेन जातिनिवेशे तु पृथि वीजलान्यतरत्वरूपस्य पृथिवीजलसंयोगरूपस्य वा धर्मस्य जाति रूपत[illegible]भावे[illegible] जलादावतिव्याप्त्यभावात्। पृथिव्यां लक्षणसम

[illegible] नित्यानित्यपदयोः नित्यानित्यपृथिवीत्वपरत्वमा [illegible]मत्यपि प्रत्युक्तम्। तथाच प्रकृते पृथिवीत्वव्यापकं यत् [illegible]नित्यत्वाविरुद्धपृथिवीत्वसमानाधिकरणनित्यत्व नित्यत्वाविरुद्ध पृथिवीत्वसमानाधिकरणानित्यत्वरूपविभाजकधर्मद्वयान्यतरत्वा वच्छिन्नं तद्विशिष्टा पृथिवीति शाब्दबोधः, सामानाधिकरण्यस्य प्रत्येकं यावद्विभाजकधर्मेषु व्यापकत्वस्य अन्यतरत्वावच्छिन्नेऽचा न्वयः। सामानाधिकरण्यस्य व्यापकत्वस्य च प्रकारविधया सं सर्गविधया वा भानमङ्गीकार्यम्॥

☞ शरीरेन्द्रियविषयभेदादित्यत्र शाब्दबोधप्रकारः, पुनश्श ब्दः पूर्वोक्तविभाजकधर्मभेदबोधकः, भेदः परस्परभिन्नार्थकशब्द समुदायः, शरीरादिपदानां शरीरादिपदनिष्ठानुपूर्व्यवच्छिन्नार्थ

न्वयप्रकारस्त्वित्थम्, द्रव्यत्वाधिकरणं जलादिकं, तद्वृत्तियों भेदः पृथिवी नेति भेदः, तत्प्रतियोगितावच्छेदकीभूता गन्धाधिकरणवृत्तिर्या जातिः पृथिवीत्वरूपा जातिः तादृशजातिमत्वस्य पृथिव्यां सर्वत्रापि विद्यमानत्वाल्लक्षणसमन्वयः, नातिप्रसङ्गश्च। तथाच समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिः द्रव्यत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकीभूता या जातिः तादृशजातिमत्वं पृथिव्याः लक्षणमिति पर्यवसन्नम् ॥

मू * सा द्विविधा नित्याऽनित्याचेति, नित्या परमाणुरूपा, अनित्या कार्यरूपा, पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्, शरीरमस्मदादीनाम्, इन्द्रियं गन्धग्राहकं घ्राणं, तच्च नासाग्रवर्ति. विषयो मृत्पाषाणादिः ॥

पृथिवीं विभजते सा द्विविधेति, अत्र नित्यानित्यपदे नित्यत्वानित्यत्वपरे, इतिपदार्थश्चाभेदः, चकारः विरोधद्योतकः, विधापदस्य विभाजकधर्मद्वयान्यतरवति, लक्षणा, द्विपदं तत्तात्पर्य

कत्वं, अस्यचाभेदसम्बन्धेन भेदपदार्थेऽन्वयः, पञ्चम्याः ज्ञानज्ञाप्यत्वमर्थः, ज्ञानज्ञाप्यत्वञ्च ज्ञानजन्यशाब्दबोधविषयत्वं, अस्य च विधापदार्थभूत विभाजकधर्मेऽन्वयः, तथाच शरीरपदेन्द्रियपदविषयपदाभिन्नपरस्परविरुद्धार्थकशब्दसमुदायजन्य शाब्दबोधविषयपूर्वोक्तविभाजकधर्मभिन्नविभाजकधर्मत्रयान्यतमवदभिन्ना पृथिवीति शाब्दबोधः। व्यापकत्वादिबोधः पूर्ववत् ग्राह्यः ॥

ग्राहकं. तथाच नित्यत्वानित्यत्वरूपविभाजकधर्मद्वयान्यतरवद् भिन्ना पृथिवीति शाब्दबोधः (उत्पत्तिशून्यत्वे सति नाशशून्यत्वं नित्यत्वं, उत्पत्तिमत्वे सति नाशवत्वमनित्यत्वम्) परमाणुरूपा पृथिवी नित्या, द्व्यणुकादिब्रह्माण्डान्तकार्यरूपा पृथिवी अनित्या। प्रकारान्तरेण विभजते पुनरिति, अत्रापि शरीरादिपदानां शरीरत्वादिपरत्वम्, भेदपदार्थो विशेषधर्मः, पञ्चम्याः अभेदोऽर्थः, तस्य च विधापदलक्ष्यतावच्छेदकविभाजकधर्मत्रयान्यतमवत्वेऽन्वयः, तथाच शरीरत्वेन्द्रियत्वविषयत्वरूपविशेषधर्माभिन्नविभाजकधर्मत्रयान्यतमवती पृथिवीति शाब्दबोधः (धर्मे विभाजकत्वञ्च विभागवाक्यघटकपदजन्योपस्थितिनिरूपितविशेष्यतानिरूपितप्रकारताश्रयत्वम्) अत्रशरीरेन्द्रियविषयभेदेन विभागः पृथिवीसामान्यस्यैव, नानित्यपृथिव्याः, पुनः पदासारस्यात्। पार्थिवशरीरं दर्शयति शरीरमिति, अस्मदादीनामित्यत्र षष्ठ्याः अवच्छेदकत्वमर्थः, तथाच अस्मदाद्यात्मावच्छेदकं शरीरं पार्थिवशरीरमित्यर्थः। पार्थिवेन्द्रियं दर्शयतीन्द्रियमिति, गन्धस्य ग्राहकं गन्धग्राहकं, षष्ठ्याः विषयतानिरूपकत्वं, ग्रहधातोः

एवं उत्तरत्र आधेयत्वाधिकरणत्वघटितेषु जलादिलक्षणेषु आधेयतात्वेनाधेयतानिवेशस्य अधिकरणतात्वेनाधिकरणतानिवेशस्य च फलं पूर्वोक्तरीत्या बोध्यम्। कार्यत्वकारणत्वघटितेषु कालादिलक्षणेष्वपि कार्यतात्वेन कार्यतानिवेशस्य कारणतात्वेन कारणतानिवेशस्यापि फलं पूर्ववदेव ग्राह्यम्। विभागवाक्यस्थलेषु शाब्दबोधप्रकारः तत्र सामानाधिकरण्यव्यापकत्वपरस्परविरुद्धत्वादीनां प्रयोजनानि च पूर्ववदेव ग्राह्याणि॥

प्रत्यक्षं, ण्वुल्प्रत्ययस्य जनकत्वञ्चार्थः. तथाच गन्धविषयकप्रत्य
क्षजनकत्वे सतीन्द्रियत्वं घ्राणेन्द्रियस्य लक्षणमिति फलितम्,
गन्धविषयकं यत्प्रत्यक्षं अयं सुरभिः अयमसुरभिरित्याकारकं
प्रत्यक्षं, तज्जनकत्वे सतीन्द्रियत्वं घ्राणेन्द्रिये वर्तत इति लक्ष्ये ल
क्षणसमन्वयः। इन्द्रियत्वमात्रोपादाने चक्षुरादावपीन्द्रियत्वस्य
सत्वात्तत्रातिव्याप्तिः, तद्वारणाय गन्धविषयकप्रत्यक्षजनकत्वद
लं, तन्निवेशे तु चक्षुरादाविन्द्रियत्वस्य सत्वेपि गन्धग्राहकत्व
स्याभावान्नातिव्याप्तिः। तावन्मात्रोपादाने आत्मनो ज्ञानमात्रं
प्रति समवायिकारणत्वेन गन्धविषयकप्र[त्य]क्षस्या[पि] ज्ञानान्तर्गत
त्वेन तज्जनकत्वस्याप्यात्मनि सत्वेन आ[तिव्य]ाप्तिः, अतः
दनुत्पन्नवि ... सचाक्षु
इन्द्रियत्वोपादानं, तन्निवेशे तु आत्मनि इ... त्वचा ... णस्पर्शत्वावच्छिन्नाव
व्याप्तिः। नचैवमपि (आत्मा मनसा सं[य]ुज्यते, ... णवृत्तिभेदप्रति
इन्द्रियमर्थेन, ततः प्रत्यक्षमुत्पद्यते, इति न्यायानुसारेण,
गन्धग्राहकत्वस्य इन्द्रियत्वस्य च सत्वान्मनस्यतिव्याप्तिरिति वा
च्यम्, इन्द्रियपदेन बहिरिन्द्रियत्वस्य विवक्षणीयत्वात्, मनसि
बहिरिन्द्रियत्वस्याभावान्नातिव्याप्तिः। बहिरिन्द्रियत्वञ्च मनोभि
न्नेन्द्रियत्वम्। (यद्वा, शब्दरूपादिचतुष्टयान्यतमसाक्षात्कारजन
कत्वे सतीन्द्रियत्वम्)। अथवा, सुखादिसाक्षात्काराजनकत्वे
सतीन्द्रियत्वम् तत्॥ गन्धग्राहकमिति प्रयोजनकथनं, घ्राणमिति
संज्ञा, नासाग्रेत्याश्रयोक्तिः। विषयं दर्शयति विषय इति, शरीरे
न्द्रियभिन्नत्वं विषयलक्षणम्, परमाणुरूपाणां पृथिव्या अपि
विषय एवान्तर्भावो ग्राह्यः। एवं पृथिवी निरूपिता॥

मू * शीतस्पर्शवत्य आपः, ताः द्विविधाः, नित्या अनित्याश्चेति, नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः, पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात्, शरीरं वरुणलोके, इन्द्रियं रसग्राहकं रसनं, तच्च जिह्वाग्रवर्ति, विषयस्सरित्समुद्रादिः ॥

अपां लक्षणमाह शीतस्पर्शेति । अन्वयबोधप्रकारः पूर्ववदेव । लक्षणन्तु शीतस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वम्, शीतस्पर्शनिष्ठा या आधेयता अप्सु शीतस्पर्शोऽस्तीत्याकारकप्रतीतिसिद्धा शीतस्पर्शनिष्ठाधेयता, तन्निरूपिता याऽधिकरणता अप्सु विद्यमानाऽधिकरणता, तदाश्रयत्वस्य अप्सु समन्वयः । अत्रापि काले पृथिव्यादौ च पूर्वोक्तविधयाऽतिव्याप्तिवारणाय उत्पन्नविनष्टजलेऽव्याप्तिवारणाय च शीतस्पर्शत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकीभूत जातिमत्त्वमिति लक्षणं परिष्करणीयम् । अन्यत्सर्वं पूर्ववद्बोध्यम् । रसनेन्द्रियलक्षणन्तु रसविषयकप्रत्यक्षजनकत्वे सतीन्द्रियत्वम्, रसविषयकं यत्प्रत्यक्षं अयं मधुरः अयमाम्लः इत्याकारकं प्रत्यक्षं, तज्जनकत्वे सतीन्द्रियत्वस्य रसनेन्द्रिये सत्त्वात्समन्वयः । अत्र दलद्वयप्रयोजनन्तु पूर्ववद्बोध्यम् ॥ —

मू * उष्णस्पर्शवत्तेजः, तद्द्विविधं नित्यमनित्यञ्चेति, नित्यं परमाणुरूपं; अनित्यं कार्यरूपं, पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात्, शरीर

मादित्यलोके, इन्द्रियं रूपग्राहकं चक्षुः, तच्च कृष्णताराग्रवर्ति, विषयश्चतुर्विधः भौमदिव्यौ दर्याकरजभेदात्, तत्र भौमं वह्न्यादि, दिव्यम विन्धनं विद्युदादि, भुक्तस्य परिणामहेतुरौदर्यं, आकरजं सुवर्णादि ॥

तेजसो लक्षणमाह उष्णस्पर्शेति, अन्वयबोधप्रकारः पूर्ववत्, लक्षणन्तु उष्णस्पर्शनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वम्, उष्णस्पर्शनिष्ठा याऽधेयता तेजसि उष्णस्पर्शोऽस्तीत्याकारकप्रतीतिसिद्धा उष्णस्पर्शनिष्ठाधेयता, तन्निरूपिता याऽधिकरणता तेजोनिष्ठा अधिकरणता, तदाश्रयत्वं तेजसि वर्तत इति लक्ष्ये लक्षणसमन्वयः। अत्रापि काले जलादौ च पूर्वोक्ताव्याप्त्यतिव्याप्तिवारणाय चन्द्रकिरणादावनुद्भूतस्पर्शवति तेजस्यव्याप्तिवारणाय च समवायसम्बन्धावच्छिन्नोष्णस्पर्शत्वावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकीभूतजातिमत्त्वं तेजसो लक्षणमिति वक्तव्यम्। अन्यत्सर्वं पूर्ववद्बोध्यम्। चक्षुरिन्द्रियलक्षणन्तु रूपविषयकप्रत्यक्षजनकत्वे सतीन्द्रियत्वं, रूपविषयकं यत्प्रत्यक्षं अयं नीलः अयं पीत इत्याकारकं प्रत्यक्षं, तज्जनकत्वे सतीन्द्रियत्वस्य चक्षुरिन्द्रिये सत्त्वात्समन्वयः, विशेषणानुपादाने घ्राणादौ विशेष्यानुपादाने आत्मनिचातिव्याप्तिरित्युभयोपादानम् ॥

☞ मू० रूपरहितस्पर्शवान्वायुः। सद्विविधः, नित्योऽनित्यश्चेति। नित्यः परमाणुरूपः, अनित्यः कार्यरूपः। पुनस्त्रिविधः, शरीरेन्द्रियविष

यभेदात् । शरीरंवायुलोके । इन्द्रियंस्पर्शग्राह
कंत्वक्, सर्वशरीरवृत्तिः । विषयोवृक्षादिकंपन
हेतुः वायुः. शरीरान्तस्संचारीवायुः प्राणश्च ।
सचैको ऽप्युपाधिभेदात्प्राणापानादिसंज्ञांलभ
ते ॥

वायुं निरूपयति रूपरहितेति. रूपेण रहितः रूपरहितः,
तृतीयायाः प्रतियोगितानिरूपकत्वं, रहधातोः अत्यन्ताभावः.
क्तप्रत्ययस्य आश्रयत्वञ्चार्थः, रूपस्य आधेयत्वसम्बन्धेन प्रतियो
गितायामन्वयः, तथाच रूपनिष्ठप्रतियोगितानिरूपकाभावाश्रय
त्वे सति स्पर्शवत्वं वायोर्लक्षणमिति फलितम्, (तदभावं प्रति
तत्प्रतियोगीति, न्यायेन रूपाभावं प्रति रूपस्य प्रतियोगित्वेन
रूपनिष्ठप्रतियोगितानिरूपको योऽभावइत्युक्तौ वायौ रूपं नास्ती
तिप्रतीतिसिद्धो रूपाभावः, तदाश्रयत्वे सति स्पर्शवत्वस्य वायौ
सत्वाल्लक्ष्ये लक्षणसमन्वयः । विशेषणमात्रोपादाने रूपाभावव
त्त्वस्य गगनादौ सत्वादतिव्याप्तिः. विशेष्यविशेषे तु स्पर्शवत्व
स्य तत्राभावान्नातिव्याप्तिः । विशेष्यमात्रोपादाने पृथिव्यादित्रि
के स्पर्शवत्वस्य सत्वादतिव्याप्तिः, अतः विशेषणोपादानम्, त
न्निवेशे रूपरहितत्वस्य तत्राभावान्नातिव्याप्तिः । अत्रापि स्पर्शव
त्वं समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नाधेयतानिरूपिता

[illegible] वायुलक्षणे ॥ प्रतियोगितात्वेन रूपनिष्ठप्रतियोगितां अभा
वत्वेनाभावञ्च अप्रवेश्यरूपनिष्ठा या तन्निरूपकोयः तदाश्रयत्वमि
तिलक्षणकरणे प्रथमयत्पदेन रूपवान्नेतिप्रतीतिसिद्धभेदप्रतियो
गितावच्छेदकतां द्वितीय यत्पदेन रूपवन्निष्ठप्रतियोगिताञ्च आ

धिकरणत्वावच्छिन्नद्रव्यत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदक
जातिमत्त्वरूपमेव परिष्करणीयम् । अत्राधेयतायां समवायसम्ब
न्धावच्छिन्नत्वानिवेशे कालिकसम्बन्धावच्छिन्नाधेयतामादाय
स्पर्शत्वावच्छिन्नत्वानिवेशे गुणत्वावच्छिन्नाधेयतामादाय च का
ले रूपरहितत्वस्यापि सत्त्वात्तत्रातिव्याप्तिः, अतः तद्विशेषणद्वयो
पादानम् । उत्पन्नविनष्टघटादावव्याप्तिवारणायैव जातिघटितलक्ष
णपरिष्कारः कार्यः । सत्त्वादिजातिमादायाकाशादावतिव्याप्ति
वारणाय जातौ द्रव्यत्वव्याप्यत्वं न्यूनदेशवृत्तित्वरूपं निवेशनी
यम् । रूपरहितत्वदलस्याप्यत्र घटकत्वेन नीरूपपदार्थेषु दोषवा
रणेनैव स्पर्शवत्त्वदलघटकविशेषणानां सार्थक्यं बोध्यम् ॥

अत्र रूपनिष्ठप्रतियोगितायां समवायसम्बन्धावच्छिन्नत्वं नि
वेशनीयं, अन्यथा रूपनिष्ठप्रतियोगिताकः [illegible] ऽभाव इत्युक्तौ
संयोगसम्बन्धेन रूपं नास्तीत्याकारकप्रत [illegible] संयोगस
ऽयं इत्युक्तौ त[illegible] रूपाभाव
दाय पृथिव्यादिविशेषे स्पर्शवत्त्वस्याप्यतिव्याप्तिः, तन्निरूपिताधिक
रण्या. तद्वारणाय प्रतियोगितायां [illegible] सम्बन्धनिवेशः पतितेऽपि पृथिव्य
पनिष्ठाया प्रतियोगिता तन्निरूपकोऽयः तदाश्रयत्वमिति लक्षणकर
णेऽपि रूपनिष्ठप्रतियोगिताकः समवायानुयोगिकत्वमादाय पृथिव्या
दिविशेषे स्पर्शवत्त्वस्यापि सत्त्वात् अतिव्याप्तिः वक्तव्या, अतः अ
भावत्वेनाभावनिवेशआवश्यकः । रूपनिष्ठाया तन्निरूपको यो
ऽभावः तदाश्रयत्वमिति लक्षणकरणेतु रूपध्वंसस्य प्रत्यक्षयोगि दे
स्यात्प्रथमक्षणे, इत्यनेन रूपस्यापि पृथिव्यादिलिकलक्षणत्वाङ्गी
कारेण रूपनिष्ठलक्षणता निरूपकलक्ष्यता मादाय पृथिव्यादिवि

न्धावच्छिन्नरूपत्वावच्छिन्नप्रतियोगितानिरूपकाभावः, तदाश्रय
त्वस्य पृथिव्यादौ सत्त्वात् तत्रातिव्याप्तिः इति चेन्न निवेशे
तु समवायसम्बन्धावच्छिन्नरूपनिष्ठप्रतियोगितानिरूपकाभावः
समवायसम्बन्धेन रूपं नास्तीतिप्रतीतिसिद्धाभाव एव. ननु सं
योगसम्बन्धेन रूपाभावः, एतदीयप्रतियोगितायाः समवायस
म्बन्धानवच्छिन्नत्वात्, अतः तादृशाभावाश्रयत्वस्य पृथिव्यादाव
भावेनातिव्याप्त्यभावात्। नन्वेवमपि पृथिव्यादावतिव्याप्तिः, स
मवायसम्बन्धावच्छिन्ना रूपनिष्ठा या प्रतियोगितेत्युक्तौ रूपघट
त्वोभयं नास्तीत्याकारकप्रतीतिसिद्धाभावीया रूपघटत्वोभयत्वा
वच्छि[illegible]ा प्रतियोगिता गृह्यते, तन्निरूपकाभावः रूपघटत्वोभया
भाव[illegible] एक[illegible]त्वे द्वयं नास्तीति प्रतीत्या पृथिव्यादौ रूपस्य सत्त्वे
पि [illegible] (उदासीनस्य) अभावेन तादृशोभयाभावाश्रयत्व
[illegible]त्वस्य च तत्र विद्यमानत्वात् इति चेन्न रूपनिष्ठप्रतियो
[illegible]तायां रूपत्वावच्छिन्नत्वस्य निवेशनीयत्वात्, तन्निवेशे तु रूप
घटत्वोभयाभावीयप्रतियोगितायाः रूपघटत्वोभयत्वावच्छिन्नत्वे

केऽतिव्याप्तिः वक्तव्या, लक्ष्यतायाः अपि तदभावाभावरूपत्वेन
अभावत्वस्यापि तत्राव्याहतत्वात्, अतः प्रतियोगितात्वेन प्रति
योगितानिवेशनीया। नन्वेवं जातिप्रतियोगितात्वावच्छिन्नस्य अ
भावत्वावच्छिन्नस्य च निवेशेऽपि रूपनिष्ठप्रतियोगितानिरूपकस
मवायरूपभावात्मकाभावमादाय पृथिव्यादिनिष्ठेऽतिव्याप्तिः दु
र्वारेति वाच्यम्, अभावत्वस्य भावभिन्नत्वरूपस्य निवेशनीयत्वा
त्। नन्वेवं रूपनिष्ठलक्षणतानिरूपकलक्ष्यतामादाय पूर्वोक्तानि
व्याप्तिः दुःसंगच्छत इति वाच्यम्, गुणत्वाभावे रूपस्य स्वाभाव

न रूपत्वावच्छिन्नप्रतियोगिताकोऽभाव इत्युक्तौ न तादृशोभयाभावः किन्तु रूपं नास्तीत्याकारकसामान्याभाव एव भवति, एतदाश्रयत्वस्य पृथिव्यादावभावान्नातिव्याप्तिः । नच तथापि रूपवत्त्वोभयाभावीयप्रतियोगितायां रूपत्वमुभयत्वञ्चावच्छेदकमिति रूपत्वावच्छिन्नत्वनिवेशेऽपि निरुक्तोभयत्वावच्छिन्नप्रतियोगितामादाय तत्रातिव्याप्तिः तदवस्थैवेति वाच्यम्, रूपत्वातिरिक्तधर्मानवच्छिन्नत्वस्य तदर्थत्वात्, तादृशोभयाभावीयप्रतियोगितायाः रूपत्वातिरिक्तोभयत्वरूपधर्मावच्छिन्नत्वेन तदनवच्छिन्नप्रतियोगिताकाभावपदेन रूपसामान्याभावस्यैव ग्राह्यतया तदाश्रयत्वस्य पृथिव्यादावभावेनातिव्याप्त्यभावात् । नन्वेवमपि पृथिव्यादावतिव्याप्तिः, कथम्, समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नप्रतियोगिताकाभावनिष्ठा याऽऽधेयतेत्युक्तौ तादृशरूपाभावनिष्ठा कालिकसम्बन्धावच्छिन्नाधेयता गृह्यते, तन्निरूपिताधिकरणताश्रयत्वस्य (जन्यानां कालोपाधित्वम्, इति न्यायेन पृथिव्यादौ सत्त्वात् तत्र स्पर्शवत्त्वस्य च सत्त्वात् अतिव्याप्तिरिति वा वत्त्वसम्बन्धेन विद्यमानतया स्वनिष्ठाधिकरणतानिरूपकत्वेन स्वनिरूपितत्वस्याप्याधेयतायामङ्गीकृतत्वेन स्वाभाववत्त्वसम्बन्धावच्छिन्नरूपनिष्ठाधेयतानिरूपकगुणत्वाभाववत्त्व मादाय पृथिव्यादिवृत्तेः स्पर्शवत्त्वस्यापि सत्त्वात्, तद्दोषवारणायैव प्रतियोगितात्वेन प्रतियोगितानिवेशः कर्तव्यः । न च समवायसम्बन्धावच्छिन्ना रूपनिष्ठाया तन्निरूपकाभावाश्रयत्वमिति लक्षणकरणे तु ध्वंसप्रागभावनिरूपितप्रतियोगितायाः समवायसम्बन्धानवच्छिन्नतया रूपध्वंसादिकमादाय पृथिव्यादावतिव्याप्त्यभावेन

च्यम्, रूपाभावनिष्ठाधेयतायां स्वरूपसम्बन्धावच्छिन्नत्वस्य विशेषणीयत्वात्, तन्निवेशे पृथिव्यादौ कालिकसम्बन्धेन रूपाभावस्य सत्त्वेऽपि स्वरूपसम्बन्धेन तस्याभावान्नातिव्याप्तिः ॥

नन्वेवमपि घटादावतिव्याप्तिः, (उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियञ्च तिष्ठति, इति न्यायेन उत्पत्तिक्षणावच्छेदेन तत्र रूपाभावाश्रयत्वस्य द्वितीयादिक्षणावच्छेदेन स्पर्शवत्त्वस्य च सत्त्वात्, इति वाच्यम्, रूपाभावनिष्ठाधेयतानिरूपिताधिकरणतायां निरवच्छिन्नत्वस्य विशेषणीयत्वात्, तथाच घटादिनिष्ठायाः रूपाभावाधिकरणताया उत्पत्तिकालावच्छिन्नतया निरवच्छिन्नतदधिकरणत्वस्य घटादावभावेनातिव्याप्त्यभावात्।) (अथवा, रूपरहितइत्यनेन रूपानधिकरणत्वस्य विवक्षितत्वात्, भेदस्य व्याप्यवृत्तित्वात् व्याप्यवृत्तेरवच्छेदकसद्भावे प्रमाणाभावाच्च घटादौ निरुक्तरीत्याऽतिव्याप्तेरभावात्। स्वप्रतियोग्यनधिकरणं यद्रूपाभावाधिकरणं तत्त्वमिति विवक्षणात् घटादौ नातिव्याप्तिः,

अत्यन्ताभावत्वेनाभावानिवेशाद्वैयर्थ्यत्वाभावेन प्रकृते समवायसम्बन्धावच्छिन्नरूपनिष्ठकार्यता निरूपक रूपप्रागभावाश्रयत्वमादाय पृथिव्यादावतिव्याप्तेः, समवायसम्बन्धेन जायमानरूपं प्रति रूपप्रागभावस्य कारणत्वात् स्वानिष्ठकारणतानिरूपितत्वस्यैव स्वनिरूपितत्वस्याधिकार्यतायां अङ्गीकृतत्वाच्च ॥ अथवा, समवायसम्बन्धावच्छिन्नस्य घटितपूर्वोक्तलक्षणे अभावत्वेनाभावघटिते प्रतियोगितात्वावच्छिन्ननिवेशे प्रयोजनाभावेऽपि क्षत्यभावेन तदा प्रतियोगितापदस्य स्वरूपकीर्तनमात्रपरत्वमेवेति ध्येयम् ॥

स्वपदं रूपाभावपरं, उत्पत्तिकालावच्छेदेन रूपाभावाधिकरणीभूतघटस्य स्वपदग्राह्यरूपाभावप्रतियोगिभूतरूपस्य द्वितीयादिक्षणावच्छेदेनाधिकरणतया तद्भिन्नत्वस्य घटादावभावात् ॥

नन्वेवमपि उत्पन्नविनष्टघटादावतिव्याप्तिवारणाय स्पर्शवत्त्वस्य स्पर्शाधिकरणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वरूपत्वेन परिष्करणीयतया उत्पन्नविनष्टघटे निरवच्छिन्नरूपाभावाधिकरणत्वस्य समवायेन स्पर्शाभावेऽपि स्पर्शसमानाधिकरणद्रव्यत्वव्याप्यपृथिवीत्वजातिमत्त्वस्य च सत्त्वात्तत्रातिव्याप्तिरिति वाच्यम्, रूपासमानाधिकरणत्वस्य स्पर्शसमानाधिकरणद्रव्यत्वव्याप्यजातौ विशेषणीयत्वात्, तथाच स्पर्शसमानाधिकरणद्रव्य[illegible]व्याप्यपृथिवीत्वजातेः रूपाधिकरणघटादिवृत्तित्वेन [illegible]त्वं नाधिकरण्यस्य पृथिवीत्वादिजातावभावेन पूर्वोक्तरीत्या विभुत्वं, तत्रातिप्रसङ्गः। नन्वेवं सति गगनत्वस्य एकव्यक्तिवृत्तित्वे तस्समन्वयः [illegible]त्वमु त्वादेर्जातित्वेऽपि रूपासामानाधिकर[illegible]णाभावे

करणजातिमत्त्वस्य गगनादावभावात् स्पर्शवत्त्वदलमन[illegible]

वाच्यम्, रूपासमानाधिकरणगुणत्वादिजातिमादाय रूपादावतिव्याप्तिवारणायैव स्पर्शवत्त्वदलसार्थक्यात्, तन्निवेशे तु गुणे गुणानङ्गीकारेण रूपादौ स्पर्शाभावान्नातिव्याप्तिः। नन्वेवमपि रूपासमानाधिकरणजातौ द्रव्यत्वव्याप्यत्वविशेषणेनैव गुणत्वादिजातिमादाय रूपादावतिव्याप्तिवारणसम्भवात् स्पर्शवत्त्वदलमनर्थकमिति वाच्यम्, रूपासमानाधिकरणां द्रव्यत्वव्याप्यामात्मत्वजातिं मनस्त्वजातिं वाऽऽदायात्मनि मनसि वा अतिव्याप्तिवारणाय तत्सार्थक्यात्, तन्निवेशे तु आत्मत्वमनस्त्वादौ स्पर्श

सामानाधिकरण्यस्याभावात् नातिव्याप्तिः । तथाच समवायस्म्बन्धावच्छिन्न रूपत्वातिरिक्तधर्मावच्छिन्न प्रतियोगिताकाभाव निष्ठस्वरूपसम्बन्धावच्छिन्नाधेयता निरूपितनिरवच्छिन्नाधिकरणताश्रयत्वे सति समवायसम्बन्धावच्छिन्नस्पर्शत्वावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तिद्रव्यत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकीभूतजातिमत्वम्, रूपासमानाधिकरणा (रूपनिष्ठाधेयतानिरूपिताधिकरणतावदवृत्तिः) स्पर्शसमानाधिकरणा (स्पर्शनिष्ठाधेयतानिरूपिताधिकरणावद्वृत्तिः) द्रव्यत्वव्याप्या (द्रव्यत्वाधिकरणवृत्तिभेदप्रतियोगितावच्छेदकीभूता) या जातिः तादृशजातिमत्वम्, इति वा पर्यवसन्नं वाय्वोर्लक्षणं बोध्यम् । त्वगिन्द्रिय[illegible]क्षणं तु स्पर्शविषयकप्रत्यक्षजनकत्वे सति इन्द्रियत्वमिति बोध्यं। [illegible]पर्श[illegible]यकं यत् प्रत्यक्षं अयमुष्णः अयं शीतः इत्याकारकं प्र[illegible]शप्रत्यक्षजनकत्वे सतीन्द्रियत्वस्य त्वगिन्द्रिये स[illegible]यः । विशेष्यमात्रोपादाने चक्षुरादौ विशेषणमात्रोपा[illegible]त्मनि[illegible] अतिव्याप्तिः इत्युभयोपादानम् । अन्यत्तत्वं [illegible]श्वयोर्लक्षणवत् बोध्यम् ॥

मू * शब्दगुणकमाकाशं, तच्चैकं विभु नित्यञ्च ॥

आकाशं लक्षयति शब्दगुणकमिति, अत्र गुणपदं गगने शब्द एक एव विशेषगुणोऽस्तीति द्योतनायैव, नतु दोषवारणाय प्रयुक्तम् । शाब्दबोधः शब्दाभिन्नगुणाश्रयाभिन्नमिति । शब्दनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं आकाशस्य लक्षणं, शब्दनिष्ठा याऽधेयता आकाशे शब्दोऽस्तीत्याकारकप्रतीतिसिद्धा शब्द

निष्ठाधेयता, तन्निरूपिता या अधिकरणता आकाशनिष्ठाऽधिक रणता, तदाश्रयत्वमाकाशे वर्तत इति लक्षणसमन्वयः। अत्रापि कालिकसम्बन्धावच्छिन्नाधेयतामादाय काले गुणत्वावच्छिन्नाधे यतामादाय जलादौचातिव्याभिचारणाय क्रमेण समवायसम्ब न्धावच्छिन्नत्वशब्दत्वावच्छिन्नत्वयोः शब्दनिष्ठाधेयतायां विशेष णत्वमङ्गीकार्यम्। उत्पन्नविनष्टाकाशस्याभावेन अव्याप्तिप्रसक्त्य भावेन जातिघटितलक्षणकरणावश्यकता नास्ति। तथाच, सम वायसम्बन्धावच्छिन्नशब्दत्वावच्छिन्नाधेयता निरूपिताधिकरण ताश्रयत्वं आकाशस्य लक्षणमिति फलितम्। तच्चैकमिति, एक त्वञ्चात्र स्वसजातीयधर्म्यन्तररहितत्वं आकाशत्वसमानाधिकर णोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदशून्यत्वं वा विवक्षणी यम्। विभ्विति, सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं, पृथिव्यप्तेजोवा युमनोरूपसर्वमूर्तद्रव्यसंयोगित्वस्य सत्त्वात्समन्वयः। नित्यत्वमु पदर्शितमेव ॥

मू* अतीतादिव्यवहारहेतुः कालः, सचैको विभुर्नित्यश्च ॥

कालं लक्षयति अतीतादीति। अतीतादेः व्यवहारः तस्य हेतुः इत्यतीतादिव्यवहारहेतुः अतीतादेरित्यत्र षष्ठ्याः विषयता निरूपकत्वं व्यवहारस्येत्यत्र षष्ठ्याः आश्रयत्वञ्चार्थः, हेतुः कार्य तानिरूपितकारणतावान्, षष्ठ्यर्थाश्रयत्वस्य कार्यतायामन्वयः, तथाच, अतीतादिविषयकव्यवहारनिष्ठकार्यतानिरूपितकारणता श्रयत्वं कालस्य लक्षणमिति फलितम्, व्यवहार इशब्दप्रयोगः।

अतीतादिव्यवहारनिष्ठा या कार्यता अयमतीतः अयमनागतः अयं वर्तमानः इत्याकारकशब्दप्रयोगे विद्यमाना कार्यता, तन्नि रूपिता या कारणता (व्यवहारे व्यवहर्तव्यमात्रस्यैव कारण त्वेन) अतीतादिकालनिष्ठा कारणता, तदाश्रयत्वस्य सर्वत्रापि काले सत्वात् समन्वयः। अतीतादिपदं विहाय व्यवहारहेतुत्व मात्रोक्तौ व्यवहारे व्यवहर्तव्यस्यापि कारणत्वेन घटोऽस्तीत्याका रकव्यवहारहेतुत्वस्य घटादावपि सत्वा त्तत्रातिव्याप्तिः, नच अतीतादिपदनिवेशेपि व्यवहर्तव्ये घटादौ अतीतादिव्यवहारहेतु त्वस्याबाधितत्वेन तद्दोषतादवस्थ्यमेवेति वाच्यम्, अतीतादि व्यवहारनिष्ठकार्यतानिरूपितकारणतावत्ज्ञानीय (ज्ञाननिरूपित) मुख्यविशेष्यतानिरूपितप्रकारताश्रयत्वमिति लक्षणं परिष्करणी यम्। अतीतादिव्यवहारनिष्ठकार्यतानिरूपितकारणतावत् यत् ज्ञानं अतीतकालविशिष्टो घटः इत्यादिज्ञानं, तन्निरूपितघटादि निष्ठमुख्यविशेष्यतानिरूपितप्रकारताश्रयत्वस्य अतीतादिकाले सत्वेन अन्यत्राभावेन च नातिव्याप्तिः लक्षणसमन्वयश्च। आदि पदाभावे अतीतव्यवहारहेतुत्वस्यानागतवर्तमानकालयोः अभावे नाव्याप्तिः, आदिपदनिवेशे तु आदिपदेनानागतादिकालस्यापि ग्राह्यतया अतीतादिव्यवहारान्यतमहेतुत्वस्य काले सर्वत्रापि सम्भवात् नाव्याप्तिः। तथाच, अतीतादिव्यवहारनिष्ठकार्यता निरूपितकारणतावत् ज्ञानीयमुख्यविशेष्यतानिरूपितप्रकारताश्र यत्वमिति लक्षणं फलितम्। अतएव कालेश्वरादृष्टादीनां कार्य मात्रं प्रति साधारणकारणत्वेन अतीतादिव्यवहारहेतुत्वस्यापि सत्वात्तत्रातिव्याप्तिवारणाय अतीतादिव्यवहारत्वावच्छिन्नकार्य

तानिरूपितकारणताश्रयत्वमिति अतीतादिव्यवहारासाधारण कारणत्वं लक्षणं वक्तव्यम् इत्यपास्तम्। अन्यत्सर्वं गगनलक्षणवद्बोध्यम्॥

मू* प्राच्यादिव्यवहारहेतुः दिक्, सा चैका विभ्वी नित्या च॥

दिशं लक्षयति प्राच्यादीति। शब्दार्थः काललक्षण इव ज्ञेयः। प्राच्यादिव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वं दिशो लक्षणम्, प्राच्यादिव्यवहारनिष्ठा या कार्यता अयं प्राच्यः अयं प्रतीच्यः अयमुदीच्यः अयमवाच्यः इत्याकारकव्यवहारे विद्यमाना कार्यता, तन्निरूपिता या कारणता प्राच्यादिदिक्षु विद्यमाना कारणता, तदाश्रयत्वं दिक्षु वर्तते इति समन्वयः। अत्रापि व्यवहारहेतुत्वमात्रोक्तौ घटेऽतिः ... सिः। ... आदिपदाभावे प्रतीच्यादिदिक्षु अव्याप्तिः। पूर्ववद्घटादाव ... वारणाय प्राच्यादिव्यवहारनिष्ठकार्यतानिरूपितकारणत्व। प्रतिपदमुख...भिव्याहृतेऽप्यतानिरूपितप्रकारताश्रयत्वं निष्कृष्टलक्षणं ...यमर्थः, नियतत्वञ्च ...दिकं गगनलक्षणवद्बोध्यम्॥ ... बोध्यम

मू* ज्ञानाधिकरणमात्मा, स द्विविधः, परमात्मा जीवात्मा चेति, तत्रेश्वरः सर्वज्ञः परमात्मा

☞ जीवस्तु प्रतिशरीरं भिन्न इत्यत्र॥ ननु प्रतिद्रव्यं सत्त्वेत्यत्र सत्तायां द्रव्यत्वव्यापकत्वस्येव अत्रापि आत्मभेदे शरीरत्वव्यापकत्वस्य भानमङ्गीकार्यम्, तादृशभानाङ्गीकारे तु आत्मशरीरयोः भेदस्य स्वतःसिद्धत्वेन जीवात्मनः एकत्वेऽपि शरीरत्व

एक एव, जीवस्तु प्रतिशरीरं भिन्नो वि
भुर्नित्यश्च ॥

आत्मानं लक्षयति ज्ञानाधिकरणमिति। अत्राधिकरणपदं समवायेन ज्ञानाश्रयत्वलाभाय, तत्वतिव्याप्त्यादिदोषवारणाय। ज्ञानस्याधिकरणं ज्ञानाधिकरणं, अधिकरणपदस्याधेयतानिरूपिताधिकरणतावानर्थः, षष्ठ्यर्थः आधेयत्वम्, अस्य च आधेयतायामन्वयः। तथाच, ज्ञाननिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वं आत्मनो लक्षणम्, ज्ञाननिष्ठा याऽधेयता अहं जानामि इत्याकारकप्रतीतिसिद्धा ज्ञाननिष्ठाऽधेयता, तन्निरूपिता याऽधिकरणता आत्मनिष्ठाधिकरणता तदाश्रयत्वम् आत्मनि वर्तते इति लक्ष्यलक्षणसमन्वयः। कालिकसम्बन्धावच्छिन्नज्ञाननिष्ठाधेयतां गुण... आधेयतां च आदाय कालादावतिव्याप्तिवारणाय स...न्धावच्छिन्नत्वं ज्ञानत्वावच्छिन्नत्वञ्च ज्ञाननिष्ठाधेय...विशेषणं देयं। उत्पन्नविनष्टस्यात्मनः अभावेन तत्र अव्याप्तिवारणाय जातिघटितलक्षणं न कर्तव्यं। तथाच, समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नाधेयतानिरूपिताधिकरणताश्रय

व्यापकत्वस्य जीवात्मभेदेऽक्षतत्वेन शरीरभेदेन जीवभेदबोधकत्वं अस्य वाक्यस्य न सम्भवतीतिचेन्न, अत्र प्रतिपदसमभिव्याहृतशरीरपदस्य स्वावच्छेदकयत्किञ्चिच्छरीरभेदव्यापकत्वमर्थः, तस्य भेदेऽन्वयः, तथाच, स्वावच्छेदकयत्किञ्चिच्छरीरभेदव्यापकभेदप्रतियोगी जीवात्मेति बोधः, अत्र स्वाश्रयशरीरत्वं व्याप्यतावच्छेदकसम्बन्धः स्वाश्रयावच्छेदकत्वं व्यापकतावच्छेदकसम्ब...। एषा पट्टाभिरामप्रदर्शिता रीतिः ॥

त्वमात्रं आत्मनो निष्कृष्टं लक्षणं बोध्यम्। आत्मानं विभजते स द्विविध इति. नित्यज्ञानाधिकरणत्वमीश्वरत्वं, तत्तद्व्यक्तित्वेन सर्वविषयकज्ञानाश्रयत्वं सर्वज्ञत्वम्। जीवस्य शरीरभेदेन भेदः सुखदुःखादिवैलक्षण्येनाङ्गीकार्यः। जीवानां विभुत्वनित्यत्वाङ्गीकारप्रयोजनं दीपिकायां निरूपितम्॥

☞ मू * सुखाद्युपलब्धिसाधनमिन्द्रियं मनः, तच्च
प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च॥

मनो लक्षयति सुखादीति। शाब्दबोधः काललक्षण इव बोध्यम्। उपलब्धिर्नाम प्रत्यक्षं। तथाच, सुखादिविषयकप्रत्यक्षनिष्ठकार्यतानिरूपितकारणताश्रयत्वे सति इन्द्रियत्वं मनसो लक्षणं। सुखादिविषयकं यत्प्रत्यक्षं अहं सुखी अहं दुःखीत्याकारकं

. . . .

☞ प्रत्यात्मनियतत्वादनन्तमित्यत्र॥ प्रतिपदसमभिव्याहृतात्मपदस्य आत्मत्वव्यापकसंख्यासजातीयमर्थः, नियतत्वञ्च संख्यावत्त्वम्. संख्यासाजात्यञ्च बहुत्वत्वव्याप्यजात्या बोध्यम्। संख्यावत्त्वञ्च संख्यापर्याप्त्यधिकरणत्वं ग्राह्यम्। अन्यथा, मनसः एकत्वेऽपि आत्मनस्साधारणसंख्यामादाय मनसि तादृशसंख्यावत्त्वमापाद्येत। तथाच, आत्मत्वव्यापकसंख्यासजातीयसंख्यापर्याप्त्यधिकरणत्वं प्रत्यात्मनियतत्वमिति सिद्धम्॥ अन्तःसंख्यात्वव्याप्यधर्मावच्छिन्नप्रकारतानिरूपिता या अस्मदादिनिष्ठया विशेष्यता तच्छून्यत्वं आनन्त्यम्। एतापि पट्टाभिराम प्रदर्शिता रीतिरेव॥

☞ सुखाद्युपलब्धिसाधनमिन्द्रियं मन इत्यत्र॥ ननु सुखा

प्रत्यक्षं, तत्कारणत्वे सति इन्द्रियत्वस्य मनसि सत्वात् समन्वयः। इन्द्रियत्वमात्रोक्तौ चक्षुरादौ इन्द्रियत्वानुपादाने आत्मनि च अतिव्याप्तिः इत्युभयोपादानं। तथाच, सुखादिविषयकप्रत्यक्षनिष्ठकार्यतानिरूपितकारणताश्रयत्वे सति इन्द्रियत्वं मनसो निष्कृष्टं लक्षणम्। तच्चेति, एकैकस्यात्मनः एकैकं मन इत्यात्मनामनेकत्वात् मनसोऽप्यनेकत्वं ज्ञेयं। मनसः अनन्तत्वपरमाणुरूपत्वनित्यत्वानां प्रयोजनं दीपिकायां व्यक्तीकृतम्। द्रव्यमेवं निरूपितम्॥

☞ मू० चक्षुर्मात्रग्राह्यो गुणो रूपम्, तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधं पृथिवीजलतेजोवृत्ति, तत्र पृथिव्यां सप्तविधं, अभास्वरशुक्लं जले, भास्वरशुक्लं तेजसि॥

द्युपलब्धिसाधनमिन्द्रियं इति मनोलक्षणे इन्द्रियत्वस्य ज्ञानकारणमनस्संयोगाश्रयत्वघटितत्वादिन्द्रियलक्षणे मनस्त्वस्य च प्रविष्टत्वेन अन्योन्याश्रयदोषप्रसङ्ग इति वाच्यम्, मनस्त्वस्य जातित्वेन इन्द्रियत्वस्य शब्देतरोद्भूतगुणानाश्रयत्वविशिष्टज्ञानकारणमनस्संयोगाश्रत्वरूपतया इन्द्रियत्वग्रहस्य स्वपदग्राह्यमनस्त्वग्रहधीनत्वेऽपि मनस्त्वग्रहस्य इन्द्रियत्वग्रहाधीनत्वाभावेन स्वग्रहाधीनग्रहाधीनस्वग्रहविषयत्वाभावेनात्रान्योन्याश्रयदोषो नास्ति। सुखाद्युपलब्धिसाधनत्वविशिष्टेन्द्रियत्वं मनोलक्षणमेव, न मनस्त्वरूपम्, नातः मनस्त्वग्रहस्य इन्द्रियत्वग्रहाधीनतेति तद्दोषप्रसक्तिः॥

गन्धग्राहकं घ्राणं घ्राणग्राह्यो गुणो गन्धः, रसग्राहकं रसनं

अथ गुणाः निरूप्यन्ते ॥ रूपं लक्षयति चक्षुर्मात्रग्राह्येति, चक्षुर्मात्रेण ग्राह्यः चक्षुर्मात्रग्राह्यः, अत्र मात्रपदस्य इतरयोगो व्यवच्छेदश्चार्थः, इतरपदार्थैकदेशान्तरत्वे चक्षुःपदार्थस्य प्रतियोगि तानिरूपकत्वसम्बन्धेनान्वयः, योगोऽत्र प्रत्यक्षविषयत्वं. इतर पदार्थस्य जन्यत्वसम्बन्धेन प्रत्यक्षेऽन्वयः, तादृशविषयत्वस्य च व्यवच्छेदरूपाभावे अन्वयः, मात्रेणेत्यत्र तृतीयायाः जन्यत्वमर्थः, ग्रहधातोः प्रत्यक्षज्ञानं ण्यप्रत्ययस्य विषयत्वञ्चार्थः, तथाच. चक्षु र्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षवि षयत्वे सति गुणत्वं रूपस्य लक्षणमिति फलितम् । (चक्षुर्मात्रेण ग्राह्यः चक्षुर्मात्रग्राह्यः, अत्र तृतीयायाः जन्यत्वं, ग्रहधातोः प्रत्य क्षज्ञानं, ण्यप्रत्ययस्य विषयत्वञ्चार्थः, मात्र... [illegible] ...र्भिन्नेन्द्रिय जन्यप्रत्यक्षाविषयत्वमर्थः, तथाच, चक्षुरि... [illegible] ...न्यप्रत्यक्षा ...च्छिन्नस्य प्र... [illegible] ...न्वयः ॥ रासनग्राह्यो गुणो रसः, रूपग्राहकं चक्षुः तत्क्षुर्मात्र वा जन्यप्रत्यक्षाविष यं, स्पर्शग्राहकं त्वक् त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः असम्भवप्रस लक्षणेषु च गन्धत्वादीनां जातित्वेन गन्धग्राहकत्वादीनां घ्राणत्वा दिलक्षणत्वेन च मनोलक्षण इव अन्योन्याश्रयदोषप्रसक्तिः वार णीया ॥

☞ रूपलक्षणे ॥ त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वे सति प्रत्य क्षविषयत्वे सति गुणत्वमिति एतावन्मात्रोक्तौ ईश्वरीयप्रत्यक्ष विषयतामादाय रसादावतिव्याप्तिः । तद्वारणाय जन्यप्रत्यक्षविष यत्वमिति लक्षणकरणेऽपि योगजप्रत्यक्षविषयतामादाय पुनः र सादावतिव्याप्तिः । तद्वारणाय इन्द्रियजन्यप्रत्यक्षवि[illegible]मिति लक्षणकरणेऽपि रासनप्रत्यक्षविषयतामादाय र[illegible]दा[illegible]व्याप्तिः।

विषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं रूपस्य लक्षणमिति फलितम्) चक्षुर्भिन्नं यदिन्द्रियं त्वगिन्द्रियं, तज्जन्यं यत्प्रत्यक्षं अयमुष्णः अयंशीतः इत्याकारकं प्रत्यक्षं, तद्विषयत्वं स्पर्शे वर्तते, तदविषयत्वं रूपे वर्तते, एवं चक्षुरिन्द्रियजन्यं यत्प्रत्यक्षं अयं नीलः अयं पीतः इत्याकारकं प्रत्यक्षं, तद्विषयत्वं गुणश्च रूपेऽस्तीति लक्षणसमन्वयः। गुणत्वमात्रोक्तौ रसादावपि गुणत्वस्य सत्वात्तत्रातिव्याप्तिः, तद्वारणाय विशेषणोपादानं, तन्निवेशे रसादौ गुणत्वस्य सत्वेपि चक्षुर्मात्रग्राह्यत्वस्याभावान्नातिव्याप्तिः। गुणत्वानुपादाने (येनेन्द्रियेण या व्यक्तिः गृह्यते तेनेन्द्रियेण तन्निष्ठा जातिः तदभावश्च गृह्यते, इति न्यायेन रूपस्य चक्षुर्मात्रग्राह्यत्वे रूपत्वरूपाभावयोरपि चक्षुर्मात्रग्राह्य

अ[illegible] चक्षु[illegible]न्द्रियजन्यप्रत्यक्षविषयत्वरूपस्य (कृत्स्नस्यापि) दलस्य [illegible]कता अस्त्येव ॥

[illegible]न्नेव लक्षणे, चक्षुर्ग्राह्यत्वदळे प्रत्यक्षत्वेन प्रत्यक्षं अप्र[illegible]त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यज्ञा[illegible]विषयत्वे सति गुणत्वमिति लक्षणे ज्ञायमानलिङ्गस्य करणतावादिमते रूपं स्वेतरभिन्नं (त्वगग्राह्यत्वविशिष्टगुणत्वे सति) ग्राह्यत्वसम्बन्धेन चक्षुरिन्द्रियात् इत्याद्यनुमानहेतुभूतचक्षुरिन्द्रियजन्यानुमित्यात्मकज्ञानविषयतामादाय रूपेतररसादिगुणेषु अतिव्याप्तिः, अतः तद्दळे प्रत्यक्षत्वावच्छिन्नस्य प्रवेशः कार्यः॥ मात्रपदार्थे प्रत्यक्षत्वावच्छिन्नमप्रवेश्य त्वगिन्द्रियजन्यज्ञानाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वमिति लक्षणकरणे स्पर्शः स्वेतरभिन्नः (चक्षुरग्राह्यत्वविशिष्टगुणत्वे सति) ग्रा

त्वात् तयोरतिव्याप्तिः, तद्वारणाय गुणत्वं, तन्निवेशे तु रूपत्वस्य जातित्वेन रूपाभावस्याभावत्वेन तत्र गुणत्वस्याभावात् नातिव्याप्तिः। मात्रपदानुपादाने (चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वानुपादाने) चक्षुरिन्द्रियजन्यं यत्प्रत्यक्षं अयमेकः इमौ द्वौ इत्याकारकं प्रत्यक्षं, तद्विषयत्वं गुणत्वञ्च संख्यायामस्तीत्यतिव्याप्तिः, तद्वारणाय मात्रपदं, तन्निवेशे तु चक्षुर्भिन्नेन्द्रियं त्वगिन्द्रियं, तज्जन्यं यत्प्रत्यक्षं अयमेकः इमौ द्वौ इत्याकारकं प्रत्यक्षं, तद्विषयत्वस्यैव संख्यायां वर्तमानत्वेन तदविषयत्वस्य तत्राभावान्नातिव्याप्तिः। चक्षुरिन्द्रियजन्यप्रत्यक्षाविषयत्वानुपादाने धर्माधर्मादेरतीन्द्रियत्वेन चक्षुर्भिन्नत्वगादीन्द्रियजन्यप्रत्यक्षाविषयत्वस्य गुणत्वस्य च तयोः विद्यमानत्वात् अतिव्याप्तिः, तद्वारणाय चक्षु

ह्यत्वसम्बन्धेन त्वगिन्द्रियात् इत्याद्यनुमानहेतुभूतत्वगिन्द्रियजन्यानुमितिविषयतामादाय पूर्वमतानुसारेण असम्भवः, अतः मात्रपदार्थघटकतयाऽपि प्रत्यक्षत्वावच्छिन्नस्य प्रवेशः कार्यः॥ त्वगिन्द्रियपदं विहाय प्रत्यक्षाविषयत्वमिति वा जन्यप्रत्यक्षाविषयत्वमिति वा लक्षणकरणे चाक्षुषादिप्रत्यक्षमादाय असम्भवप्रसङ्गः, अतः त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वपर्यन्तस्य तद्दलस्य आवश्यकता अस्त्येव॥ चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वमित्यत्र प्रत्यक्षं लौकिकं ग्राह्यम्, अन्यथा ज्ञातो घटः इत्याकारकं ज्ञानलक्षणाद्यलौकिकसन्निकर्षजन्यप्रत्यक्षं आदाय ज्ञानादौ अतिव्याप्तिः। न च लौकिकत्वनिवेशेऽपि घटांशे तत्ज्ञानस्य लौकिकत्वेन अतिव्याप्तिः तदवस्थैवेति वाच्यम्, प्रत्यक्षविषयतायां लौकिकसन्निकर्षप्रयोज्यत्वस्य निवेशनीयत्वात्, ज्ञाननिष्ठविषयतायाः लौकि

रिन्द्रियजन्यप्रत्यक्षविषयत्वदळं निवेशनीयम्, तन्निवेशे चक्षुरिन्द्रियजन्यप्रत्यक्षं रूपादिविषयकंप्रत्यक्षमेव, नतु धर्माधर्मविषयकं प्रत्यक्षं, तयोरतीन्द्रियत्वात, अत तद्विषयत्वस्य धर्माधर्मादावभावात् नातिव्याप्तिः। एवमपि ज्ञानमात्रस्य मनोजन्यत्वेन चक्षुर्भिन्नमनइन्द्रियजन्यप्रत्यक्षविषयत्वस्यैव रूपे सत्वेन अविषयत्वस्याभावात् असम्भवः, तद्वारणाय चक्षुर्भिन्नेन्द्रियपदं त्वगिन्द्रियपरमिति वक्तव्यं, तथाच त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं रूपस्य लक्षणं फलितम्, तथाच चक्षुर्भिन्नमनइन्द्रियजन्यप्रत्यक्षविषयत्वस्य सत्वेऽपि त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वस्याभावेन नासम्भवः॥

मू० * रसनग्राह्यो गुणो रसः, सच मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः, पृथिवीजलवृत्तिः, तत्र पृथिव्यां षड्विधः, जले तु मधुर एव॥

कसन्निकर्षप्रयोज्यत्वाभावेनातिव्याप्त्यभावात्। अथवा, प्रत्यक्षे लौकिकत्वं अलौकिकप्रत्यक्षभिन्नत्वरूपं विवक्षणीयम्, ज्ञातो घट इति ज्ञानस्य अलौकिकाभिन्नत्वाभावात् नातिव्याप्तिः॥ त्वगिन्द्रियजन्यप्रत्यक्षाविषयत्वमित्यत्रापि प्रत्यक्षं लौकिकं ग्राह्यम्, अन्यथा, रूपवान् वह्निः उष्णः इत्याद्यलौकिकप्रत्यक्षमादाय असम्भवः॥ तथाच त्वगिन्द्रियजन्यप्रत्यक्षनिरूपितलौकिकविषयत्वाभाववत्वे सति चक्षुरिन्द्रियजन्यप्रत्यक्षनिरूपितलौकिकविषयता (लौकिकसन्निकर्षप्रयोज्यविषयता) श्रयत्वे सति गुणत्वं रूपलक्षणंबोध्यम्॥ एवमन्यत्रापि सदृशस्थलेषु यथायथमूह्यम्॥

रसं लक्षयति रसनेति, रसनेनग्राह्यः रसनग्राह्यः. तृतीया याः जन्यत्वं. ग्रहधातोः प्रत्यक्षज्ञानं. ण्यप्रत्ययस्य विषयत्वञ्चार्थः । तथाच रसनेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं रसस्य लक्षणमितिफलितम्, तथाच रसनेन्द्रियजन्यं यत्प्रत्यक्षं अयंमधुरः अयमाम्लः इत्याकारकं प्रत्यक्षं, तद्विषयत्वस्य गुणत्वस्य च रसे सत्वात् लक्षणसमन्वयः । गुणत्वमात्रोक्तौ रूपादौ गुणत्वानुपादाने रसत्वरसाभावयोश्च अतिव्याप्तिः, अतः दळद्वयोपादानम् ॥

मू* घ्राणग्राह्यो गुणो गन्धः. स द्विविधः, सुरभिरसुरभिश्चेति, पृथिवीमात्रवृत्तिः ॥

गन्धं लक्षयति घ्राणेति । शाब्दबोधः रसलक्षणवत् ग्राह्यः । घ्राणेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं गन्धस्य लक्षणं, घ्राणेन्द्रियजन्यं यत्प्रत्यक्षं अयंसुरभिः अयमसुरभिः इत्याकारकं प्रत्यक्षं, तादृशप्रत्यक्षविषयत्वे सति गुण[illegible] आ[illegible]स्तित्वात् लक्षणसमन्वयः । गुणत्वमात्रोक्तौ रूपादौ गुण[illegible] गन्धत्वगन्धाभावयोश्च अतिव्याप्तिः, अतो दळद्वयो[illegible]

मू* त्वगिन्द्रियमात्रग्राह्यो गुण[illegible] त्रिविधः शीतोष्णानुष्णाशीतभेदात्. पृथिव्यां[illegible] जलतेजोवायुवृत्तिः, तत्र शीतं जले, उष्णस्तेजसि, अनुष्णाशीतः पृथिवीवाय्वोः, रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यञ्च. अन्यत्रापाकजं नित्यमनित्यञ्च, नित्यगतं नित्यं, अनित्यगतमनित्यम् ॥

स्पर्शं लक्षयति त्वगिन्द्रियेति । शाब्दबोधप्रकारः रूपलक्षण इव बोध्यः । त्वगिभन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति त्वगिन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं स्पर्शस्य लक्षणम्, त्वगिभन्नं यदिन्द्रियं चक्षुरिन्द्रियं, तज्जन्यं यत्प्रत्यक्षं अयंनीलः अयंपीतः इत्याकारकं प्रत्यक्षं, तद्विषयत्वं रूपे वर्तते. अविषयत्वं स्पर्शे वर्तते, त्वगिन्द्रियजन्यं यत्प्रत्यक्षं अयमुष्णः अयंशीतः इत्याकारकं प्रत्यक्षं, तद्विषयत्वं गुणत्वञ्च स्पर्शेऽस्तीति लक्षणसमन्वयः । गुणत्वमात्रोक्तौ रूपाद्यावतिव्याप्तिः । गुणत्वानुपादाने (येनेन्द्रियेण इति न्यायेन स्पर्शत्वस्पर्शाभावयोः अतिव्याप्तिः । मात्रपदानुपादाने संख्याद्यावतिव्याप्तिः । त्वगिभन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति गुणत्वमात्रोक्तौ धर्माधर्माद्यावतिव्याप्तिः, अतः दळत्रयोपादानम् । त्वगिभन्नेन्द्रियपदेन मनइन्द्रियमादाय पूर्ववदसम्भवना ...य चक्षुरिन्द्रियजन्यप्रत्यक्षाविषयत्वे सति त्वगिन्द्रियजन्यप्र...त्वे सति गुणत्वं स्पर्शस्य लक्षणमिति वक्तव्यम् । ...रसगन्धस्पर्शलक्षणेषु चतुर्षु च परमाणुगतेषु रूपरस...षु तत्तदिन्द्रियग्राह्यत्वस्याभावेनाव्याप्तिवारणाय जाति...लक्षणपरिष्कारः कर्तव्यः । तत्प्रकारश्च. त्वगिन्द्रियजन्य

☞ ननु रूपादिचतुष्टयलक्षणेषु परमाणुरूपादिचतुष्टयेऽव्याप्तिवारणाय जातिघटितत्वपरिष्कारस्यावश्यं कर्तव्यतया तल्लक्षणचतुष्टये च एतावतैव रूपत्वरसत्वादिजातिषु अतिव्याप्तेप्रसक्त्यभावेन गुणत्वदळस्य वैयर्थ्यमिति वाच्यम्, रूपलक्षणे सुवर्णत्वजातिमादाय सुवर्णेऽतिव्याप्तिवारणाय वायोरूष्मणश्च प्रत्यक्षतावादिमते स्पर्शलक्षणे वायुत्वजातिमूष्मत्वजातिवाऽऽदाय

प्रत्यक्षविषयतानवच्छेदकीभूता चक्षुरिन्द्रियजन्यप्रत्यक्षविषयतावच्छेदकीभूता या जातिः तद्वत्वे सति गुणत्वमिति रूपलक्षणं, रसनेन्द्रियजन्यप्रत्यक्षविषयतावच्छेदकीभूतजातिमत्वे सति गुणत्वमिति रसलक्षणं, घ्राणेन्द्रियजन्यप्रत्यक्षविषयतावच्छेदकजातिमत्वे सति गुणत्वमिति गन्धलक्षणं, चक्षुरिन्द्रियजन्यप्रत्यक्षविषयतानवच्छेदकीभूता त्वगिन्द्रियजन्यप्रत्यक्षविषयतावच्छेदकीभूता या जातिः तद्वत्वे सति गुणत्वमिति स्पर्शलक्षणं च ग्राह्यः ॥ रूपादिचतुष्टयं पृथिव्यां पाकजमिति, अत्र पृथिव्यामिति पृथिवीसामान्यबोधकशब्दोपादानेन नित्यपृथिव्यामनित्यपृथिव्याञ्च विद्यमानं रूपादिचतुष्टयं पाकजन्यत्वेन तज्जन्यं तदनित्यं, इति व्याप्त्या अनित्यं भवतीति ज्ञायते. जलादौ विद्यमानस्य रूपादेः पाकजन्यत्वाभावेन सर्वत्रापि विद्यमानस्य तस्य नानित्यत्वनियमः, किन्तु नित्यगतं चेत् आश्रयस्य नित्यत्वेन आधेयस्य तस्यापि नित्यत्वं, अनित्यगतं चेत् आश्रयस्यानित्यत्वेन आश्रयनाशादाश्रयिनाशः, इति नियमेन आधेयस्य तस्याप्यनित्यत्वं ।

वायूष्मणोश्च दोषवारणाय गुणपदसार्थक्यात् रसलक्षणे मधुररसवत्फलं इति प्रत्यक्षविषयफलत्वजातिमादाय गन्धलक्षणे सुरभि कुसुमं इति प्रत्यक्षविषयकुसुमत्वजातिं च आदाय फलकुसुमयोरतिव्याप्तिवारणाय च गुणपदसार्थक्यात् । न च रसगन्धलक्षणयोः विषयतायां लौकिकसन्निकर्षप्रयोज्यत्वस्य, तत्तदिन्द्रियप्रयोज्यत्वस्य निवेशेनैव फलकुसुमादावतिव्याप्त्यभावेन गुणपदवैयर्थ्यं दुर्वारमेवेति वाच्यम्, तदातलक्षणद्वये गुणपदस्य स्वरूपकीर्तनमात्रपरत्वमेव इति बोध्यम् ॥

(आश्रयः समवायिकारणं, आश्रयी समवेतं कार्यम्) अन्यत्रा पाकजं नित्यमनित्यञ्चान्यत्र. रूपादिचतुष्टयपदस्य पूर्वमुपात्तत्वेन सान्निध्यबलात् अन्वेत्यत्रापि तत्पदयोजनमावश्यकं भवति. तस्य योजने च अन्यत्र जलादौ रूपादिचतुष्टयं न सम्भवति, कुतः, पृथिव्यां तच्चतुष्टयं. जले गन्धं विहाय त्रयं. तेजसि रस गन्धौ विहाय द्वयं, वायौ स्पर्श एक एव वर्तत इति, अतः रूपा दिचतुष्टयपदस्य तच्चतुष्टयघटकमर्थः, तथाच पृथिव्यामन्यत्र न तदन्वेतीति नानुपपत्तिः॥

सू॰ एकादिव्यवहारहेतुः संख्या, नवद्रव्यवृ त्तिः. एकत्वादिपरार्धपर्यन्ता, एकत्वं द्विविधं नित्यमनित्यञ्चेति. नित्यगतं नित्यं, अनित्यग तमनित्यं, द्वित्वादिकन्तु सर्वत्रानित्यमेव॥

संख्यां लक्षयति एकादीति। संख्यापरिमाणपृथक्त्वसंयोग परत्वापरत्वलक्षणवाक्यस्थलेषु शाब्दबोधप्रकारः काललक्षण इव ग्राह्यः। एकादिव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वं संख्यायाः लक्षणम्. एकादिव्यवहारनिष्ठा या कार्यता अयमेकः इमौ द्वौ इत्याकारकव्यवहारनिष्ठा कार्यता, तन्निरूपिता या का रणता एकत्वद्वित्वादिसंख्यायां विद्यमाना कारणता. तदाश्रय त्वस्य एकत्वादिसंख्यायां सर्वत्रापि सत्वात्समन्वयः। व्यवहार हेतुत्वमात्रोक्तौ पूर्ववत् घटेऽतिव्याप्तिः। आदिपदाभावे द्वित्वा दिसंख्यायामव्याप्तिः। पूर्ववत् घटादावतिव्याप्तिवारणाय एका दिव्यवहारनिष्ठकार्यतानिरूपितकारणतावत्ज्ञानीयमुख्यविशेष्य तानिरूपितप्रकारताश्रयत्वपर्यन्तं लक्षणं परिष्करणीयं। एकत्व

त्वाद्रित्वत्वाद्यनित्यातिवारणाय विशेष्यतायां मुख्यत्वनिवेशः। प्रकारत्वानवच्छिन्नत्वं (प्रकारत्वासमानाधिकरणत्वं) मुख्यत्वम् ज्ञेयम। एकत्वं नित्यगतं नित्यमिति। आश्रयस्य नित्यत्वे आश्रय स्थैकत्वस्यापि नित्यत्वम्, यथा, गगनादौ एकत्वं। आश्रयस्यानि त्यत्वे आश्रयनाशानन्तरं आश्रयगत एकत्वमपि नश्यति, यथा, घटादावेकत्वं। द्वित्वादिकन्तु सर्वत्रानित्यमेवेति। द्वित्वादीनां अयमेकः अयमेकः इत्याकारकापेक्षाबुद्धिजन्यत्वेन (अनेकै कत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते, इति कारिकावल्यां) अपे क्षाबुद्धेश्चक्षणत्रयमात्रावस्थायित्वेन कारणीभूतायाः अपेक्षाबुद्धेः नाशात् कार्यभुतं द्वित्वादिकमपि नश्यति, ना[illegible] न्तराभावेन अपेक्षाबुद्धिनाशेनैव द्वित्वादिनाशोऽ[illegible] संयोगस्य न[illegible]पेक्षाबुद्धितः तस्य नाशानङ्गीकारे कालान्तरे अपेक्ष[illegible], तथा[illegible]रापि चिरस्था यित्वाऽनयैव तत्प्रत्यक्षमुत्पद्येत, अतो [illegible]संयोगप्रतिय[illegible]नित्यगतं द्वा[illegible]शेन्न द्वित्वादिकमनित्यमेवेति सिद्धान्तः॥ [illegible] क्रिया, क्रियातो वि

मू॰ मानव्यवहाराऽसाधारणकारणं परिमाणम्[illegible]संयोगं नवद्रव्यवृत्ति। तच्चतुर्विधं, अणु महत् दीर्घ ह्रस्वञ्चेति॥

परिमाणं लक्षयति मानव्यवहारेति॥ मानव्यवहारनिष्ठका र्यतानिरूपितकारणताश्रयत्वं परिमाणस्य लक्षणं, मानव्यवहार निष्ठा या कार्यता अयमणुः अयंमहान् अयंदीर्घः अयंह्रस्वः इत्या कारकशब्दप्रयोगनिष्ठा कार्यता तन्निरूपितकारणताश्रयत्वं अणु त्वादिपरिमाणेषु वर्तते इति लक्षणसमन्वयः (अ[illegible]त्व घटितलक्षणेषु सर्वत्रापि व्यवहारहेतुत्वमा[illegible]त्वं [illegible]दावेवाति,

व्याप्तिदोषा) असाधारणकारणत्वानिवेशे ईश्वरादृष्टादेः कार्यमात्रं प्रति साधारणकारणत्वेन मानव्यवहारादेरपि कार्यत्वेन तत्कारणत्वस्येश्वरादृष्टादौ सत्त्वेन तत्रातिव्याप्तिः. अतः असाधारणकारणत्वं निवेशनीयं, तदर्थश्च मानव्यवहारत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वमिति पर्यवस्यति, ईश्वरादृष्टादेः कार्यमात्रं प्रति[illegible]धारणकारणत्वेन मानव्यवहारादिनिष्ठकार्यतानिरूपितकारणताश्रयत्वस्य सत्त्वेऽपि मानव्यवहारत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वस्याभावात् नातिव्याप्तिः। अणुत्वादिव्यवहारत्वावच्छिन्नं प्रति प्रत्येकमणुत्वत्वेन महत्त्वत्वेन च कार्यकारणभावसत्त्वात्समन्वयः। (एतत्सूत्रस्थासाधारणकारणत्वप्रयोजनं ग्राह्यं. बुद्धिलक्षणातिरिक्तेषु व्यवहारहेतुत्वघटितल[illegible]र्थकम् घटादिष्वतिव्याप्तिवारणाय तत्तद्व्यवहारनिष्ठका[illegible]तिकारणताकत्वतज्ज्ञानीयमुख्यविशेष्यतानिरूपितप्रकारत[illegible]र्यन्तं लक्षणं परिष्करणीयमेव, एवं परिष्कृते लक्षणे [illegible]ट घटादावतिव्याप्तिप्रसक्त्यभावेन असाधारणकारणत्वा[illegible]पि न क्वापि क्षतिः किन्तु यथाश्रुतलक्षणएव तस्य सार्थक्यमित्यवधेयम्) तद्विभजते अणुरिति. अत्र च भावप्रधाननिर्देशः, यथाश्रुतेऽसङ्गत्यापत्तेः, स च धर्मबोधेच्छया धर्मिप्रतिपादनं, गावार्थमुख्यविशेष्यकबोधेच्छयोच्चरितशब्दो वा स इति ज्ञेयम्॥

सू* पृथग्व्यवहारासाधारणकारणं पृथक्त्वं.
सर्वद्रव्यवृत्ति॥

पृथक्त्वं लक्षयति पृथगिति॥ पृथग्व्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वं पृथक्त्वस्य लक्षणं। पृथग्व्यवहारनिष्ठा

या कार्यता अयमस्मात्पृथगिति व्यवहारनिष्ठा कार्यता, तन्निरू पितकारणताश्रयत्वं पृथक्त्वं वर्ततइति लक्षणसमन्वयः। अन्य त्सर्वं पूर्ववत् बोध्यम्॥

मू॰ * संयुक्तव्यवहारहेतुस्संयोगः, सर्वद्रव्य वृत्तिः॥

संयोगं लक्षयति संयुक्तेति॥ संयुक्तव्यवहारनिष्ठकार्यता निरूपितकारणताश्रयत्वं संयोगस्य लक्षणं. संयुक्तव्यवहारनिष्ठा या कार्यता इमौ संयुक्तौ इति व्यवहारनिष्ठा कार्यता, तन्निरूपित कारणताश्रयत्वं संयोगेऽस्तीति समन्वयः। अन्यत्सर्वं पूर्ववत्।

मू॰ * संयोगनाशको गुणो विभागः सर्वद्रव्य वृत्तिः॥

विभागं लक्षयति संयोगेति॥ संयोगस्य नाशकः संयोगना शकः पष्ठ्याः प्रतियोगितानिरूपकत्वं, नशधातोः ध्वंसोऽर्थः, ण्वुल्प्रत्ययस्य जनकत्वमर्थः, तथाच संयोगप्रतियोगिकनाशजन कत्वे सति गुणत्वं विभागस्य लक्षणं, आदौ क्रिया, क्रियातो वि भागः, विभागात्पूर्वसंयोगनाशः, पूर्वसंयोगनाशादुत्तरसंयोगो

विभागलक्षणे॥ ननु संयोगनाशजनकत्वे सति गुणत्व स्य विभागलक्षणत्वाङ्गीकारेऽपि ध्वंसं प्रति प्रतियोगिनः कारण त्वेन संयोगनाशजनकत्वस्य गुणत्वस्य च संयोगे सत्त्वात् अति व्याप्तिरिति वाच्यम्, संयोगनाशनिष्ठजन्यतायां प्रतियोगिता सम्बन्धानवच्छिन्नत्वस्य जनकतायां समवायसम्बन्धावच्छिन्नत्व स्य वा निवेशनीयत्वात्, तन्निवेशे प्रतियोगितासम्बन्धेन जाय

त्पत्तिरिति क्रममनुसृत्य संयोगनाशजनकत्वं गुणत्वञ्च विभागेऽ स्तीति समन्वयः। गुणत्वमात्रोक्तौ रूपादावतिव्याप्तिः। गुणत्वानुपादाने क्रियाया अपि परम्परया संयोगनाशजनकत्वात् तत्रातिव्याप्तिः, अतः उभयोपादानम् ॥

मू॰ परापरव्यवहारासाधारणकारणे परत्वापरत्वे। ते द्विविधे, दिक्कृते कालकृते चेति। दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतमपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतमपरत्वम् ॥

परत्वापरत्वयोर्लक्षणमाह परापरेति ॥ परव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वं परत्वस्य लक्षणं, परव्यवहारनिष्ठा या कार्यता अयमस्मात्परः इति व्यवहारनिष्ठा कार्यता, तन्निरूपितकारणताश्रयत्वं परत्वे वर्ततइति समन्वयः॥ अपरव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वं अपरत्वस्य लक्षणं, अपरव्यवहारनिष्ठा या कार्यता अयमस्मादपरः इति व्यवहारनिष्ठा कार्यता, तन्निरूपितकारणताश्रयत्वमपरत्वे वर्ततइति लक्षणसमन्वयः। अन्यत्सर्वं पूर्ववत् बोध्यम् ॥

मानसंयोगनाशं प्रति तादात्म्यसम्बन्धेन संयोगस्य कारणत्वेन अत्र कार्यतायाः प्रतियोगितासम्बन्धावच्छिन्नत्वेन कारणतायाः तादात्म्यसम्बन्धावच्छिन्नत्वेन च प्रकारद्वयेऽपि दोषभावात्। स्वरूपसम्बन्धेन जायमानसंयोगनाशं प्रति समवायसम्बन्धेन विभागस्य कारणत्वेन उभयत्रापि लक्षणसमन्वयः ॥

मू* आद्यपतनासमवायिकारणं गुरुत्वं । पृथिवीजलवृत्ति ॥

गुरुत्वं लक्षयति आद्येति ॥ आद्यपतननिष्ठकार्यतानिरूपिता समवायिकारणताश्रयत्वं गुरुत्वस्य लक्षणं । आद्यपतननिष्ठकार्यतानिरूपिता या असमवायिकारण[illegible] गुरुत्वनिष्ठाऽसमवायिकारणता, तदाश्रयत्वं गुरुत्वेऽस्तीति समन्वयः । आद्यपदाभावे द्वितीयादिपतनमादाय वेगेऽतिव्याप्तिः । असमवायित्वानुपादाने आद्यपतनसमवायिकारणत्वं तन्निमित्तकारणतां वा आदाय तत्समवायिकारणफलादौ तन्निमित्तकारणवाय्वादौ चातिव्याप्तिः ॥

मू* आद्यस्यन्दनासमवायि[illegible] । पृथिवीजलतेजोवृत्ति । तद्द्वि[illegible]न्यप्रत्यक्ष[illegible] नैमित्तिकं चेति । सांसिद्धिकं [illegible] पृथिवीतेजसोः । पृथिव्यां घृतादावग्नि[illegible] । न[illegible]ातिघटि[illegible] द्रवत्वं । तेजसि सुवर्णादौ ॥ [illegible]

द्रवत्वं लक्षयति आद्येति ॥ गुरुत्वद्रवत्वलक्षणयोर्बोधसुगम इति न लिखितम् । आद्यस्यन्दननिष्ठकार्यतानिरूपितासमवायिकारणताश्रयत्वं द्रवत्वस्य लक्षणं । आद्यस्यन्दननिष्ठकार्यतानिरूपिता याऽसमवायिकारणता द्रवत्वनिष्ठाऽसमवायिकारणता, तदाश्रयत्वं द्रवत्वेऽस्तीति समन्वयः । आद्यपदाभावे द्वितीयादिस्यन्दनमादाय वेगेऽतिव्याप्तिः । असम[illegible]ायित्वानुपादाने पूर्ववत् तत्समवायिकारणीभूतजलादावति[illegible]ः । अ[illegible]ये चासमवायिकारणत्वं आद्यपतनादिनिष्ठकार्य[illegible] नि[illegible] समवाय

सम्बन्धावच्छिन्नकारणताश्रयत्वरूपमेव, नतु समवायसम्बन्धावच्छिन्नकार्यताघटितं तत्. अत्र कार्यतायां समवायसम्बन्धावच्छिन्नत्वप्रवेशे प्रयोजनाभावात् इति ॥

मू[illegible]चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ॥

स्नेहं लक्षयति चूर्णादीति । बोध्यः पूर्ववत् । पिण्डीभावो नाम [illegible]ारणकर्षणहेतुभूतो विलक्षणसंयोगः । चूर्णादिपिण्डीभाव[illegible]निष्ठकार्यतानिरूपितकारणताश्रयत्वे सति गुणत्वं स्नेहस्य लक्षणम्। [illegible]पिण्डीभावनिष्ठकार्यतानिरूपिता या कारणता स्नेहनिष्ठा [illegible] तदाश्रयत्वं स्नेहे वर्तत इति समन्वयः । विशेष्यमात्रो[illegible] रूपादौ विशेषणमात्रोपादाने कालेश्वरादावतिव्याप्ति[illegible]उभयोपादानम् । नचैवमप्यदृष्टेऽतिव्याप्तिर्दुर्वारेति वाच्यम्. असाधारणकारणत्वनिवेशेन तस्या वारणीयत्वात् । नचैवं असाधारणकारणत्वनिवेशे कालेश्वरादावसाधारणकारणत्वाभावेनातिव्याप्तिवारणात् गुणपदस्य वैयर्थ्यमिति वाच्यम्, चूर्णादावतिव्याप्तिवारणायैव तत्सार्थक्यात् ॥ वस्तुतस्तु. स्नेहस्य पिण्डीभावहेतुत्वस्वीकारे प्रमाणाभावेन स्वाश्रयसंयुक्तत्वसम्बन्धेनास्य कारणत्वस्य वक्तव्यतया गौरवेण च नास्य पिण्डीभावहेतुत्वमङ्गीकार्यम् । द्रुतजलसंयोगस्य तत्कारणत्वकल्पने प्रत्यक्षप्रमाणसा[illegible] अस्य समवायसम्बन्धेनैव कारणत्वस्य सुवचतया कार[illegible]वच्छेदकसम्बन्धकृतलाघवेन च द्रुतजलसंयोगस्यैव पिण्डीभावहेतुत्वं वक्तव्यम् । अतश्च एवमेवाभिप्रयन्ति बहवः ॥

मू॰ * श्रोत्रग्राह्यो गुणश्शब्दः । स द्विविधः, ध्वन्यात्मको वर्णात्मकश्चेति । ध्वन्यात्मको भेर्यादौ । वर्णात्मकस्संस्कृतभाषादिरूपः ॥

शब्दं लक्षयति श्रोत्रेति ॥ रूपादिलक्षणस्थलवत् बोध्यप्रकारः ग्राह्यः । श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं शब्दस्य लक्षणम्. श्रोत्रेन्द्रियजन्यं यत्प्रत्यक्षं अयंभेरीशब्दः अयंमृदङ्गशब्दः इत्याद्याकारकं प्रत्यक्षं तद्विषयत्वे सति गुणत्वस्य शब्दे सत्त्वात् समन्वयः । विशेष्यमात्रोपादाने रूपादौ विशेषणमात्रोपादाने शब्दत्वादौ च अतिव्याप्तिः इत्युभयोपादानम् । नचअन्तिमशब्दस्यैव श्रोत्रेन्द्रियग्राह्यत्वेन आद्यशब्दे तल्लक्षणाभावाद् अव्याप्तिरिति वाच्यम्, श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयतावच्छेदकजातिमद्गुणत्वस्य निवेशनीयत्वात्, आद्यस्याप्रत्यक्षत्वेपि तादृशजातिमत्वस्य तत्राप्यक्षतत्वेनाव्याप्त्यभावात् । नचैवं जातिघटितलक्षणे शब्दत्वादावतिव्याप्त्यभावात् गुणत्वस्य वैयर्थ्यमिति वाच्यम्, श्रोत्रेन्द्रियजन्यं यत्प्रत्यक्षं अयंभेरीशब्दः इत्यादिप्रत्यक्षं, तद्विषयतावच्छेदकीभूता या जातिः भेरीत्वजातिः, तादृशजातिमत्वस्य भेर्यादौ सत्त्वात् अतिव्याप्त्यापत्तेः । नच श्रोत्रेन्द्रियजन्यत्वस्य न प्रत्यक्षविशेषणत्वं, किन्तु श्रोत्रेन्द्रियप्रयोज्यत्वस्य प्रत्यक्षविषयताविशेषणत्वमङ्गीक्रियते, तथाच श्रोत्रेन्द्रियप्रयोज्यप्रत्यक्षविषयतावच्छेदकजातिमत्वं लक्षणमुच्यते, भेर्यादिनिष्ठविषयतायाः श्रोत्रेन्द्रियप्रयोज्यत्वाभावेन न तत्रातिव्याप्तिरिति वाच्यम्, तदा गुणपदस्य स्वरूपकीर्तनमात्रपरत्वमेवाङ्गीक्रियते इति ध्येयम् ॥

मू॰ सर्वव्यवहारहेतुः ज्ञानं बुद्धिः। सा द्विविधा, स्मृतिरनुभवश्चेति ॥

बुद्धिं निरूपयति सर्वेति ॥ (अर्थं बुध्वा शब्दरचना. इति न्यायेन अर्थज्ञानस्य शब्दप्रयोगहेतुत्वं निर्विवादम्. सर्वव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रयत्वं बुद्धेर्लक्षणं. सर्वव्यवहारनिष्ठा या कार्यता अयंघट इत्यादिशब्दप्रयोगे विद्यमाना कार्यता तन्निरूपिता या कारणता अयंघट इत्यादिज्ञाने विद्यमाना कारणता, तदाश्रयत्वं ज्ञाने वर्तत इति लक्षणसमन्वयः। अत्र सर्वे ये व्यवहाराः तद्धेतुत्वमिति वा. सर्वमिति यो व्यवहारः तद्धेतुत्वमिति वा विग्रहः नाद्यः, कस्यापि ज्ञानस्य सर्वव्यवहारहेतुत्वाभावात् असम्भवापत्तेः। न द्वितीयः, सर्वत्वप्रकारकव्यवहारहेतुत्वस्य सर्वमिति ज्ञाने सत्वेऽपि घटपटादिज्ञानेषु तस्याभावात् अव्याप्तिः। अतः द्वितीयं पक्षमवलंब्य सर्वत्वप्रकारकज्ञानजनकशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणतावद्वृत्तिजातिमत्त्वमिति लक्षणं परिष्करणीयम् . अतः सर्वत्वप्रकारकव्यवहारनिष्ठकार्यतानिरूपितकारणतावत् सर्वं इति ज्ञानं, तद्वृत्तिः या जातिः ज्ञानत्वजातिः, तद्वत्त्वस्य घटादिविषयकज्ञानेष्वपि सत्वात् अव्याप्त्यभावः, लक्षणसमन्वयश्च। नन्वेवं सर्वव्यवहारनिष्ठकार्यतानिरूपितकारणतावद्वृत्तिगुणत्वजातिमादाय रूपादावतिव्याप्तिरिति वाच्यम्. जातौ गुणत्वव्याप्यत्वस्य निवेशनीयत्वात्. गुणत्वजातिः न गुणत्वव्याप्येति नातिव्याप्तिः॥ अथवा, सर्वपदस्य स्वरूपकीर्तनपरत्वमेवाङ्गीक्रियते. व्यवहारहेतुत्वमात्रमेव ज्ञानस्य लक्षणमुच्यते। शब्दप्रयोगं प्रति ज्ञानस्यैव साक्षाद्धेतुत्वेन घटादीनाञ्च

ज्ञानद्वारैव कारणत्वेन साक्षाद्व्यवहारहेतुत्वकथनेनैव घटादाव तिव्याप्तिवारणात्। अतो न विग्रहविकल्पप्रयुक्तासम्भवाव्याप्ती, व्यवहारं प्रति साक्षाद्धेतुत्वस्य ज्ञाने सर्वत्रापि सम्भवात्। नचैवं कालेश्वरादावतिव्याप्तिः, गुणत्वस्य अत्रापि निवेशनीयत्वात्। नच तः व्यवहर्तृऽतिव्याप्तिर्दुर्वारेति वाच्यं, व्यवहारासाधारणकारण त्वस्यापि निवेशनीयत्वात्। नचैवं गुणपदं व्यर्थम्, इष्टापत्तेः। अत एव गुणपदं विहाय सर्वव्यवहारहेतुः ज्ञानं बुद्धिरित्येव मूले ग्रन्थकृताऽभिहितमिति बोध्यम् ॥ ज्ञानं विभजते सा द्विविधेति। स्मृतित्वानुभवत्वरूपविभाजकधर्मद्वयान्यतरवत्त्वम् बुद्धिरिति बोध्यः ॥

नुपादाने इदंर

मू * संस्कारमात्रजन्यं ज्ञानं स्मृतिः,

स्मृतिं लक्षयति संस्कारेति॥ मात्रपदं ऽनुभवत्वावच्छेद स्य अर्थः, अत्र इतरयोगः इतरजन्यत्वरूपः, इदं रजतम् अयथा देऽन्वयः। तथाच संस्कारेतराजन्यत्वे सति संस्कारजन्यत्वे तत्पे ति ज्ञानत्वं स्मृतेः लक्षणमिति फलितम्। संस्कारेतरचक्षुरादिज न्यत्वे सति संस्कारजन्यत्वे सति ज्ञानत्वस्य स्मृतौ सत्वात् समन्वयः। (प्रथममनुभवः, ततः भावनाख्यसंस्कारः, ततः उद्बोधकसा मग्रीसहितात् संस्कारात् स्मृतिः. इति स्मृतेरुत्पत्तिक्रमः) ज्ञानत्व मात्रोक्तावनुभवेऽतिव्याप्तिः। संस्कारजन्यत्वमात्रोक्तौ ध्वंसं प्रति प्रतियोगिनः कारणत्वेन संस्कारमात्रजन्यत्वस्य संस्कारध्वंसे सत्वात् तत्राऽतिव्याप्तिः। अतो ज्ञानत्वदलनिवेशे ध्वंसे ज्ञा नत्वस्याभावात् नातिव्याप्तिः। संस्कारेतराजन्य … ज्ञानत्व मात्रोक्तौ ईश्वरीयज्ञानस्य नित्यत्वेन (केनाप्यज … संस्का

रेतराजन्यत्वं ज्ञानत्वञ्च तत्रास्तीत्यतिव्याप्तिः, अतः संस्कारज न्यत्वनिवेशः । नच ईश्वरीयज्ञानस्य जन्यत्वविशेषणेनैव वार णात् संस्कारपदं व्यर्थमिति वाच्यम्, योगिज्ञानस्य योगजन्य त्वेन तत्र जन्यत्व ज्ञानत्वयोः सत्वात् अतिव्याप्तिः संस्कारजन्य त्वनिवेशे तु योगिज्ञानस्य योगजन्यत्वेन संस्कारजन्यत्वाभावात् नातिव्याप्तिः [illegible] योगिज्ञानस्य योगजन्यत्वेन संस्कारेतरज न्यत्वविशेषणेनैव दोषवारणात् संस्कारपदस्य वैयर्थ्यं दुर्वारमे वेति वाच्यम्, स्मृतेरपि संस्कारेतरमनोजन्यत्वेन तज्जनत्वाभा वेन असम्भववारणाय संस्कारेतरपदस्य बहिरिन्द्रियपरत्वेन व्य [illegible] या योगिज्ञाने बहिरिन्द्रियाजन्यत्वजन्यत्वज्ञानत्वानां स [illegible] व्याप्तिवारणाय संस्कारपदस्य सार्थक्यात् । संस्कारजन्य [illegible] त्वमात्रोक्तै सोऽयंदेवदत्तः इति प्रत्यभिज्ञायाः इदं [illegible] रादिजन्यत्वेपि तत्तांशे संस्कारजन्यत्वेन संस्कारज [illegible] त्वयोः तत्र सत्वात् अतिव्याप्तिवारणाय मात्रपदं, त [illegible] शी तस्याः इदंत्वांशे बहिरिन्द्रियजन्यत्वेन तज्जन्यत्वस्य त त्साभावात् नातिव्याप्तिः ॥

मू॰ * तद्भिन्नं ज्ञानं अनुभवः, स द्विविधः, यथा र्थोऽयथार्थश्चेति ॥

अनुभवं लक्षयति तद्भिन्नमिति॥ स्मृतिभिन्नत्वेस ति ज्ञानत्वम नुभवस्य लक्षणम् । ज्ञानत्वमात्रोक्तौ स्मृतावति व्याप्तिः । स्मृति भिन्नत्वमात्रोक्तौ घटादावतिव्याप्तिः । अतो दळद्वयोपादानम् । प्र त्यभि[illegible]याः संस्कारमात्रजन्यत्वाभावेन न स्मृतावन्तर्भावः, किं[illegible]नुभवएवेति बोध्यम् ॥

मू* तद्वति तत्प्रकारकानुभावो यथार्थः सैव प्रमेत्युच्यते । यथा, रजते इदं रजतमिति ॥

यथार्थानुभवं लक्षयति तद्वतीति॥ तद्वतीत्यत्र सप्तम्यर्थो विशेष्यतानिरूपकत्वं । तद्वतः आधेयत्वसम्बन्धेन विशेष्यतायामन्वयः। तथाच तद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारता निरूपकत्वे सति अनुभवत्वं यथार्थानुभवस्य लक्षणम् । तत्पदेन प्रकारीभूतधर्मो ग्राह्यः । रजते इदंरजतं इति ज्ञाने लक्षणसमन्वयः, तथाहि, तत् रजतत्वं, तद्वत् रजतं तन्निष्ठविशेष्यतानिरूपकत्वे सति तत्पदग्राह्यरजतत्वनिष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वस्य पूर्वोक्तज्ञाने सत्वात् । अनुभवत्वमात्रोक्तौ अयथार्थानुभवेऽतिव्याप्तिः । अनुभवत्वानुपादाने इदंरजतं इति यथार्थानुभवजन्यस्मृतिसंस्कारयोः अतिव्याप्तिः, तत्रापि तद्वद्विशेष्यकत्वतत्प्रकारकत्वयोः सत्वात्, अतोऽनुभवत्वनिवेशः । तद्विशेष्यकत्वे सति अनुभवत्वमात्रोक्तौ शुक्तौ इदंरजतं इति अयथार्थानुभवेऽतिव्याप्तिः, तथाहि, तत्प्रकारकत्वदलाभावे तत्पदेन प्रकार एव ग्राह्य इति नियमालाभेन अत्र तच्छब्देन शुक्तित्वं गृहीत्वा तत्र तद्वच्छुक्तिविशेष्यकत्वज्ञानत्वयोः सत्वात् अतिव्याप्तिः, अतः तत्प्रकारकत्वदलम्, तन्निवेशे (एकवाक्यस्थितयोः तच्छब्दयोः एकार्थबोधकत्वम्, इति नियमेन प्रथमगृहीततत्पदार्थस्यैव द्वितीयतत्पदेनापि ग्राह्यतया प्रथमतत्पदगृहीतशुक्तित्वप्रकारकत्वस्य निरुक्तानुभवेऽभावात् नातिव्याप्तिः । तत्प्रकारकत्वे सति अनुभवत्वमात्रोक्तौ शुक्तौ इदंरजतं इति भ्रमे तत्पदग्राह्य रजतत्वप्रकारकत्वे सति अनुभवत्वस्य सत्वात् तत्रातिव्याप्तिः,

अतः तद्वद्विशेष्यकत्वं निवेशनीयम्, तन्निवेशे तु तत्पदगृहीत रजतत्ववद्रजतविशेष्यकत्वस्य तत्राभावात् नातिव्याप्तिः। नन्वेवमपि पर्वतो घटत्ववान् ह्रदो वह्निमान् इति समूहालम्बनभ्रमे वह्निमत्पर्वतविशेष्यकत्ववह्निप्रकारकत्वयोः सत्त्वात् अतिव्याप्तिरिति वाच्यम्, तद्वन्निष्ठविशेष्यतानिरूपिता या तन्निष्ठा प्रकारता तच्छाल्यनुभवत्वस्य लक्षणत्वाङ्गीकारात्, तदङ्गीकारे अत्र वह्नेः ह्रदांशे प्रकारत्वेन वह्निमति पर्वतांशे अप्रकारत्वेन वह्निनिष्ठप्रकारतायाः वह्निमत्पर्वतनिष्ठविशेष्यतानिरूपितत्वाभावेन तादृशप्रकारतानिरूपकत्वस्य तत्राभावात् नातिव्याप्तिः। नन्वेवमपि पर्वतो वह्निमान् ह्रदो वह्निमान् इति समूहालम्बनभ्रमे वह्निमत्पर्वतनिष्ठविशेष्यतानिरूपितवह्निनिष्ठप्रकारतानिरूपकत्वस्य सत्त्वात् अतिव्याप्तिरिति वाच्यम्, भ्रमभिन्नत्वेनापि अनुभवस्य विशेषणीयत्वात्, तज्ज्ञानस्य ह्रदांशे वह्न्यवगाहित्वेन भ्रमरूपतया भ्रमभिन्नत्वस्य तत्राभावात् नातिव्याप्तिः। नच निर्विकल्पकप्रत्यक्षे प्रकारताविशेष्यतयोः अभावेन तद्वद्विशेष्यकत्वतत्प्रकारकत्वयोरभावात् अव्याप्तिरिति वाच्यम्, तद्वद्विशेष्यकं तत्प्रकारकं यत् ज्ञानं तद्वृत्तिः अनुभवत्वव्याप्या या जातिः तद्वत्त्वस्य विवक्षणीयत्वात्, निर्विकल्पकप्रत्यक्षे विशेष्यत्वप्रकारत्वयोरसत्त्वेऽपि तद्वद्विशेष्यक तत्प्रकारकज्ञानवृत्त्यनुभवत्वव्याप्ययथार्थानुभवत्वजातेः सत्त्वात् नाव्याप्तिः। अथवा. (न प्रमानापि भ्रमस्स्यान्निर्विकल्पकं, इत्यनेन निर्विकल्पकज्ञाने प्रमात्वभ्रमत्वयोः सिद्धान्ते निराकरणात् अलक्ष्ये तस्मिन् लक्षणासमन्वयेऽपि न क्षतिः॥

मू * तदभाववति तत्प्रकारकानुभवोऽयथार्थः. स एव भ्रम इत्युच्यते, यथा, शुक्तौ इदं रजतं इति ॥

अयथार्थानुभवं लक्षयति तदभाववतीति ॥ अत्रापि सप्तम्यर्थादिकं पूर्ववत् ग्राह्यम् । [illegible] यद्वन्निष्ठविशेष्यतानिरूपकत्वे सति तन्निष्ठप्रकारतानिरूपकत्वे सति अनुभवत्वं अयथार्थानुभवस्य लक्षणम् । शुक्तौ इदं रजतं इति ज्ञाने लक्षणसमन्वयः, तथाहि, तत्पदेन प्रकारीभूतरजतत्वं [illegible] तदभावः रजतत्वाभावः, तद्वती शुक्तिः तन्निष्ठविशेष्यता[illegible]त्वे सति रजतत्वनिष्ठप्रकारतानिरूपकत्वे सति अ[illegible] ज्ञाने सत्वात् । अनुभवत्वमात्रोक्तौ यथार्थानुभवे[illegible] अनुभवत्वानुपादाने अयथार्थस्मृतौ अतिव्याप्तिः । त[illegible]शेष्यकत्वे सति अनुभवत्वमात्रोक्तौ रजते इदं रजतं इति य[illegible] तत्पदेन शुक्तित्वस्य ग्रहणे तदभाववत [illegible] शुक्तित्वा[illegible] तद्विशेष्यकत्वे सति अनुभवत्वस्य तत्र ज्ञाने सत्वात्, तत्प्रकारकत्वस्य निवेशे तु शुक्तित्वप्रकारकत्वस्य पूर्वोक्तज्ञानेऽभावात् नातिव्याप्तिः । तत्प्रकारकत्वे सति अनुभवत्वमात्रोक्तौ रजते इदं रजतं इति प्रमायामतिव्याप्तिः, तत्र तत्पदग्राह्यरजतत्वप्रकारकत्वानुभवत्वयोः सत्वात्, तदभाववद्विशेष्यकत्वनिवेशे तु रजतत्वाभाववद्विशेष्यकत्वस्य तत्राभावान्नातिव्याप्तिः ॥

मू * यथार्थानुभवः चतुर्वि[illegible]क्षानुमित्यु[illegible] उपमितिशाब्दभेदात् । तत्करणम[illegible]

प्रत्यक्षानुमानोपमानशब्दभेदात्। असाधारणं कारणं करणम् ॥

यथार्थानुभवं विभजते यथार्थानुभव इति॥ प्रमाकरणं विभजते प्रत्यक्षेति। करणलक्षणमाह असाधारणेति। नव्यास्तु व्यापारजनकमिति [illegible]म्, तथाच व्यापारजनकत्वे सति (असाधारणकारणत्वं), कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं करणस्य लक्षणमिति फलितम्। घटं प्रति करणीभूत[illegible] लक्षणसमन्वयः, तथाहि, कार्यत्वातिरिक्तो यो धर्मः घट[illegible]र्मः, तद्धर्मावच्छिन्ना या कार्यता घटे विद्यमाना [illegible]रूपिता या कारणता दण्डे विद्यमाना कारणता, त[illegible]मणरूपव्यापारजनकत्वञ्च दण्डे वर्तत इति लक्ष्ये ल[illegible]वयः। (तज्जन्यत्वे सति तज्जन्यजनको व्यापारः, न [illegible]कर[illegible]त्वेनाभिमतपरम्) व्यापारजनकत्वमात्रोक्तौ ईश्वरा[illegible]देः कार्यमात्रं प्रतिकारणत्वेन व्यापारजनकत्वस्यापि सत्वात् तत्रातिव्याप्तिः, असाधारणकारणत्वनिवेशे तु ईश्वरादृष्टादेः कार्यमात्रं प्रति साधारणकारणत्वेन असाधारणकारणत्वस्य तत्राभावात् नातिव्याप्तिः। असाधारणकारणत्वमात्रोक्तौ घटं प्रति भ्रमणरूपव्यापारस्यासाधारणकारणत्वेन व्यापारेऽप्यतिव्याप्तिः, व्यापारजनकत्वनिवेशे तु व्यापारे व्यापारजनकत्वाभावात् नातिव्याप्तिः॥

[illegible]* कार्यनियतपूर्ववृत्ति कारणं। यथा, घटादिकं प्रति दण्डादिः॥

कारणं लक्षयति कार्येति ॥ कार्यनियतत्वे सति कार्यपूर्व वृत्तित्वं कारणस्य लक्षणम् । कार्यनियतत्वञ्च कार्यव्यापकत्वं, तच्च कार्याधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वं, तथाच घटकारणीभूतदण्डे लक्षणसमन्वयः, तथाहि कार्यं घटः, तदधिकरणं कपालः, तद्वृत्तिः योऽत्यन्ताभावः स्वजन्यभ्रमिजन्यभ्रमिवत्त्व सम्बन्धेन दण्डो नास्तीत्याकारकाभावो नायाति, कुतः, स्वं दण्डः, स्वजन्या या भ्रमिः चक्रभ्रमिः, तज्जन्या या भ्रमिः कपालभ्रमिः, तद्वान् कपालः, तद्वत्तासम्बन्धेन कपाले दण्डस्य विद्यमानत्वात्, किन्तु उदासीनः पटाद्यभावः तत्र सम्भवति, तत्प्रतियोगित्वं पटादौ, अप्रतियोगित्वं कार्यरूपघटाव्यवहितप्राक्क्षणवृत्तित्वञ्च दण्डे वर्तते इति लक्षणसमन्वयः । कार्यपूर्ववृत्तित्वमात्रोक्तौ रासभादेरपि कार्यपूर्ववृत्तित्वात् तत्रातिव्याप्तिः, कार्यव्यापकत्वस्य निवेशे तु कार्याधिकरणकपाले निरुक्तसम्बन्धेन रासभो नास्तीत्यभावस्य सत्त्वेन तत्प्रतियोगित्वेन रासभस्य तदप्रतियोगित्वाभावात् नातिव्याप्तिः । कार्यव्यापकत्वमात्रोक्तौ कार्याधिकरणकपाले समवायसम्बन्धेन कार्यभूतघटस्य सत्त्वेन न तत्र घटाभावः सम्भवति, किन्तु पटाद्यभावस्यैव तत्र सत्त्वेन तदप्रतियोगित्वस्य कार्यएव सत्त्वेन तत्रातिव्याप्तिः, तद्वारणाय कार्यपूर्ववृत्तित्वदलं, तन्निवेशे स्वपूर्ववृत्तित्वस्य कार्येऽसम्भवात् न तत्रातिप्रसङ्गः । नचैवं दण्डरूपादावतिव्याप्तिः, तत्र स्वाश्रयजन्यभ्रमिजन्यभ्रमिवत्त्वसम्बन्धेन कार्यव्यापकत्वस्य कार्यपूर्ववृत्तित्वस्य च सत्त्वात् इति वाच्यम्, अनन्यथासिद्धत्वस्यापि विशेषणीयत्वात्, अनन्यथासिद्धत्वञ्च अन्यथासिद्धभिन्नत्वं, अन्यथासि

भूतत्वञ्च क्लृप्तकारणबहिर्भूतत्वं, दण्डरूपादीनां घटकारणतया क्लृप्तेषु दण्डचक्रसलिलकुलालादिषु अनन्तर्भूतत्वेन अन्यथासिद्धत्वात् तद्भिन्नत्वस्य तत्राभावात् नातिव्याप्तिः ॥

मू० * कार्यं प्रागभावप्रतियोगि ॥

कार्यं लक्षयति प्रागभावेति ॥ कार्योत्पत्तेः पूर्वं वर्तमानः भविष्यतीतिप्रतीतिविषयः प्रागभावः, तत्प्रतियोगित्वं कार्ये घटादौ वर्तते इति लक्षणसमन्वयः । (ननु उत्पत्तिमत्त्वं पर्य्यवसन्नम् अभावप्रतियोगित्वमात्रोक्तौ गगनाभावप्रतियोगित्वमादाय गगनेऽतिव्याप्तिः, अतः प्रागभावेति, गगनस्य प्रागभावप्रतियोगित्वाभावात् नातिव्याप्तिः ॥

मू० * कारणं त्रिविधम्, समवाय्यसमवायिनिमित्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणं, यथा, तन्तवः पटस्य, पटश्च स्वगतरूपादेः ॥

कारणं विभजते कारणमिति ॥ यत्समवेतं येषु तन्त्वादिषु समवेतं सत् समवायसम्बन्धेन वर्तमानं सत् कार्यं पटादिरूपं कार्यं उत्पद्यते तं पटादिकं प्रति तत् तन्त्वादिकं समवायिकारणं भवतीत्यर्थः ॥ सर्वत्र कार्यकारणयोः सामानाधिकरण्यस्यावश्यकतया सामानाधिकरण्यनिरूपके एकस्मिन्नधिकरणे कार्यकारणे येन येन सम्बन्धेन वर्तेते तयोः सम्बन्धयोः क्रमेण कार्यकारणतावच्छेदकसम्बन्धरूपतया अत्र घटरूपकार्यस्य समवायसम्बन्धेन कपालरूपकारणस्य तादात्म्यसम्बन्धेन च कपालरूपकाधिकरणे वर्तमानतया ☞ समवायसम्बन्धावच्छिन्नकार्यतानिरू

पित तादात्म्यसम्बन्धावच्छिन्नकारणता। अथवैवं समवायिकार णस्य निष्कृष्टं लक्षणं वक्तव्यं भवति, समवायसम्बन्धावच्छिन्न घटत्वपटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न तन्तुत्वकपालत्वावच्छिन्नकारणताश्रयत्वस्य पटघटादिसमवा यिकारणीभूततन्तुकपालादिषु सत्त्वात् लक्ष्ये लक्षणसम न्वयः। कार्यतायां समवायसम्बन्धावच्छिन्नत्वानिवेशे घटप्रत्य क्षादिनिमित्तकारणीभूतघटादिनिष्ठा [illegible] विषयतासम्बन्धेन ज्ञाय मानघटप्रत्यक्षं प्रति तादात्म्यसम्ब [illegible] य कारणतेन विष यतासम्बन्धावच्छिन्नघटप्रत्यक्षत्व [illegible] तानिरूपित ता दात्म्यसम्बन्धावच्छिन्नकारणता [illegible] सम्बन्धेन न नि [illegible] त्वात्। कारणता यां तादात्म्यसम्बन्धावच्छिन्नत्वानि [illegible] समवायिकारणी भूततन्तुसंयोगादौ समवायसम्ब [illegible] पटत्वावच्छिन्न कार्यतानिरूपितसमवायसम्बन्धावच्छिन्न [illegible] सम्बन्धावच्छिन्न अतिव्याप्तिः॥ अनुप्रविष्टं प्रत्येकावयवद्रव्यं न नैव यत्कार णं. किन्तु द्रव्यस्य भावकार्यमात्रद्रव्यगुणकर्मसमवायिकारणत्व मपि सम्भवतीति ज्ञापयितुं पटस्य स्वगतरूपादीन् अभिधत्ते मूलकारः॥

मू० कार्येण कारणेन वा सहैकस्मिन्नर्थे समवे
तं सत् कारणं असमवायिकारणम्, यथा त
न्तुसंयोगः पटस्य तन्तुरूपं पटगतरूपस्य च॥ १९

असमवायिकारणद्वयमुदाहरणद्वय [illegible] कार्येण कारणेन सहैक स्मिन्नर्थे समवेतं सत् कारणमसमवायि [illegible] कं। कारणेन सहैकस्मिन्नर्थे समवेतं सत्कार [illegible] यिकारणमित्यपरम्।

पटात्मकं प्रति तन्त्वादिसंयोगः प्रथमासमवायिकारणम् । पटादिरूपं प्रति तन्त्वादिरूपं द्वितीयासमवायिकारणम् । कार्येण पटेन सह एकस्मिन्नर्थे तन्तुरूपार्थे समवेतं सत् समवायसम्बन्धेन वर्तमानं सत् कारणं तन्तुसंयोगो भवति तं पटं प्रति तन् तन्तुसंयोगः असमवायिकारणम् इति योजना । कार्यकारणयोः पटतन्तुसंयोगयो[illegible]रूपैकाधिकरणान्तर्भावेण समवायघटित सामानाधिकरण्य[illegible]भ्यत्वेन समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणताश्रयत्वं प्रथमासमवायिकारणस्य लक्षणं फलितं भवति । समवायसम्बन्धावच्छिन्नपटत्व[illegible]न्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नतन्तुसंयोग[illegible]तकारणताश्रयत्वस्य तन्तुसंयोगादौ सत्त्वात् समन्[illegible]यां समवायसम्बन्धावच्छिन्नत्वानिवेशे घटप्रत्यक्षनि[illegible]भूतघटरूपं विषयतासम्बन्धावच्छिन्नघटप्रत्यक्षत्वा[illegible]र्यतानिरूपितसमवायसम्बन्धावच्छिन्नकारणताया[illegible]तिव्याप्तिः । कारणतायां समवायसम्बन्धावच्छिन्नत्वानिवेशे तादात्म्यसम्बन्धावच्छिन्नकारणतामादाय समवायिकारणेऽतिव्याप्तिः । अतः उभयत्र तत्तत्सम्बन्धावच्छिन्नत्वनिवेशः ॥

द्वितीयासमवायिकारणस्थले, कारणेनेत्यस्य स्वकार्यसमवायिकारणेनेत्यर्थः । स्वं तन्तुरूपं, स्वकार्यं पटगतरूपं, तत्समवायिकारणं पटः, तेन सह एकस्मिन्नर्थे तन्तुरूपार्थे समवेतं कारणं तन्तुरूपं भवतीत्यर्थलाभेन तन्त्वन्तर्भावेण अनयोः सामानाधिकरण्यलाभे स्वाश्रयसमवायित्वसम्बन्धावच्छिन्नकार्यतानिरूपितसमवाय[illegible]न्धावच्छिन्नकारणताश्रयत्वमिति लक्षणं मूलतो

लभ्यते. एवञ्च पटीयचित्ररूपं प्रति असमवायिकारणेषु नानातन्तुरूपेषु कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणवृत्त्यत्यन्ताभावीयकारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताशून्यत्वरूपकार्यव्यापकत्वं न सम्भवति, तथाहि, अत्र कार्यतावच्छेदकसम्बन्धः स्वाश्रयसमवायित्वसम्बन्धः, तेन सम्बन्धेन कार्याधिकरणे नीलपीतादितन्तुषु कारणतावच्छेदकसमवायसम्बन्धेन तत्तद्रूपाभावानां चालनीन्यायेन सत्त्वेन तत्प्रतियोगित्वस्य तन्त्वादिगतनीलपीतादिरूपेष्वभावात् तत्र कारणत्वाभावप्रसङ्गवारणाय समवायसम्बन्धावच्छिन्नकार्यतानिरूपितस्वाश्रयसमवेतत्वसम्बन्धावच्छिन्नकारणताश्रयत्वमिति लक्षणं वक्तव्यम्. अतः कार्यतावच्छेदकसमवायसम्बन्धेन कार्याधिकरणं पटादि स्वाश्रयसमवेतत्वसम्बन्धेन नानारूपाणां सत्त्वेन न निरुक्तातिप्रसङ्गः. तथाच, [illegible] समवायसम्बन्धावच्छिन्नकार्यतानिरूपितस्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नकारणताश्रयत्वमिति द्वितीयासमवायिकारणस्य निष्कृष्टं लक्षणं भवति, समवायसम्बन्धावच्छिन्नपटरूपत्वावच्छिन्नकार्यतानिरूपितस्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नतन्तुरूपत्वावच्छिन्नकारणताश्रयत्वं तन्तुरूपादिषु सम्भवतीति लक्षणसमन्वयः । स्वं तन्त्वादिरूपं, स्वसमवायि तन्त्वादिकं, तत्समवेतः पटः, तत्समवेतत्वं पटेवर्तते, अतः अत्र कार्यकारणयोः पटतन्तुरूपयोः पटान्तर्भावेण सामानाधिकरण्यमिति ज्ञेयम्) अत्र कार्यतायां समवायसम्बन्धावच्छिन्नत्वाभिवेदे घटरूपप्रत्यक्षनिमित्तकारणमहत्वे विषयतासम्बन्धावच्छिन्नकार्यतानिरूपितस्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नकारणता

मादाय अतिप्रसङ्गः। कारणतायां स्वाश्रयसमवेतत्वसम्बन्धाव-च्छिन्नत्वनिवेशे समवाय्यसमवायिकारणयोः अतिव्याप्तिः॥

मू॰ तदुभयभिन्नं कारणं निमित्तकारणं। यथा, तुरीवेमादिकं पटस्य। तदेतत्त्रिविधकारणमध्ये यदसाधारणकारणं तदेव करणम्॥

निमित्तकारणं लक्षयति तदुभयेति॥ समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणस्य लक्षणं। पटं प्रति निमित्तकारणतुरीवेमादिषु पटसमवाय्यसमवायिकारणतन्तुतत्संयोगादिभिन्नत्वस्य कारणत्वस्य च सत्त्वात् समन्वयः। कारणत्वमात्रोक्तौ समवाय्यसमवायिकारणयोः कारणत्वानुपादाने पारिमाण्डल्यादौ (परमाणुपरिमाणगगनपरिमाणादिषु) समवाय्यसमवायिकारणयोश्च अतिव्याप्तिवारणाय दलद्वयोपादानम्। नन्वेवमपि घटनिमित्तकारणदण्डस्य स्वीयरूपादिकं प्रति समवायिकारणत्वेन तदा समवायिकारणभिन्नत्वाभावात् अव्याप्तिरिति वाच्यम्, प्रकृतकार्यसमवाय्यसमवायिकारणभिन्नत्वनिवेशे दोषाभावात्। अथवा, समवायिकारणताभिन्ना असमवायिकारणताभिन्ना या कारणता तदाश्रयत्वस्य लक्षणत्वाङ्गीकारे नोक्ताव्याप्तिः॥ करणलक्षणमुपसंहरति तदेतदिति॥ यदसाधारणकारणमित्यत्र व्यापारवत्त्वे सतीति पूरणीयम्, अन्यथा, कपालतन्तुसंयोगादिरूपव्यापारेऽतिव्याप्तिः। तथा च व्यापारजनकत्वतदजनकत्वाभ्यां करणकारणयोः भेदोऽवन्तव्यः, असाधारणकारणत्वन्तु उभयत्र समानमेव॥

मू॰ तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् ॥

षड्विधेन्द्रियरूपप्रत्यक्षप्रमाणं लक्षयति प्रत्यक्षज्ञानात ॥ प्रत्यक्षव्यापारजनकत्वे सति प्रत्यक्षज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं प्रत्यक्षप्रमाणस्य लक्षणम् । प्रत्यक्षज्ञानत्वावच्छिन्ना या कार्यता अयंघटः अयंपटः इत्यादिप्रत्यक्षज्ञानेषु विद्यमाना कार्यता. तन्निरूपित करणः रणता चक्षुरादिप्रत्यक्षप्रमाणनिष्ठा कारणता. तदाश्रय त्व क्षुर्घटसंयोगादिव्यापारजनकत्वञ्च । चक्षुर्मनस्संयोगादिव्यापारजनकत्वम् । चक्षुरादिप्रमाणे वर्तत इति लक्षणसमन्वयः । व्यापारज त्वमात्रोक्तौ कालेश्वरादिष्वपि नान्य असाधारणकारणत्वमात्रोक्तौ च अतिव्याप्तिरिति उपपद्यते ॥ उभयोपादानम् । नचैवं विपर्ययि कव्यापारस्य रसादिप्रत्यक्षजनकस्य अप्रसिद्धत्वे मति ॥ प्रकारत यादीनां जन्यत्वघटितव्यापारत्वासम्भवेन च व्या णाम् । ज्ञान याभावात् रसनेन्द्रियादौ अव्याप्तिरिति वाच्यम् . त्रि च्छाज्ञानिद योगस्य सर्वत्र व्यापारत्वासम्भवेपि इन्द्रियमनस्संयोगरूपस्य वमाप त्रापि िति वाच्यम् सम्भवेन न कुत्राप्यव्याप्तिप्रसक्तिः । नचैवं मनस्यव्याप्तिरिति वाच्यम् । आत्ममनस्संयोगरूपव्यापारमादाय तत्रापि लक्षणसमन्वयसम्भवात् ॥

मू॰ इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ॥

प्रत्यक्षज्ञानलक्षणमाह इन्द्रियार्थेति ॥ इन्द्रियार्थसन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षज्ञानस्य लक्षणम् । ज्ञानत्वमात्रोक्तौ अनुमित्यादावतिव्याप्तिः । ज्ञानत्वा ज्ञाने ध्वंसं प्रति प्रतियोगिनः कारणत्वेन इन्द्रियार्थसन्निक तदर्थ पि इन्द्रि न्निकर्ष ॥ र अव्या ति शङ्का

यो अ भवस्य

जन्यत्वस्य सत्वात् तत्रातिव्याप्तिः, अतः विशेष्यविशेषणयोरुभयोः उपादानम् । नचैवमपि इन्द्रियं मनः, अर्थः आत्मा, तत्सन्निकर्षः आत्ममनस्संयोगः, तज्जन्यत्वज्ञानत्वयोः अनुमित्यादौ सत्वात् अतिव्याप्तिः आत्ममनस्संयोगस्य ज्ञानमात्रं प्रति कारणत्वात् इति वाच्यम् अर्थपदेन प्रकृतज्ञानविषयस्य विवक्षणात् आत्मनः घटादिज्ञानविषयत्वाभावेन अतिप्रसङ्गाभावात । नचैवमपि जीवः ईश्वरभिन्नः सुखादिमत्वात् इत्यात्मविषयकानुमितौ अतिव्याप्तिः दुर्वारा, आत्मनः प्रकृतज्ञानविषयत्वस्यापि सम्भवात् इति वाच्यम्, इन्द्रियार्थसन्निकर्षनिष्ठजनकतानिरूपितजन्यतावच्छेदकीभूतज्ञानत्वभिन्नजातिमत्वस्य लक्षणत्वात. ज्ञानमात्रं प्रति आत्ममनस्संयोगस्य कारणत्वेन इन्द्रियार्थसन्निकर्षपदेन आत्ममनस्संयोगस्य ग्रहणेऽपि तज्जन्यतावच्छेदकीभूता जातिस्तु न ज्ञानत्वभिन्ना, अतो न तत्रातिव्याप्तिः । प्रकृते प्रत्यक्षत्वाख्यजातिमादाय लक्षणसमन्वयश्च ॥ अतएव ईश्वरप्रत्यक्षस्य नित्यत्वेन इन्द्रियार्थसन्निकर्षजन्यत्वाभावेन प्रत्यक्षज्ञानसामान्यलक्षणस्य तत्राव्याप्तिरिति शङ्का निरस्ता ॥ एतेन यथाश्रुत लक्षणे, ज्ञायमानलिङ्गस्य अनुमितिकरणतावादिमते इन्द्रियार्थसन्निकर्षहेतुकानुमितौ अतिव्याप्तिशङ्का निरस्ता)

मू * तद्द्विविधम्, निर्विकल्पकं सविकल्पकञ्चेति । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । (किञ्चिदिदं इति वस्तुमात्रावगाहिज्ञानम्) सप्रकारकं ज्ञानं सविकल्पकम् । यथा, डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयं पाचकोऽयं इति ॥

तद्विभजते तद्द्विविधमिति ॥ प्रकारत्वानिरूपकत्वे सति ज्ञानत्वं निर्विकल्पकप्रत्यक्षस्य लक्षणम्। ज्ञानत्वमात्रोक्तौ सविकल्पके प्रकारत्वानिरूपकत्वमात्रोक्तौ घटादौ च अतिव्याप्तिरिति दलद्वयोपादानम्। प्रथमं विषयेन्द्रियसन्निकर्षः तदनु निर्विकल्पकं, तदनु सविकल्पकं इति क्रमः। निर्विकल्पकज्ञानानङ्गीकारे विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वेन जायमानस्य सविकल्पकप्रत्यक्षानुपपत्तिः। अस्य निर्विकल्पकस्य विशिष्टबुद्धित्वाभावेनैव नास्य ज्ञानान्तरापेक्षा इति नानवस्था। सन्निकर्षजन्यत्वेन अस्य प्रत्यक्षज्ञानरूपत्वमपि उपपद्यते ॥

सविकल्पकं लक्षयति सप्रकारकमिति ॥ प्रकारतानिरूपकत्वे सति ज्ञानत्वं सविकल्पकप्रत्यक्षस्य लक्षणम्। ज्ञानत्वमात्रोक्तौ निर्विकल्पके प्रकारतानिरूपकत्वमात्रोक्तौ इच्छाकृतिसंस्कारद्वेषेषु च अतिव्याप्तिः, अतो दलद्वयोपादानम्। नन्वेवमपि प्रकारतानिरूपकत्वज्ञानत्वयोः सत्त्वात् अनुमित्यादावतिव्याप्तिरिति वाच्यम्, इन्द्रियार्थसन्निकर्षजन्यत्वस्यापि विशेषणीयत्वात्। नन्वेवं ज्ञानत्वदलवैयर्थ्यं, इच्छादीनां इन्द्रियार्थसन्निकर्षजन्यत्वविशेषणेनैव वारणात् इति वाच्यम्, इन्द्रियार्थसन्निकर्षजन्यत्वं विहाय ज्ञानाजन्यत्वस्य विशेषणीयत्वात्। नन्वेवं सविकल्पकप्रत्यक्षस्य निर्विकल्पकप्रत्यक्षजन्यत्वेनासम्भवः इति वाच्यम्, ज्ञानाकरणकत्वस्य तदर्थत्वात्, न च ज्ञानकरणकभिन्नत्वम्, ज्ञानकरणानि अनुमित्युपमितिशाब्दानि, तद्भिन्नत्वम् इति तदर्थः। अत एव ईश्वरप्रत्यक्षस्येन्द्रियार्थसन्निकर्षजन्यत्वाभावेन अव्याप्तिरिति शङ्कापि निरस्ता। नन्वेवमपि स्मृतावतिव्याप्तिः, अनुभवस्य संस्कारं प्रत्ये

चकारणतावादिमते स्मृतेः संस्कारमात्रजन्यत्वेन ज्ञानाकरणकत्वघटितलक्षणसत्वात् इति वाच्यम्, ज्ञानाकरणकत्वञ्च विहाय प्रत्यक्षत्वजातिमत्वस्य विवक्षितत्वात्। नचैवं ज्ञानत्वदलं व्यर्थं, इच्छादीनां प्रत्यक्षत्वदलेनैव वारणात् इति वाच्यम्, तदा ज्ञानत्वस्य तात्पर्यग्राहकत्वात्। तथाच प्रकारतानिरूपकत्वे सति प्रत्यक्षत्वजातिमत्वं सविकल्पकप्रत्यक्षज्ञानस्य लक्षणं फलितं भवति। एवं पृथक् पृथक् संसर्गतानिरूपकत्वे सति ज्ञानत्वम्, विशेष्यतानिरूकत्वे सति ज्ञानत्वम् इत्यपि सविकल्पकस्य लक्षणं भवतीति ज्ञेयम्। एवम् संसर्गत्वानिरूपकत्वे सति ज्ञानत्वम्, विशेष्यत्वानिरूपकत्वे सति ज्ञानत्वम् इत्यपि निर्विकल्पकप्रत्यक्षस्य लक्षणं भवतीत्यपि ज्ञेयम्॥ सविकल्पकप्रत्यक्षमभिनीय दर्शयति डित्थोऽयमिति, डित्थत्वादिप्रकारकं इदंत्वावच्छिन्नविशेष्यकं ज्ञानं सविकल्पकमित्यर्थः। डित्थोऽयमित्याद्युदाहरणानां चतुर्णां प्रयोगः शब्दानां नामजातिगुणक्रियावाचकत्वभेदेन चातुर्विध्यज्ञापनायैवेति बोध्यम्॥

मू॰ प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः। संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति। चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः। घटरूपप्रत्यक्षे संयुक्तसमवायः, चक्षुस्संयुक्ते घटे रूपस्य समवायात्। रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुस्संयुक्ते घटे रूपं समवेतं, तत्र

रूपत्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः, कर्णविवरवृत्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनो स्समवायात् । शब्दत्व साक्षात्कारे समवेतसमवायः सन्निकर्षः, श्रो[illegible] [illegible]ते शब्दे शब्दत्वस्य समवायात् । अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, भूतलं घटाभाववत् इत्यत्र चक्षुस्संयुक्ते भूतले घटाभावस्य [illegible]त्वात् । एवं सन्निकर्षषट्कजन्यं ज्ञान[illegible]करणं अनुमत्करणमिन्द्रियम् । तस्मादिन्द्रियं अनुमितिकरणमिति सिद्धम् ॥ [illegible]रूपितत्वम[illegible]

इति तर्कसङ्ग्रहे प्रत्यमितिनिरूप[illegible]
परिच्छेदः समाप्त[illegible] अनुम[illegible]
श्री श्री श्री [illegible] [illegible]यनिरूपित[illegible] ७

(असन्निकृष्टपदार्थस्य प्रत्यक्षं भानासम्भवः, इति नियमेन प्रत्यक्षविषयपदार्थे सन्निकर्षस्यावश्यकतया तन्निरूपणावश्यकतायां प्रसक्तायां सन्निकर्षं तंउदाहरंति संयोगेत्यादिना ॥ एते लौकिकसन्निकर्षाः । अलौकिकसन्निकर्षाः वक्ष्यन्ते । प्रत्यक्षज्ञानलक्षणघटकीभूतमिन्द्रियार्थसन्निकर्षं दर्शयति संयोगेत्यादिना ॥ द्रव्यप्रत्यक्षे सन्निकर्षमुदाहरंति चक्षुषेति, सन्निकर्षाणामेषां पश्चानामपि प्रथमं इन्द्रियपदं योजनीयम्, [illegible] संयोग[illegible] [illegible]म[illegible] [illegible] यः) पर्वतो [illegible]मान् इत्यत्र युक्तसमवायइत्यादिरीत्या ॥ द्रव्यवृत्तिगु[illegible] [illegible]त्य[illegible] [illegible]षमुदाहरति संयुक्तेति, इन्द्रियसंयुक्तं [illegible] [illegible]द्रव्[illegible] [illegible]तर[illegible] [illegible]यः गुणा

द्विषु वर्तते ॥ गुणादिवृत्तिजातिप्रत्यक्षे सन्निकर्षमुदाहरति रूपत्वेति, इन्द्रियसंयुक्तं द्रव्यं, तत्समवेतं गुणादि, तत्समवायः रूपत्वादिजातौ वर्तते ॥ शब्दसाक्षात्कारे सन्निकर्षमुदाहरति श्रोत्रेणेति । [illegible]ओत्रेन्द्रियं श्रोत्रं तत्समवायः शब्दे वर्तते, श्रोत्रस्य गगनरूप[illegible]त्रयोः समवायात् ॥ शब्दत्वसाक्षात्कारे सन्निकर्षमुदा[illegible]त्वेति । अत्र इन्द्रियं श्रोत्रं, तत्समवेतः शब्दः, तत्समवायः शब्दत्वेवर्तते ॥ अभावप्रत्यक्षे सन्निकर्षमुदाहरति अभावेति । विशेषणविशेष्यभावो नाम विशेषणतासन्निकर्षः, [illegible] प्रथमं इन्द्रियसंयुक्तपदं इन्द्रियसंयुक्तसमवेतपदं इन्द्रियसं[illegible]मवेतसमवेतपदं समवेतपदं समवेतसमवेतपदं च स्थल[illegible]योज्य तत्तदभावस्थले निर्वाह्यम् । भूतलं घटाभाववदि[illegible]इन्द्रियसंयुक्तं भूतलं, तद्विशेषणं घटाभावः, तद्विशेषणता[illegible]भावे वर्तते इति इन्द्रियसंयुक्तविशेषणताख्यः सन्निकर्षः अत्र सम्भवतीति बोध्यम् । एवं क्रमेण इतरेषामप्युदाहरणानि स्थलभेदेन द्रष्टव्यानि ॥

श्रीमत्कुरुगंटुपगाह्वय
श्रीरामशास्त्रि विर
चिते तर्कसङ्ग्रह
सर्वस्वे प्रत्यक्ष
परिच्छेदः
समाप्तः

शुभंभवतु
श्री श्री श्री

श्री
शिवायनमः

तर्कसङ्ग्रहसर्वस्वे

अनुमानपरिच्छेदप्रारम्भः

☞ मू * अनुमितिकरणं अनुमानम् ॥

अनुमानं लक्षयति अनुमितिकरणमिति ॥ अनुमितेः करणं अनुमितिकरणं, षष्ठ्याः निरूपितत्वमर्थः, तस्य करणपदार्थैकदेश करणत्वेऽन्वयः, तथाच अनुमितिनिरूपितकरणतावदभिन्नमनुमानमिति बोधः। अनुमितिकरणत्वं अनुमानस्य लक्षणम्। अनुमितिकरत्वञ्च अनुमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति (अनुमित्यसाधारणकारणत्वे सति) अनुमितिजनकव्यापारजनकत्वं, अत्र प्रथमं पर्वतो धूमवान् इति पक्षधर्मताज्ञानम्। ततः यत्र धूमः तत्राग्निः (वह्निव्याप्यो धूमः) इति व्याप्तिस्मरणम्। उभाभ्यां आभ्यां विशेषणज्ञानरूपाभ्यां वह्निव्याप्यधूमवान् पर्वत इति परामर्शः (परामर्शनामकनिश्चयः)। ततः पर्वतो वह्निमान् इत्यनुमितिः। इति व्याप्तिस्मृतिपरामर्शानुमितीना उत्पत्तिक्रमः (हेतुहेतुमद्भावः) अत्र लक्षणसमन्वयस्तु, अनुमितित्वावच्छिन्ना या कार्यता पर्वतो वह्निमान् इत्यनुमितौ विद्यमा

ना कार्यता, तन्निरूपिता या कारणता वह्निव्याप्यो धूमः इत्या कारके व्याप्तिज्ञाने (अनुमाने) विद्यमाना कारणता, तदाश्रयत्व स्य परामर्शरूपव्यापारजनकत्वस्य च (अनुमाने) व्याप्तिज्ञाने वि द्यमानत्वात् लक्ष्ये लक्षणसमन्वयः। व्यापारजनकत्वमात्रोक्तौ कालेश्वरादृष्टादेः कार्यमात्रं प्रतिजनकत्वेन व्यापारजनकत्वस्यापि सत्वात् अतिव्याप्तिः, अनुमितिनिष्ठकार्यतानिरूपितकारणताश्र यत्वानिवेशेऽपि तत्रैवातिव्याप्तिः, तद्वारणाय अनुमितित्वावच्छि न्नकार्यतानिरूपितकारणताश्रयत्वं निवेशनीयम्. तन्निवेशे तु का लेश्वरादृष्टादौ तस्याभावात् नातिव्याप्तिः। अनुमितित्वावच्छिन्न कार्यतानिरूपितकारणताश्रयत्वमात्रोक्तौ (अनुमित्यसाधारणकार णत्वमात्रोक्तौ) व्यापारभूतपरामर्शस्यापि अनुमित्यसाधारणका रणत्वेन तत्रातिव्याप्तिः, अनुमितिजनकव्यापारजनकत्वनिवेशे तु स्वस्मिन् स्वजनकत्वाभावात् नातिव्याप्तिः। नच व्यापारत्वा वच्छिन्नकार्यतानिरूपितकारणताश्रयत्वाविवक्षणेनैवेश्वरादृष्टादा वतिव्याप्तिवारणसम्भवे अनुमित्यसाधारणकारणत्वनिवेशस्यैवैफ ल्यमिति वाच्यम्, व्यापारत्वेन व्याप्तिज्ञानत्वेन कार्यकारणभावा भावेन असम्भवप्रसङ्गात्। नच विशिष्य परामर्शत्वावच्छिन्नका

☞ अनुमितिकरणमनुमानमित्यत्र॥ नच सिद्धिसमका लीने सिषाधयिषाऽसमानाधिकरणे व्याप्तिज्ञाने (अनुमाने) अनु मितिकारणत्वाभावात् अव्याप्तिरितिवाच्यम्; अनुमितिजनकज्ञा नवृत्तिधर्मवत्वस्य विवक्षितत्वात्। नच अनुमितिजनकज्ञानवृत्तिप्र मेयत्वादिधर्मवत्वस्य व्यापारजनकत्वस्य च ईश्वरादृष्टादौ सत्वात् अतिव्याप्तिरिति वाच्यम्, अनुमितित्वावच्छिन्नजनकतावच्छेदकः

येतानिरूपितकारणताश्रयत्वनिवेशेनैव ईश्वरादृष्टादावतिव्याप्ते रसम्भवस्य च अभावात् अनुमित्यावच्छिन्नहेतुत्वनिवेशनमफल मेवेति वाच्यम्, व्याप्तिपक्षधर्मताज्ञानयोः उभयोरपि विशेषण ज्ञानमुद्रया परामर्शहे[illegible]त्वेन परामर्शत्वावच्छिन्नकार्यतानिरूपित कारणताश्रयत्वस्य पक्षधर्मताज्ञा[illegible]ने सत्त्वात् अतिव्याप्त्यापत्तेः, अनुमितित्वावच्छिन्नका[illegible] सम्बन्धेन कारणताश्रयत्वनिवेशे तु पक्षधर्मताज्ञानस्य परामर्श [illegible]हेतुतया अनुमितित्वावच्छिन्न प्रत्यहेतुतया अनुमित्यसाधारणकारणत्वस्य तत्राभावात् नाति व्याप्तिः। व्याप्तिज्ञानस्य तु अनुमि[illegible]प्रतीत्या अनुमिति त्वावच्छिन्नकार्यतानिरूपितकारण[illegible]पि तत्र सत्त्वात् लक्षणसमन्वयः ॥

मू॰ * परामर्शजन्यं ज्ञानं [illegible]

घटितबुद्धौ घटकज्ञानस्य कारणत्वात् स्वगाद्भिन्नलक्षणघटकी भूतानुमितिं लक्षयति परामर्शजन्यमिति॥ पस प्रकार[illegible]ति ज्ञानत्वमनुमितेः लक्षणम् । पूर्वनिर्दिष्टोत्पत्तिक्रममनुसृत्य परा मर्शजन्यत्वस्य ज्ञानत्वस्य च अनुमितौ सत्वात् समन्वयः। परा

व्यापारजनकतावच्छेदकश्च यो धर्मः तद्वत्त्वस्य विवक्षितत्वात्, सिद्धिसमकालीनव्याप्तिज्ञाने तादृशधर्मस्य व्याप्तिज्ञानत्वस्य स त्वात् समन्वयः । ई[illegible]रादृष्टादौ तस्य अभावात् नातिव्याप्तिः॥ अथवा, पक्षतासहकृतव्याप्तिज्ञानस्यैव अनुमा[illegible]त्वेन सि द्धिसमकालीनस्य अनुमित्यनुपधायकस्य [illegible]ज्ञान त्वमेव न स्वीक्रियते इति नाव्याप्तिशङ्का[illegible] ॥

मर्शजन्यत्वमात्रोक्तौ ध्वंसं प्रति प्रतियोगिनः कारणत्वेन परामर्शध्वंसेऽपि परामर्शजन्यत्वस्य सत्वात् अतिव्याप्तिः, ज्ञानत्वनिवेशे तु ध्वंसे ज्ञानत्वस्याभावात् नातिव्याप्तिः। ज्ञानत्वमात्रोक्तौ प्रत्यक्षज्ञान [illegible] परामर्शजन्यत्वनिवेशे तु प्रत्यक्षज्ञानस्य इन्द्रियार्थ [illegible] यत्वेन तत्र परामर्शजन्यत्वाभावात् नातिव्याप्तिः। नच [illegible] मर्शनिष्ठजनकतायां समवायसम्बन्धावच्छिन्नत्वनिवेशेनैव परामर्शध्वंसेऽतिव्याप्तिवारणात् ज्ञानत्वदळवैयर्थ्यं दर्श [illegible] तियोगितासम्बन्धेन जायमानध्वंसं प्रति तादात्म्यस [illegible] योगिनः कारणत्वेन समवायसम्बन्धावच्छिन्नपरा [illegible] तानिरूपितकार्यत्वस्य परामर्शध्वंसेऽभावात् इति [illegible] नविषयकानुभवस्य संस्कारं प्रति समवायसम्बन्धे [illegible] रणतया परामर्शनिष्ठसमवायसम्बन्धावच्छिन्नजनक [illegible] जन्यत्वस्य साध्यव्याप्यहेतुमत्पक्षविषयकसंस्कारे स [illegible] अतिव्याप्तिवारणाय ज्ञानत्वदळसार्थक्यात्। समवायसम्बन्धेन जायमानानुमितिं प्रति समवायसम्बन्धेन परामर्शस्य कारणत्वात् लक्षणसमन्वयः। एतेन प्रत्यक्षे विषयस्य कारणतया परामर्शप्रत्यक्षेऽपि परामर्शजन्यत्वज्ञानत्वयोः सत्वात् तत्रातिव्याप्तिरिति शङ्कानिरस्ता, प्रत्यक्षे विषयस्य तादात्म्यसम्बन्धेनैव कारणत्वात् समवायसम्बन्धेन कारणत्वाभावात्॥

मू॰ व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः,

यथा, वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान् इति ज्ञानं अनुमितिः॥

अनुमितिलक्षणघटकीभूतपरामर्शं लक्षयति व्याप्तिविशिष्टेति ॥ व्याप्तिविशिष्टञ्च तत् पक्षधर्मताज्ञानञ्च इति कर्मधारयः, व्याप्त्या विशिष्टमित्यत्र तृतीयायाः आधेयत्वं, विशिष्टपदस्य प्रकारतानिरूपकं, पक्षधर्मतायाः ज्ञानमित्यत्र षष्ठ्याः विषयतानिरूपकत्वं, धर्मतापदस्य सम्बन्धश्च अर्थः, तृतीयार्थाधेयत्वस्य प्रकारतायां षष्ठ्यर्थविषयतानिरूपकत्वस्य ज्ञाने च अन्वयः (निपातातिरिक्तनामार्थयोरभेदसम्बन्धेनान्वयः, इति नियमेन अत्र व्याप्तिविशिष्टप्रकारतानिरूपकाभिन्नं पक्षसम्बन्धविषयकं ज्ञानं परामर्शः इति बोध्यः। व्याप्तिनिष्ठप्रकारतानिरूपकत्वे सति पक्षसम्बन्धविषयकत्वे सति ज्ञानत्वं परामर्शस्य लक्षणम्, वह्निव्याप्यधूमवान् पर्वतः इति ज्ञाने धूमांशे व्याप्तेः प्रकारत्वेन व्याप्तिनिष्ठप्रकारतानिरूपकत्वस्य विशेषणविशेष्यभावावगाहिज्ञाने तयोस्सम्बन्धस्यापि विषयत्वनियमेन पर्वतांशे धूमस्य प्रकारत्वेन तत्र धूमपर्वतसम्बन्धस्य संयोगस्यापि विषयत्वस्याङ्गीकार्यतया पक्षसम्बन्धविषयकत्वज्ञानत्वयोश्च सत्त्वात् लक्षणसमन्वयः। ज्ञानत्वमात्रोक्तावनुमितावतिव्याप्तिः। ज्ञानत्वानुपादाने वह्निव्याप्यधूमवत्पर्वतविषयकसंस्कारादौ अतिव्याप्तिः, तत्रापि तत्तद्विषयकत्वस्य अक्षतत्वात्, ज्ञानत्वनिवेशे संस्कारादौ ज्ञानत्वाभावात् नातिव्याप्तिः। व्याप्तिविषयकत्वे सति ज्ञानत्वमात्रोक्तौ वह्निव्याप्यो धूमः इति व्याप्तिस्मृतौ (अनुमाने) अतिव्याप्तिः। पक्षसम्बन्धविषयकत्वे सति ज्ञानत्वमात्रोक्तौ धूमवान् पर्वतः इति पक्षधर्मताज्ञानेऽतिव्याप्तिः, अतः पक्षसम्बन्धविषयकत्वव्याप्तिप्रकारकत्व

योः उपादानम् । परामर्शमभिनीय दर्शयति यथेति ॥ अनुमितिमभिनीय दर्शयति तज्जन्यामिति ॥

☞ मू* यत्र यत्र धूमः तत्राग्निः इति साहचर्यनियमो व्याप्तिः ॥

व्याप्तेः लक्षणमाह यत्रेति ॥ (धूमपदसमभिव्याहृततत्पदेन धूमाधिकरणं वीप्सया यावत्त्वञ्च बोध्यते, तथाच, धूमाधिकरणे यावति वह्निरिति लभ्यते; तथाच (यद्धर्मावच्छिन्नवाचकपदसमभिव्याहारदशायां यावत्पदं श्रूयते तद्धर्मव्यापकत्वं विधेयांशे भासते, इति नियमेन धूमाधिकरणबोधकपदसमभिव्याहृततयाच त्वपर्यवसायिद्विर्वचनश्रुत्या धूमव्यापकत्वं विधेयीभूतवह्न्यंशे भासते, तथाच, धूमव्यापकत्वस्य वह्न्यंशे भाने तुल्यवित्तिवेद्यतया वह्निव्याप्यत्वञ्च धूमे लभ्यते, वह्निव्याप्यत्वस्य वह्न्यभाववदवृत्तित्वे सति वह्निसामानाधिकरण्यरूपतया तदभाववदवृत्तित्वांशस्य प्रयोजनाभावेन त्यागे वह्निसामानाधिकरण्यमात्रं गृह्यते, तथाच, धूमव्यापकवह्निसामानाधिकरण्यं व्याप्तिरिति फलितम् । साहचर्यनियमः इत्यत्र नियमपदस्थाने नियतपदं संयोज्य व्युत्क्रमेण योजने च नियतसाहचर्यमिति लभ्यते ।) साहचर्यनियमः नियतसाहचर्यम् । नियतत्वञ्च व्यापकत्वं, साहचर्यञ्च सामानाधिकरण्यम्, तथाच, धूमाधिकरणवृत्त्यत्यन्ताभावाप्रतियोगिवह्न्यधिकरणवृत्तित्वं व्याप्तिः इति विशेषलक्षणंफलितम्,

---

☞ साहचर्यनियमो व्याप्तिरित्यत्र ॥ साहचर्यं सामानाधिकरण्यम्, नियमः नियमवत्, कृदभिहितो भावो द्रव्यवत्प्रकाशते इति न्यायात्, तदर्थश्च कृता बोध्यमानः भावः धात्वर्थः; द्रव्य

सामान्यलक्षणन्तु हेत्वधिकरणवृत्त्यत्यन्ताभावाप्रतियोगिसाध्य सामानाधिकरण्यं व्याप्तिरिति पर्यवसन्नम्। तथाच, पर्वतो वह्निमान् धूमात् इत्यत्र प्रकृते लक्षणसमन्वयः, तथाहि, हेतुः धूमः, तदधिकरणं महानसादि, तद्वृत्तिः योऽत्यन्ताभावः नहि वह्न्यभावः तत्र वह्नेः सत्वात्, किन्तु घटाभावः, तत्प्रतियोगि घटादिकं, अप्रतियोगि यत्साध्यं वह्न्यात्मकं साध्यं, तदधिकरणं महानसः, तद्वृत्तित्वं धूमे वर्तते इति। अत्र धूमवान् वह्नेः इत्यत्र वह्निरूपासद्धेतौ नातिव्याप्तिश्च, तथाहि वह्निः, तदधिकरणं अयोगोलकं, तद्वृत्तिः योऽत्यन्ताभावः, तत्प्रतियोग्येव साध्यीभूतधूमः, अप्रतियोगि स... ...ते नातिव्याप्तिः नचैवमपि वह्निमान् धूमात् इत्यत्र ... ...व्याप्तिः, हेत्वधिकरणमहानसादिषु चालिनीन्यायेन ... ...तत्तद्व्यक्तित्वेन तत्तद्वह्न्यभावानां सर्वस्यापि वह्नेः प्रतियोगि... ...वाच्यम्, हेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके निवेशनीयत्वात्, तन्निवेशे च हेत्वधिकरणतत्तद्व्य...

...

वदित्यत्र सप्तम्यन्ताद्वतिः, स्वाश्रयं बोध्यमान इवेति यावत्, तथाच वृद्धोध्यमानो भावः स्वाश्रयविशेषणतयापि प्रकाशते इति फलितम्, तथाच नियतं साहचर्यम् इति फलितम्, नियतत्वं व्यापकनिरूपितत्वम्, यत्र धूमः तत्राग्निरिति पदद्वन्द्वोपात्तहेतुकम्, वह्निपदं धूमव्यापकवह्निसामानाधिकरण्याश्रयअनुमितिरूपं द्वार्थश्चाभेदः, तस्य साहचर्येऽन्वयः, एवञ्च धूमसमानाधिकरणात्यन्ताभाव्याभिन्नं नियतं सामानाधि... ...करणं इत्य... ...न्वयः॥

किमुक्तस्याभावप्रतियोगितावच्छेदकत्वस्य तत्तद्व्यक्तित्वे सम्भवेऽपि तदनवच्छेदकत्वस्य साध्यतावच्छेदके सत्वात् तदवच्छिन्नसामानाधिकरण्यमादाय लक्षणसमन्वयसम्भवात् नाव्याप्तिप्रसक्तिः ॥

मू० व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ॥

पक्षधर्मतालक्षणमुदाहरति व्याप्यस्येति॥ षष्ठ्याः आधेयत्वं, पर्वतादौ वृत्तित्वमित्यत्र सप्तम्याः निरूपितत्वञ्च अर्थः, तथाच, व्याप्यनिष्ठपर्वतादिनिरूपितवृत्तित्वं पक्षधर्मतेति बोधः ॥

मू० अनुमानं द्विविधम्, स्वार्थं परार्थञ्चेति ।

स्वार्थं स्वीयानुमितिहेतुः । तथाहि, स्वयमेव भूयो दर्शनेन यत्र धूमः तत्राग्निरिति महानसादौ धूमे व्याप्तिं गृहीत्वा पर्वतसमीपं गतः तद्गते च अग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमः तत्राग्निरिति । तदनन्तरं वह्निव्याप्यधूमवानयं पर्वतः इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्शः इत्युच्यते । तस्मात् पर्वतो वह्निमान् इत्यनुमितिरुत्पद्यते । तदेतत् स्वार्थानुमानम् ॥

स्वार्थानुमानं दर्शयति स्वयमेवेति ॥ (स्वस्यार्थः अनुमितिरूपं प्रयोजनं यस्मात्तत् स्वार्थं, स्वार्थञ्च तत् अनुमानञ्च इति विग्रहः) न्यायाप्रयोज्यत्वे सति अनुमानत्वं स्वार्थानुमानस्य लक्षणम्, (न्यायः पञ्चावयववाक्य समुदायः) अनुमानत्वमात्रोक्तौ परार्थानुमाने न्यायप्रयोज्यत्वमात्रोक्तौ घटादौ च अति

व्याप्तिरितिदलद्वयोपादानम् ॥ अत्र च स्वार्थानुमानसामग्रीं दर्श यति स्वयमेवेत्यादिना । प्रथमं, भूयोदर्शनेनेत्यनेन, भूयोदर्शनम् तदनु, महानसादौ वह्निव्याप्तिं गृहीत्वेत्यनेन व्याप्त्यनुभवः । न द्वैतचान्योन्सन्दिहानः इत्यनेन साध्यसंशयरूपा पक्षता । पर्वते धूमं पश्यन् इत्यनेन पक्षधर्मताज्ञानं । व्याप्तिं स्मरतीत्यनेन व्याप्ति स्मृतिः । सा च (एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति, न्यायेन पक्षधर्मताज्ञानस्य एकसम्बन्धिरूपधूमविषयकज्ञानत्वेन अपरसम्बन्धिन्याः व्याप्तेः स्मारकत्वात् पक्षधर्मताज्ञानरूपैकस म्बन्धिज्ञानजन्या भवति । व्याप्तिस्मृत्युत्तरं परामर्शः । तदन्वनु मितिः, इति क्रमः अनेन वाक्यसमुदायेन बोध्यते ॥

मू० यत्तु स्वयमेव धूमादग्निमनुमाय परप्रति पत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमा नम् । यथा, पर्वतो वह्निमान्, धूमवत्वात्, यो यो धूमवान् स सोऽग्निमान् यथा महानसः. तथाचायं, तस्मात्तथेति । अनेन वाक्येन प्रति पादितात् लिङ्गात् परोऽप्यग्निं प्रतिपद्यते । प्रति ज्ञाहेतूदाहरणोपनयनिगमनानि पञ्च अवय

दी० यत्तु स्वयमेव धूमादग्निमनुमायेत्यत्र ॥ नत्वत्र यत्तु पञ्चावयववाक्यमित्यत्र यच्छब्दस्य पञ्चावयववाक्यपरतया परा र्थानुमानस्य व्याप्तिज्ञानरूपतया उभयोः भेदात् तत् परार्थानुमा नमिति तच्छब्देन परामर्शोऽनुपपन्नः, यत्तच्छब्दार्थयोरैक्यनिय मात्, प्रकृते तदभावात् इतिचेन्न, परस्यार्थः अनुमितिरूपं प्रयो जनं यस्मात् तत् परार्थं, परार्थं अनुमानं यस्मात् तत् इति

घाः । पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्वा
दिति हेतुः । यो यो धूमवान् सोऽग्निमान् यथा
महानसः इत्युदाहरणम् । तथाचायमित्युपन
यः । तस्मात्तथेति निगमनम् । स्वार्थानुमिति
परार्थानुमित्योः लिङ्गपरामर्श एव करणं. तस्मा
ल्लिङ्गपरामर्शोऽनुमानम् ॥

परार्थानुमानमुदाहरति यत्त्विति ॥ न्यायप्रयोज्यत्वेसत्यनु मानत्वं परार्थानुमानस्य लक्षणम् । अनुमानत्वमात्रोक्तौ स्वार्थानु माने न्यायप्रयोज्यत्वमात्रोक्तौ न्यायध्वंसे च अतिव्याप्तिः, अतो दळद्वयोपादानम् ॥ अवयवनामान्युदाहरति प्रतिज्ञेति । क्रमेणा वयवस्वरूपमाह पर्वतोवह्निमानिति । उदाहृतवाक्ये प्रतिज्ञादिवि भागमाह पर्वतोवह्निमानिति प्रतिज्ञेति । पञ्चावयववाक्यप्रयोज्य शाब्दबोधप्रकारः इत्थम्, प्रतिज्ञावाक्यात् वह्निमदभिन्नः पर्वतः इति बोधः । हेतुवाक्यात् धूमादित्यत्र पञ्चम्याः हेतुत्वार्थकतया धूमस्याधेयत्वसम्बन्धेन हेतुत्वेऽन्वये च धूमनिष्ठं हेतुत्वामिति

उभयत्र बहुव्रीहिसमासादेर परार्थानुमानप्रयोजकस्य पञ्चावय ववाक्यस्य बोध्यत्वेन तत् परार्थानुमानमिति तच्छब्देन परा मर्शे अनुपपत्त्यभावात् ॥ यद्वा. यदित्यस्याव्ययतया चतुर्थीवि भक्त्यर्थबोधकत्वमङ्गीकृत्य यत् यदर्थम् यादृशलिङ्गपरामर्शार्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत् लिङ्गपरामर्शोऽनुमानम् इति सम न्वये पूर्वोक्तानुपपत्त्यभावात्, यत्तच्छब्दयोरेकार्थकत्वमपि सम्भ वतीति नानुपपत्तिः ॥ अथवा, आयुः घृतं लाङ्गलं जीवनं इति वत् प्रयोज्यप्रयोजकयोः अभेदोपचारात उपपत्तिः बोध्या ॥

बोधः। उदाहरणवाक्यात् यो यः स स इत्यादिपदानां अग्नि पदस्य धूमव्यापकवह्नौ लक्षणायां तात्पर्यग्राहकत्वेन विनियुक्त त्वेन धूमवान् धूमव्यापकवह्निमान् इति बोधः भवति। उपनय वाक्यात् तच्छब्देन वह्निव्याप्यम् (अर्थात् व्याप्तिप्रत्ययस्य आश्रय त्वार्थकत्वे च वह्निव्याप्यधूमत्यन्ताभावः) इति बोधः भवति। निगमनवाक्यात् तच्छब्दस्य वह्नि......व्यधूमपरामर्शकत्वे पञ्च म्या ज्ञानज्ञाप्यत्वबोधने च वह्निव्याप्यधूमज्ञानज्ञाप्यवह्निमान् पर्वतः इति बोधः भवति। अत्र पूर्वपूर्ववाक्यजन्यप्रसंस्कारसहित चरमवाक्यजनिततावद्वाक्यार्थविषयकसत्यस्मरण तद्बोधानन्तरं मानसिकं वह्निव्याप्यधूमवान् पर्वतः इतिरूपव्याप्तिमत्वमुत्पद्यते, नतु पृथक् पक्षधर्मताज्ञानं व्याप्तिस्मृतिश्चमात्रोक्तौ, तयोः पृथ क्कल्पने गौरवात्. प्रत्येकशाब्दबोधैः तन्नलक्ष्यनिर्वाहेऽपि चारि तार्थ्यात्। ननु सर्वत्र करणत्वस्य व्यापारजन्यः गर्भिततया पक्षधर्मत्वाविषयकस्य व्याप्तिज्ञानमात्रस्य परामर्शकारणत्वं प्रति करणत्वेन स्वार्थानुमितिपरार्थानुमित्योः लिङ्गपरामर्शोऽत्र करणमिति कथनमनुपपन्नमिति चेन्न, स्वार्थानुमानस्थले पूर्वो क्तक्रमेण व्याप्तिपक्षधर्मताज्ञानयोः पृथक् सम्भवेऽपि परार्थानु मानस्थले केवलशाब्दपरामर्शस्थले च तयोः सम्भवाभावेन परा मर्शस्यतूभयत्र सम्भवेनाध अनुपपत्तेः अभावात्। नचैवं परा र्शस्य व्यापाराभावात् करणत्वमनुपपन्नमिति वाच्यम् करणस्य लक्षणे व्यापारजनकत्वविशेषणाभावेऽपि केवल तदन्यतरव्यापारि व्यापारे (परामर्शे) अनुमानलक्षणातिव्याप्तेरस्य इति ऽपि निश्चि तस्य लक्ष्यत्वात्॥ ...त... ...ाघ... ...चेन

मू * लिङ्गं त्रिविधं, अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकिचेति। अन्वयेन व्यतिरेकेण [illegible] अन्वयव्यतिरेकि, यथा, वह्निसाध्ये [illegible] धूमः तत्राग्निः यथा महानस इत्य न्वय[illegible] यत्र वह्निः नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रादइति व्यतिरेकव्याप्तिः॥

[illegible] विभजते अन्वयव्यतिरेकीति॥ अन्वयव्यतिरेकिणं ल [illegible]यति। अन्वयः साध्यः, व्यतिरेकः साध्याभावः [illegible] निरूपितत्वमर्थः, तथाच अन्वयनिरूपितव्याप्तिमत्त्वे [illegible]रेकनिरूपितव्याप्तिमत्त्वं अन्वयव्यतिरेकिणो लक्षणं [illegible]लितम्। अन्वयव्याप्तिमत्त्वञ्च हेत्वधिकरणवृत्त्यत्यन्ताभा[व]प्रतियोगिसाध्याधिकरणवृत्तित्वं, व्यतिरेकव्याप्तिमत्त्वञ्च सा[ध्]याभावव्यापकीभूताभावप्रतियोगित्वम्, तच्च साध्याभावाधिकरणवृत्त्यत्यन्ताभावाप्रतियोग्यभावप्रतियोगित्वम्। तथाच पर्वतो वह्निमान् धूमात् इत्यत्र धूमरूपसद्धेतौ लक्षणसमन्वयः, (अत्र पर्वतः पक्षः वह्निः साध्यः धूमो हेतुः) तथाहि, हेतुः धूमः, तदधिकरणं महानसः, तद्वृत्तिः योऽत्यन्ताभावः नहि वह्न्यभावः किन्तु घटाद्यभावः, तत्प्रतियोगी घटादिः, तदप्रतियोगी यस्साध्यः वह्नि[रू]पः साध्यः, तदधिकरणं महानसः, तद्वृत्तित्वं धूमे वर्तते। सा[ध्यो व]ह्निः. साध्याभावः वह्न्यभावः, तदधिकरणं ह्रदः, तद्वृत्तिः [योऽत्य]न्ताभावः नहि धूमाभावाभावः परन्तु धूमाभावः, तत्प्रति[योग]ी धूम[ः], तदप्रतियोगी योऽभावः धूमाभावः तत्प्रतियोगित्वञ्च

धूमे वर्तते इति लक्षणसमन्वयः। अन्वयव्याप्तिमत्त्वमात्रोक्तौ केव लान्वयिनि घटः अभिधेयः प्रमेयत्वात् इत्यत्र प्रमेयत्वरूपहेतौ अतिव्याप्तिः, (अत्र घटः पक्षः, अभिधेयत्वं साध्यं, प्रमेयत्वं हेतुः) तथाहि, हेतुः प्रमेयत्वम् (ईश्वरीयप्रमाविषयत्वम्) तदधिकरणं घटादिः, तद्वृत्तिः योऽत्यन्ताभावः नहि अभिधेयत्वाभावः अभि धेयत्वस्यैव (ईश्वरेच्छाविषयत्वस्यैव) सर्वत्रापि विद्यमानत्वात् किन्तु पटाद्यभावः, तदप्रतियोगि यत् साध्यं अभिधेयत्वं तत् साध्यं, तदधिकरणं घटादिः, तद्वृत्तित्वं प्रमेयत्वे वर्तते इति। अतः तद्वारणाय व्यतिरेकव्याप्तिशून्यत्वदलम् तन्निवेशे तु तत्र साध्या भावस्याप्रसिद्धत्वेन तद्घटितव्यतिरेकव्याप्तिमत्त्वस्य तत्राभावात् नातिव्याप्तिः। व्यतिरेकव्याप्तिमत्त्वमात्रोक्तौ पृथिवी इतरभिन्ना गन्धवत्वात् इत्यत्र गन्धवत्त्वरूपकेवलव्यतिरेकिहेतौ अतिव्याप्तिः, (अत्र पृथिवी पक्षः पृथिवीतरभेदः साध्यः गन्धवत्वम् हेतुः) तथाहि, साध्याभावः पृथिवीतरभेदाभावः, तदधिकरणं जलादि कं, तद्वृत्तिः योऽत्यन्ताभावः नहि गन्धाभावाभावः परन्तु गन्धा भावः, तत्प्रतियोगी गन्धः, तत्प्रतियोगी योऽभावः गन्धाभावः, तत्प्रतियोगित्वं गन्धे वर्तते इति। अतः तद्वारणाय अन्वयव्याप्ति मत्वं निवेशनीयम्, तन्निवेशे तु गन्धाधिकरणे सर्वत्रापि पृथिवी तरभेदस्य विद्यमानत्वेन हेतुव्यापकसाध्यसामानाधिकरण्यरूपा न्वयव्याप्तेः प्रकृतहेतौ सत्वेऽपि पृथिवीमात्रस्य पक्षत्वेन जलादौ हेतुसाध्ययोरभावेन च दृष्टान्ताभावेन अन्वयव्याप्तिनिश्चयस्य असम्भवेन वस्तुतः अन्वयव्याप्तिमत्वस्य सत्वेऽपि निश्चितान्वय व्याप्तिमत्वस्यैव अन्वयव्यतिरेकिलक्षणघटकत्वेनाङ्गीकर्तव्यतया

गन्धवत्त्वरूपहेतौ निश्चितान्वयव्याप्तिमत्त्वस्याभावात् नाति व्याप्तिः ॥

मू० अन्वयमात्रव्याप्तिकम् केवलान्वयि । यथा, घटोऽभिधेयः प्रमेयत्वात् पटवत् इत्यत्र प्रमेयत्वाभिधेयत्वयोः व्यतिरेकव्याप्तिः नास्ति, सर्वस्यापि प्रमेयत्वात् अभिधेयत्वाच्च ॥

केवलान्वयिलिङ्गं लक्षयति अन्वयेति ॥ अत्र मात्रपदस्य इतरव्यवच्छेदार्थकतया व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वं केवलान्वयिनो लक्षणमिति फलितम् । घटोऽभिधेयः प्रमेयत्वात् इत्यत्र प्रमेयत्वरूपहेतौ लक्षणसमन्वयः । (अत्र घटः पक्षः, अभिधेयत्वं साध्यम्, प्रमेयत्वं हेतुः) ईश्वरीयज्ञानेच्छाकृतीनां विनिगमनाविरहेण सर्वविषयकत्वस्याङ्गीकर्तव्यतया ईश्वरीयज्ञानतदिच्छाविषयत्वयोः सर्वस्मिन्नपि जगति वर्तमानतया प्रमेयत्वं अभिधेयत्वञ्च केवलान्वयिनो (सर्वत्र वर्तमाने) भवतः । तथाच अत्र हेतुः प्रमेयत्वं, तदधिकरणं घटादिः तद्वृत्तिः योऽत्यन्ताभावः नहि अभिधेयत्वाभावः परन्तु पटाद्यभावः, तत्प्रतियोगी पटादिः, तदप्रतियोगि यत् साध्यं अभिधेयत्वरूपं साध्यं, तदधिकरणं पटादि, तद्वृत्तित्वं प्रमेयत्वे वर्तते, अत्र साध्याभावस्याप्रसिद्धत्वेन व्यतिरेकव्याप्तिप्रसक्त्यभावेन व्यतिरेकव्याप्तिशून्यत्वञ्च अस्तीति लक्षणसमन्वयः । अन्वयव्याप्तिमत्त्वमात्रोक्तौ अन्वयव्यतिरेकिणि अतिव्याप्तिः, तद्वारणाय व्यतिरेक

व्याप्तिशून्यत्वम्, त... वेशे तत्र व्यतिरेक... सम्भवेन तच्छून्यत्वस्याभावात् पक्ष... वर्तते ...तिरेकव्याप्तिशून्यत्वमा त्रोक्ता पर्वतो धूमवान् ... अत्र पर्वतः पक्षः धूमः साध्यः, वह्निः हेतुः) व... भिचारिहेतौ अन्वयव्यतिरेकव्याप्त्योः द्वयोरप्यभावेन व्यतिरेकव्याप्तिशून्यत्वस्यापि सम्भवात् अतिव्याप्तिः, अन्वयव्याप्ति... वेशे तु तस्यास्तद्धेतुतया अन्वयव्याप्तिमत्त्वस्याप्यभावात् ना... महानसान्त

मू* व्यतिरेकमात्रव्याप्तिविशेष्यत्वस्य ...रेकि। यथा, पृथिवी इतरेभ्यो ...च्छेदकांशे सा... त्वात्। यदितरेभ्यो न भिद्यते न तत्... साध्य... यथा, जलं। नचेयं तथा। तस्मान्... तथा... अत्र यत् गन्धवत् तदितराभिन्नं इत्यन्वय... नास्ति। पृथ्वीमात्रस्य पक्षत्वात्॥

केवलव्यतिरेकिणो लक्षणमाह व्यतिरेकेति॥ (अत्र पृथिवी पक्षः, इतरभेदः साध्यः, गन्धवत्वं हेतुः) (केवलव्यतिरेकः अत्रास्तीति केवलव्यतिरेकि, व्यतिरेकव्याप्तिरेवात्र विद्यते नान्वयव्याप्तिरित्यर्थः) अन्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्वं केवलव्यतिरेकिणो लक्षणम् अत्र सा... पृथिवी... तरभेदः, तदभावः पृथिवीतरभेदाभावः, तदाधि... ...वी... व्याप्ति... ज... भावा... प्रकारतानिरू... त्तिः योऽत्यन्ताभावः नहि, गन्धाभावाभाव... ...त्व... गन्... लक्षण... तत्प्रतियोगी गन्धः, अप्रतियोगी यो... गन्... भावः तत्प्रतियोगित्वं गन्धे वर्तते एवं हेत्वधिकरणं ... ...त्तिः योऽत्यन्या

[illegible] तर्हि इतरभेदाभावः किन्तु पदार्थाभावः, तत्प्रतियोगी [illegible] तद्प्रतियोगी यः [illegible] यः पृथिवीतरभेदरूपः साध्यः, तदधिक [illegible] सत्वस्यापि गन्धे सत्वेनान्वयव्याप्ति शून्यत्वास[illegible] लक्षणे निश्चितान्वयव्याप्तिशून्यत्वस्यैव निवेशनीयतया [illegible] थवीमात्रस्य पक्षत्वेन जलादौ हेतुसाध्य योः अभावेन [illegible] गन्धः तत्र इतरभेदः इत्यत्र अन्वयदृष्टा न्ताभावेन अन्वयव्याप्तिनिश्चयासम्भवेन निश्चितान्वयव्याप्ति शून्[illegible]मपि गन्धरूपहेतौ उपपद्यते इति लक्षणसम न्व[illegible]व्याप्तिशून्यत्वमात्रोक्तौ पर्वतो धूमवान् वह्नेः इत्य [illegible]तिव्याप्तिः। व्यतिरेकव्याप्तिमत्त्वमात्रोक्तौ अन्व य[illegible] अतिव्याप्तिः, अतो दलद्वयोपादानम्॥ केवल [illegible]थले पञ्चावयववाक्यमुदाहरति यदिति॥ यत् जलं, [illegible]यः न भिद्यते इतरभेदाभाववत्, तज्जलं, न गन्धवत् [illegible]भावचत्, नचेयं नथा, इयं पृथिवी न तथा गन्धाभाववती न किन्तु गन्धाभावाभाववती गन्धवतीति फलितोऽर्थः। तस्मात् गन्धाभावाभाववत्वात् गन्धवत्वात् न तथा इतरभेदा भाववती न किन्तु इतरभेदाभावाभाववती इतरभेदवतीति पर्यवसितोऽर्थः॥

मू॰ * सन्दिग्धसाध्यवान् पक्षः, यथा,धूमवत्वे हेतौ पर्वतः॥

[illegible]थिवीमात्रस्य पक्षत्वादित्यत्र निर्दिष्टं पक्षं लक्षयति सन्दि ग्धे[illegible]पूर्वकदिह धातोः सन्देहोऽर्थः, क्तप्रत्ययस्य विषयोऽर्थः, तथ[illegible] साध्ये[illegible]न्वये सन्देहविषयीभूतसाध्याश्रयत्वम् पक्षस्य लक्ष

णं इति फलितम्। सन्देहः पर्वतो वह्निमान् नवेति सन्देहः, तद्वि षयीभूतः यः साध्यः वह्निरूपः साध्यः, तदाश्रयत्वं पर्वतो वह्नि मान् धूमात् इत्यत्र पक्षभूतपर्वते वर्तते इति लक्षणसमन्वयः। सन्दिग्धत्वानुपादाने पूर्वोक्तस्थलएव वह्निरूपसाध्याश्रयत्वमादा य सपक्षे महानसादावतिव्याप्तिः। तदुपादाने सपक्षस्य निश्चित साध्याश्रयत्वेन सन्दिग्धसाध्याश्रयत्वस्याभावात् नातिव्याप्तिः। नन्वेवमपि पर्वतान्तर्भावेण सन्दिग्धस्य साध्यस्याश्रयत्वमादाय सपक्षेऽतिव्याप्तिः सम्भवतीति वाच्यम्. साध्यप्रकारकसन्देह विशेष्यत्वस्य तदर्थत्वात्, तथाच, महानसान्तर्भावेण साध्यप्रका रकसन्देहाभावेन तादृशसन्देहविशेष्यत्वस्य तत्राभावेन नाति व्याप्तिः। नचैवमपि साध्यतावच्छेदकांशे साध्यस्यापि विशेष्य तया साध्यप्रकारकसन्देहविशेष्यत्वस्य साध्येऽपि सत्वात् अति व्याप्तिरिति वाच्यम्, साध्यप्रकारकसन्देहनिरूपितमुख्यविशेष्य त्वस्य विवक्षितत्वात्, वह्नेः वह्नित्वांशे विशेष्यत्वेऽपि पर्वतांशे प्रकारत्वेन वह्नित्वनिष्ठप्रकारतानिरूपितवह्निनिष्ठविशेष्यतायाः पर्वतनिष्ठविशेष्यतानिरूपितप्रकारतासमानाधिकरणतया (प्रका रत्वावच्छिन्नतया) मुख्यविशेष्यतात्वाभावेनातिव्याप्त्यभावात्। विशेष्यतायां मुख्यत्वञ्च प्रकारत्वासमानाधिकरणत्वं प्रकारत्वा नवच्छिन्नत्वं वा बोध्यम्। नच पर्वतो वह्निमान् नवा भूतलं घट वत् नवा इति समूहलम्बनरूपं साध्यप्रकारकसंशयमादाय तन्नि रूपितमुख्यविशेष्यतामादाय भूतलादावतिव्याप्तिरिति वाच्यम्, साध्यनिष्ठप्रकारतानिरूपिता(साध्याभावनिष्ठप्रकारतानिरूपिता) या संशयीया मुख्यविशेष्यता तदाश्रयत्वस्य लक्षणत्वात्, समू

द्यालम्बनज्ञाननिरूपितभूतलनिष्ठविशेष्यतायाः साध्यप्रकारकसंशयनिरूपितत्वेऽपि भूतले साध्यतदभावयोरप्रकारत्वात् तत्तद्विष्टप्रकारतानिरूपितविशेष्यतायाः भूतलेऽसत्त्वेनातिव्याप्त्यभावात्॥ इदञ्च लक्षणं साध्यसंशयस्य पक्षतात्वमङ्गीकुर्वतां प्राचां मते बोध्यम्। नवीनमते तु संशयविरहदशायामपि घनगर्जितेन मेघानुमानेन सिषाधयिषाकालिकसिद्धिदशायां अनुमित्युत्पत्त्याच्च इदं लक्षणं विहाय सिषाधयिषाविरहविशिष्टसिद्ध्यभाववत्त्वं पक्षलक्षणं बोध्यम्। केषांचिन्मते अनुमित्युद्देश्यत्वमेव पक्षत्वं बोध्यम्॥

मू* निश्चितसाध्यवान् सपक्षः। यथा, अत्रैव महानसः॥

सपक्षं लक्षयति निश्चितेति॥ निश्चिनोतेः निश्चयोऽर्थः,क्तप्रत्ययस्य विषयोऽर्थः, तथाच, निश्चयविषयसाध्याश्रयत्वं सपक्षस्य लक्षणम्। निश्चयः महानसो वह्निमान् इति निश्चयः, तद्विषयीभूतः यः साध्यः वह्निरूपः साध्यः, तदाश्रयत्वं महानसे वर्तते इति समन्वयः। निश्चितपदाभावे संदिग्धसाध्याश्रयत्वमादाय पक्षेऽतिव्याप्तिः। तन्निवेशे पक्षे साध्यनिश्चयाभावेन निश्चितसाध्याश्रयत्वस्य तत्राभावात् नातिव्याप्तिः। नचैवमपि महानसान्तर्भावेण निश्चयविषयस्य साध्यस्य आश्रयत्वमादाय पक्षेऽतिव्याप्तिरिति वाच्यम्. साध्यप्रकारकनिश्चयविशेष्यत्वस्य निवेशनीयत्वात्, पक्षान्तर्भावेण साध्यप्रकारकनिश्चयाभावेन साध्यप्रकारकनिश्चयविशेष्यत्वस्य पक्षेऽभावात् नातिव्याप्तिः। अत्रापि पूर्ववत् यद्वयादावतिव्याप्तिवारणाय महानसो वह्निमान् घटवत् भू

तलं इति समूहालम्बनात्मकनि[illegible]यमादाय भूतलादावतिव्याप्ति वारणाय च सा[illegible]यनिष्ठप्रकारतानिरू[illegible] तन्नाभि[illegible]यमुख्यविशेष्य ताश्रयत्वपर्यन्तमत्र लक्षणस्य अभिप्रेतता अस्त्येव ॥

मू॰ निश्चितसाध्याभाववान् विपक्षः। यथा, तत्रैव महाह्रदः ॥

विपक्षलक्षणमाह निश्चितेति ॥ निश्चयविषयीभूतसाध्या भावाश्रयत्वं विपक्षस्य लक्षणम्। यतथा[illegible] वह्निमान् धूमात् इत्यत्र महाह्रदरूपविपक्षे लक्षणसमन्वय[illegible]प्रसङ्गः ॥ अ[illegible] निश्चयः ह्रदो वह्न्य भाववान् इतिनिश्चयः, तद्वि[illegible]यत्वं सद्धेतु साध्याभावः वह्न्य भावः, तदाश्रयत्वं ह्रदेऽस्तीति पृथिवीत्वात् [illegible]यः। निश्चितपदा भावे ह्रदो वह्निमान् धूमात् इत्यत्र[illegible] साध्याभावा श्रयत्वस्य सत्वात् अतिव्याप्तिः। [illegible] अनुमितिकाले साध्याभावसंशयस्यैव सत्वेन तन्निश्चयाभावात्[illegible]साध्या भावाश्रयत्वस्य असत्वात् नातिव्याप्तिः। नन्वेवमपि ह्रदो वह्नि मान् इत्यनुमितिकाले पक्षभूतह्रदेऽपि घटाद्यन्तर्भावेण नि श्चयविषयवह्न्यभावरूपसाध्याभावाश्रयत्वस्य विद्यमानत्वात् अतिव्याप्तिरिति वाच्यम्, साध्याभावप्रकारकनिश्चयविशेष्य त्वस्य विवक्षणीय[illegible]त्वात्, अनुमितिकाले ह्रदे पक्षे साध्याभावनि श्चयाभावेन साध्याभावप्रकारकनिश्चयवि[illegible]त्वस्य तदा ह्रदे अभावेन नातिव्याप्तिः। अत्रापि [illegible]त [illegible]व्याप्ति वारणाय मुख्यविशेष्यत्वम् गुणो [illegible]; घटावत्स साह्नर्जलवान् इति समूहालम्बननिश्चयमादाय, पक्षीभूतह्रदेऽतिप्रसङ्गवारणा

...त्तयोर्गत...
य... ...निरूपितानिश्चयीयमुख्यविशे...
...त्वपर्यन्तं लक्षणं ...र्णीयमेव. तथा परिष्कारे
ह्रदांशे व... ...वनं साध्याभावनिष्ठप्रकारतानिरूपि
तनिश्चयीयमु... ...श्रयत्वस्य पक्षभूतह्रदेऽभावात् नाति
व्याप्तिः ॥

एवं सद्धेतवो निरूपिताः ॥

... ...धर्मताविशिष्टत्वं सद्धेतूनां लक्षणम । व्याप्तिप
क्ष... ...भाववत्त्वं असद्धेतूनां लक्षणम् । व्याप्त्यभाववत्त्व
... ...वह्निमान् धूमात् इत्यत्र बाधितहेतौ व्याप्त्यभाव
व... ...भात् अव्याप्तिः । पक्षधर्मत्वाभाववत्त्वमात्रोक्तौ पर्वतो
... ...ह्निः इत्यत्र व्यभिचारिहेतौ पक्षधर्मत्वाभाववत्त्वस्याभा
... अव्याप्तिः । तदुभयाभाववत्त्वाविवक्षणे तु बाधितव्यभिचा
रिणोरपि (एकसत्त्वे द्वयं नास्तीति, प्रतीत्या उभयाभाववत्त्वस्या
क्षतत्वेन न कुत्राप्यव्याप्तिप्रसक्तिः । व्याप्तिपक्षधर्मत्वान्यतराभाव
वत्वोक्तौ बाधितव्यभिचारिणोः तदन्यतरस्य सद्भावात् अव्याप्ति
रित्युभयाभावपर्यन्तानुसरणम् । एवम् व्याप्तिविशिष्टपक्षधर्मत्वा
भावरूपविशिष्टाभावस्यापि असद्धेतुलक्षणत्वमुपपद्यत एव, ह्रदो
वह्निमान् धूमात् इत्यादिबाधितहेतौ पक्षधर्मत्वरूपविशेष्याभाव
प्रयुक्तः विशिष्टाभावः सम्भवति, पर्वतो धूमवान् वह्नेः इत्यत्र
व्याप्तिरूपविशेषणाभावप्रयुक्तः विशिष्टाभावश्च सम्भवतीति न
का... ...पे अनुपपत्तिः । नच उत्पत्तिकालावच्छिन्नघटो गन्धवान्
पृ... ...त्वात् इत्यत्र पृथिवीत्वरूपबाधितहेतौ व्याप्तिपक्षधर्मतयो

रुमयोरपि सद्भावेन व्याप्तिपक्षधर्मत्वोभयाभावरूपलक्षणस्य व्याप्तिविशिष्टपक्षधर्मत्वाभावरूपलक्षणस्य च तत्राभावेन अव्याप्तिरिति वाच्यम्. अत्र लक्षणद्वये पक्षधर्मतायाः साध्याश्रयपक्षवृत्तित्वरूपत्वेन विवक्षणीयतया लक्षणद्वयेऽप्यव्याप्तिप्रसक्त्यभावात् ॥ नच तर्हि व्याप्तिपक्षधर्मताविशिष्टत्वरूपसद्धेतुलक्षणस्य उत्पत्तिकालावच्छिन्नघटो गन्धवान् पृथिवीत्वात् इत्यत्र पृथिवीत्वरूपहेतावतिव्याप्तिरिति वाच्यम्. तत्रापि पक्षधर्मतायाः साध्याश्रयपक्षवृत्तित्वरूपत्वेन परिष्करणीयतया तादृशपक्षधर्मतायाः प्रकृतपृथिवीत्वहेतावभावाच्च नातिप्रसङ्गः ॥ अथवा, सव्यभिचारादन्यतमत्वमसद्धेतुत्वम् । तदभाववत्त्वं सद्धेतुत्वम्, एवञ्च उत्पत्तिकालावच्छिन्नघटो गन्धवान् पृथिवीत्वात् इत्यत्र पृथिवीत्वरूपहेतोः सव्यभिचाराद्यन्यतमान्तर्गतत्वेन (बाधितत्वेन) असद्धेतुत्वमेव, इति न कापि अनुपपत्तिः) ॥

संतमर्थं बुबोधयिषुणा केनचित् पुंसा पर्वतादौ वह्न्यादिसाधके धूमादिरूपसद्धेतौ प्रयुक्ते सति पञ्चम्यन्तत्वादिना सद्धेतुत्वभ्रमजनके ह्रदो वह्निमान् धूमात् इत्याद्यसद्धेतौ प्रतिपक्षिणा परवञ्चनाय प्रयुक्ते सति तस्मिन् प्रतिपक्षिहेतौ दोषोद्भावनाय दुष्टहेतवो निरूप्यन्ते ॥

मू॰ सव्यभिचारविरुद्धसत्प्रतिपक्षाऽसिद्धबाधिताः पञ्च हेत्वाभासाः ॥

हेतुवदाभासन्त इति हेत्वाभासाः; तत्पदस्य सादृश्यं आङ्पूर्वकभासधातोः आभासश्चार्थः, आभासो नाम भ्रमः, आख्या

तस्य विषयत्वमर्थः, हेतोः सादृश्ये आधेयत्वसम्बन्धेन सादृश्यस्य च आभासे प्रकारतानिरूपकत्वसम्बन्धेन च अन्वयः, हेतुपदं सद्धेतुपरं, (सादृश्यञ्च व्याप्तिपक्षधर्मताविशिष्टत्वरूपं ग्राह्यं) तथाच, सद्धेतुनिष्ठसादृश्यप्रकारकभ्रमविषयाः पञ्च हेतवः इत्यर्थः। इमे एव दुष्टहेतवः इत्युच्यन्ते। दुष्टत्वञ्च दोषविशिष्टत्वं। दोषाश्च व्यभिचारविरोधसत्प्रतिपक्षाऽसिद्धिबाधाः॥

दोषलक्षणन्तु, अनुमितितत्करणान्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वम। तद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयस्य तदभावव्याप्यवत्तानिश्चयस्य च प्रतिबन्धकत्वं वर्तते. तथाच ह्रदो वह्निमान् धूमात् इत्यत्र वह्न्यभाववद्ध्रदरूपबाधे लक्षणसमन्वयः तथाहि, अनुमितिः, ह्रदो वह्निमान् इत्यनुमितिः, तत्प्रतिबन्धकं यत् यथार्थ ज्ञानं ह्रदोवह्न्यभाववान् इति निश्चयरूपं ज्ञानं, तद्विषयत्वं वह्न्यभाववद्ध्रदे वर्तते इति॥ अस्मिन्नेव स्थले वह्न्यभावव्याप्यवद्ध्रदरूपसत्प्रतिपक्षेऽपि लक्षणसमन्वयः कार्यः, तथाहि, अनुमितिस्तु निरुक्तैव, प्रतिबन्धकज्ञानन्तु वह्न्यभावव्याप्यवान् ह्रदः इति निश्चयरूपं ग्राह्यम्॥ अनुमितिप्रतिबन्धकज्ञानविषयत्वमात्रोक्तौ पर्वतो वह्निमान् प्रमेयत्वात् इत्यत्र वह्न्यभाववद्वृत्तिप्रमेयत्वरूपव्यभिचारेऽव्याप्तिः, तत्र वह्न्यभाववद्वृत्ति प्रमेयत्वं इतिनिश्चयस्य वह्न्यभाववद्वृत्ति प्रमेयत्वं इति व्याप्तिज्ञानं प्रत्येव तदभाववत्तानिश्चयमुद्रया प्रतिबन्धकत्वेन अनुमितिप्रतिबन्धकत्वाभावात्, अतः करणपदम्, एतन्निश्चयस्य अनुमितिप्रतिबन्धकत्वाभावेऽपि करणीभूतव्याप्तिज्ञानप्रतिबन्धकत्वात् व्यभिचा

...गिता समवा... ...ज्ञानविषयत्वमा
रेऽपि ...ता, तन्नि... समवायसं...
त्वोक्तौ बाध... निसिद्धाभा... ...करण ...तियन्यकज्ञान
विषयत्वाभावात् अ... ...मातितत्करणान्यतरप्रति
...नाभावात्, तन्नि...
बन्धकत्वस्य लक्षणे नि... ...तु बाधनिश्चयस्यानुमिते
...सम्बन्धावच्छि...
प्रतिबन्धकत्वेन तदन्यत... ...कत्वस्य सत्वात् समन्वयः ॥
...वह्नि

...षाञ्च दोषाणां स्वज्ञानाविषयप्रकृतहेतुतावच्छेदकधर्म
घत्वसम्बन्धेन हेतौ सत्वात् हे... ...दुष्टत्वव्यवहारः ह्रदो वह्नि
...प्रयोगसे...
मान् धूमात् इत्यत्र वह्न्यभाव... ...अनेन सम्बन्धेन
...पर्वतः, कि...
धूमरूपहेतौ सत्वात् धूमस्य दुष्ट... ...व्याप्तिः ॥ सा... तथाहि, स्वं वह्न्य
भाववद्ह्रदः, तद्विषयकं यत् ज्ञानं ...त्वविशेषणं ... ह्रदः धूमश्च इति
समूहालम्बनात्मकं ज्ञानं, तद्विषयभूतौ अति...तुतावच्छेदकं धूम
त्वम, तद्वृत्वसम्बन्धेन वह्न्यभाववद्... धू... प्रतिदे इति ॥

मू॰ * सव्यभिचारोऽनैकान्तिकः । स त्रिविधः,
साधारणासाधरणानुपसंहारिभेदात् । तत्र
☞ साध्याभाववद्वृत्ति· साधारणः । यथा,
पर्वतो वह्निमान् प्रमेयत्वात्. अत्र प्रमेयत्वस्य
वह्न्यभाववति ह्रदे विद्यमानत्वात् ॥

सव्यभिचारं विभजते स त्रिविध इति । साधारणाद्यन्यत
मत्वं सव्यभिचारसामान्यलक्षणम । साधार... ...साध्या
भाववदिति । साध्यनिष्ठप्रतियोगिता ...निष्ठ... ...तियोगितानि... ...त्तित्वं
...रणे... ...लक्षण
☞ साध्याभाववद्वृत्तिः साधार... ...त्र ॥ ...ध्यस्याभावः
साध्याभावः, सोऽत्रास्तीति ... ...भा... ...न, सध्याभाववति

अभ्यारण [illegible] प्रतियोगित्व पर्वतो वह्निमान् प्रमेयत्वात् [illegible] लक्षणसमन्वयः (अत्र पर्वतः [illegible] तथाहि, साध्यः वह्निः, तन्नि ष्ठा या [illegible] भस्तीत्याकारकप्रतीतिसिद्धाभावीया वह्नित्वाव [illegible] गिता, तन्निरूपको योऽभावः वह्न्यभावः, तदधिकरणं [illegible] निरूपितवृत्तित्वं प्रमेयत्वे वर्तते इति । पर्वतो वह्निमान् धूमात् इत्यत्र धूमरूपसद्धेतौ नातिव्याप्तिः, तत्र साध्याभावः वह्न्यभावः, तदधिकरणं ह्रदादिः, तन्निरूपितवृत्तित्वस्य [illegible] सत्त्वात् । अत्र साध्यनिष्ठप्रतियोगितायां साध्यता [illegible] सम्बन्धावच्छिन्नत्वविशेषणं देयम्, अन्यथा, पर्वतो [illegible] मान् इत्यत्र धूमरूपसद्धेतावतिव्याप्तिः, साध्यनिष्ठाया [illegible] स्मिन् सः साध्याभाववद्वृत्तिः, तस्य भावः साध्याभाव [illegible], साध्यस्येत्यत्र षष्ठ्याः प्रतियोगितानिरूपकत्वमर्थः, [illegible] ध्यस्य प्रतियोगितायां आधेयत्वसम्बन्धेनान्वयः, साध्याभाववतीत्यत्र सप्तम्याः निरूपितत्वं अर्थः, वृत्तिः वृत्तित्वं, यस्मिन् सः इत्यत्र सप्तम्याः आधेयत्वमर्थः, अस्य च साध्याभाववद्वृत्तित्वेऽन्वयः, तथाच (विग्रहवाक्यात् यादृशबोधो जायते समासवाक्यात् तद्विपरीतबोधो जायते, इति नियमानुसारेण यद्वृत्ति साध्यनिष्ठप्रतियोगिताकाभाववद्वृत्तित्वं इति बोधो जायते, समासवाक्यात्तु साध्याभावाधिकरणनिरूपितवृत्तिताविशिष्टः इति बोधो भवति, तत्र भावार्थकत्वप्रत्ययसंयोजने च ता [illegible] वृत्तिताविशिष्टत्वं इति बोधो भवति, वृत्तिताविशिष्टत्वञ्च (प्र [illegible] स्यर्थं प्रकारीभूतधर्मो भावप्रत्ययार्थः, इति नियमेन तादृश

प्रतियोगिता समवायसम्बन्धावच्छिन्ना वह्नित्वावच्छिन्ना प्रतियोगिता, तन्निरूपको योऽभावः समवायसम्बन्धेन वह्निर्नास्तीतिप्रतीतिसिद्धाभावः, तदधिकरणं पर्वतः तत्र संयोगेन वह्नेःसत्वेऽपि समवायेनाभावात्, तन्निरूपितवृत्तित्वस्य धूमे सत्वात्। साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशे तु साध्यतावच्छेदकसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकाभावः संयोगेन वह्न्यभाव एव, न तु समवायेन वह्न्यभावः एतदीयप्रतियोगितायाः साध्यतावच्छेदकसंयोगसम्बन्धानवच्छिन्नत्वात्, संयोगेन वह्न्यभावाधिकरणन्तु न पर्वतः, किन्तु ह्रदादिः, तन्निरूपितवृत्तित्वस्य तत्राभावात् नातिव्याप्तिः॥ साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकधर्मावच्छिन्नत्वविशेषणं देयम्, अन्यथा,पर्वतो वह्निमान् धूमात् इत्यत्र धूमरूपहेतौ अतिव्याप्तिः, साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यनिष्ठा या प्रतियोगितेत्युक्तौ संयोगेन वह्निघटत्वोभयं नास्तीतिप्रतीतिसिद्धाभावीया वह्निघटत्वोभयत्वावच्छिन्ना प्रतियोगिता गृहीते, तन्निरूपकाभावः वह्निघटत्वोभयाभावः (एकसत्वे द्वयं नास्तीति, प्रतीत्या तदधिकरणं पर्वतः, तन्निरूपितवृत्तित्वं धूमे वर्तते इति। साध्यतावच्छेदकावच्छिन्नत्वनिवेशे तु साध्यतावच्छेदकावच्छिन्नत्वस्य साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वरूपतया वह्निघटत्वोभयाभावीयप्रतियोगिताया

वृत्तितारूपमेव, तथाच साध्यनिष्ठप्रतियोगितानिरूपकाऽभावाधिकरणनिरूपितवृत्तित्वं साधारणहेतोः लक्षणमिति फलितम्॥

गिनायाः साध्यतावच्छेदकातिरिक्तोभयत्वरूपधर्मावच्छिन्नतया तदनवच्छिन्नप्रतियोगिताकवह्निसामान्याभावाश्रयत्वस्य पर्वतेऽभावाच्च नातिव्याप्तिः ॥ साध्याभावाधिकरणनिरूपितवृत्तितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणं देयम्, अन्यथा, वह्निमान् धूमात् इत्यत्र धूमरूपहेतावतिव्याप्तिः, तत्र संयोगेनवह्न्यभावाधिकरणधूमावयवनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वस्य धूमे सत्वात । हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशे तु धूमावयवनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तितायाः हेतुतावच्छेदकसंयोगसम्बन्धानवच्छिन्नत्वेन न तां वृत्तितामादाय तत्रातिव्याप्तिः ॥

अत्र वह्न्यभाववद्वृत्ति प्रमेयत्वं इति व्यभिचारनिश्चयस्य वह्न्यभाववद्वृत्ति प्रमेयत्वं इति अनुमितिकरणीभूतव्याप्तिज्ञानांशे (तदभाववत्तानिश्चयमुद्रया) प्रतिबन्धकत्वात वह्न्यभाववद्वृत्ति प्रमेयत्वरूपव्यभिचारस्य तादृशनिश्चयविषयत्वेन हेत्वाभासलक्षणसमन्वयः सम्भवतीति बोध्यम् ॥

मू* सर्वसपक्षविपक्षव्यावृत्तो हेतुः असाधारणः । यथा, शब्दो नित्यः शब्दत्वात . अत्र शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तम, शब्दमात्रवृत्ति ॥

असाधारणं लक्षयति सर्वसपक्षेति ॥ सर्वसपक्षविपक्षेभ्यो व्यावृत्तः सर्वसपक्षविपक्षव्यावृत्तः । पञ्चम्याः निरूपितत्वमर्थः, वि आङ् पूर्वकवृत्धातोः व्यावृत्तिरर्थः, सा च वृत्तित्वाभावरू

पा, क्रमप्रत्ययगु ग्रन्थेषु सपक्षव्यावृत्ताऽसाधारणनिरूपितवृत्तित्वाभाववत्वे सति सपक्षावृत्तित्वरूपमूलोक्तलक्षणं शब्दोऽसाधारणहेतोः लक्षणमिति द्वितावपि साध्यसंशयदशायां असाध्यधान्, विपक्षः निश्चितसाध्याभाववत्य अभिहितम् । (शब्दः पक्षः, नित्यत्वं साध्यं, शब्दत्वं हेतुः) असद्धेतुतया लक्षणेन साध्यसंशयसन्नावात् निश्चितसाध्यवत् गगनक्षणतयवृत्तित्वं शब्दे वर्तते, तदवृत्तित्वं शब्दत्वे वर्तते, निश्चितसाध्याभाववत् घटादि, तद्वृत्तित्वं घटत्वादौ, तदवृत्तित्वञ्च शब्दत्वे वर्तते इति शब्दो नित्यः शब्दत्वात् इत्यत्र शब्दत्वरूपहेतौ लक्षणसम न्वयः सपक्षव्यावृत्तत्वमात्रोक्तौ शब्दो नित्यः कार्यत्वात् इत्यधिकरण्यस्य रूपविरुद्धहेतौ सपक्षभूतगगनादिनिरूपितवृत्तित्वाभावस्य (साधारण्यस्य) अतिव्याप्तिः, विपक्षव्यावृत्तत्वनिवेशे तु घटादिरूपासाधारण्यवृत्तत्वस्य कार्यत्वेऽभावात् नातिव्याप्तिः । सर्वविपक्षव्यावृत्तमानाप्रोक्तौ पर्वतो वह्निमान् धूमात् इत्यत्र धूमरूपसद्धेतौ विपक्षा (व्योमादिनिरूपित वृत्तित्वाभावस्य सत्वात् अतिव्याप्तिः सपक्षव्यावृत्तत्व निवेशे तु सपक्षभूतमहानसादिव्यावृत्तत्वस्य तत्राभावात् नातिव्याप्तिः । सपक्षे सर्वत्वानिवेशे पर्वतो वह्निमान् धूमात् इत्यत्र धूमरूपसद्धेतौ अयोगोलकरूपयत्किञ्चित्सपक्षव्यावृत्तत्वस्य ह्रदादिसर्वविपक्षव्यावृत्तत्वस्य च सत्वात् अतिव्याप्तिः, सपक्षे सर्वत्वनिवेशे तु सर्वसपक्षान्तर्गतमहानसादिव्यावृत्तत्वस्य धूमेऽसत्वात् नातिव्याप्तिः । विपक्षे सर्वत्वानिवेशे पर्वतो वह्निमान् अन्वयव्यतिरेक महानसादिसर्वसपक्षव्यावृत्तत्वस्य गुणादियत्किञ्चितः, व्यावृत्तत्वस्य च जलरूपविरुद्धहेतौ सत्वात् अतिव्याप्तेः, विपक्षे सर्वत्व

नि[illegible]वृत्तत्वस्य जलेऽभावात् ना[illegible] गगन[illegible]ात् इत्यत्र गगनरूपे सपक्षे (अन[illegible] सर्वत्वस्य अप्रसिद्ध्या घटः शब्दाभा[illegible] इत्यत्र विपक्षभूतगगने (निरुक्तस्य) सर्वत्वस्य च अ[illegible]अव्याप्तिवारणाय उभयत्रापि सर्वपदस्य सपक्षनिरूपित[illegible]त्वसामान्याभाव विपक्षनिरूपितवृत्तित्वसामान्याभावरूपसामान्याभावस्फोरकत्वमेवेत्यङ्गीकार्यम् ॥ एतेन सर्वसप[illegible]त्वोभयाभावादिकमादाय पर्वतो वह्निमान् धूम[illegible]धूमरूपहेतौ सर्वविपक्षवृत्तित्वघटत्वोभयाभावादिक[illegible] नित्यः कार्यत्वात् इत्यत्र कार्यत्वरूपहेतौ च अति[illegible] शङ्का निरस्ता ॥ नचैवमपि पर्वतो वह्निमान् धूमात् [illegible]मानामधिकरणभेदेन भिन्नतया सपक्षविपक्षावृत्तित्वस्य [illegible]तीयधूमे सत्वात् अतिव्याप्तिरिति वाच्यम्, सपक्षनिरूपितवृत्तितानवच्छेदकं विपक्षनिरूपितवृत्तितानवच्छेदकं यद्धेतुतावच्छेदकं तद्धत्वस्य विवक्षणीयत्वात्, पर्वतीयधूमस्य सपक्षमहानसाद्यवृत्तित्वेऽपि हेतुतावच्छेदकीभूतधूमत्वस्य तद्वृत्तितानवच्छेदकत्वाभावात् नातिव्याप्तिः ॥

वस्तुतस्तु, सपक्ष[illegible]वृत्तित्वमात्रमेव (लघु) लक्षणंभवतु विप[illegible]वृत्तित्वानिवेशे बाधकाभावात्, तदभावे अस्य लक्षणस्य वि[illegible]द्धहेतुसाधारण्ये[illegible] (दुष्टसङ्करेऽपि दोषासङ्करः, इति न्याये[illegible] विरोधासाधारण्यदोषयोः परस्परं भिन्नतया दुष्टयोः [illegible]रुद्धासाधारणयोः (हेत्वेऽपि) सङ्करेऽपि क्षत्यभावात् । अत

एव बहुषु ग्रन्थेषु सपक्षव्यावृत्तोऽसाधारणः इत्येव पाठो दृश्यते ॥ सपक्षविपक्षावृत्तित्वरूपमूलोक्तलक्षणं शब्दोऽनित्यः शब्दत्वात् इत्यत्र सद्धेतावपि साध्यसंशयदशायां असाधारण्यमङ्गीकुर्वतां प्राचीनानां मतमनुसृत्य अभिहितम् । नवीनानां मते अनित्यत्व साध्यकशब्दत्वहेतोः सद्धेतुतया साध्यवदवृत्तित्वमात्रमेव अति प्रसङ्गानापादकत्वेन लक्षणतयाऽङ्गीकृतम्, तथाच, तन्मते सप क्षपदं साध्यवन्मात्र बोधकतयाऽङ्गीकृतमिति बोध्यम् ॥ शब्द त्वस्य नित्यानित्यव्यावृत्तत्वे किंवा तदधिकरणं प्रसिद्धं इत्याश ङ्कायामाह शब्दमात्रेति ॥

हेतुव्यापकसाध्यसामानाधिकरण्यस्य (साध्याभाववदवृ त्तित्वे सति साध्यसामानाधिकरण्यस्य) व्याप्तिरूपतया नित्य त्वासमानाधिकरणं शब्दत्वं इत्यसाधारण्यनिर्णयः नित्यत्वसमा नाधिकरणं शब्दत्वमिति व्याप्तिघटकसामानाधिकरण्यांशे (तद भाववत्तानिश्चयमुद्रया) अनुमितिकरण (व्याप्तिज्ञान) प्रतिब न्धकत्वात् नित्यत्वासमानाधिकरणशब्दत्वरूपासाधारण्यस्य ता दृशनिश्चयविषयत्वेन हेत्वाभासत्वमुपपद्यतएव ॥

मू * अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहा री । यथा सर्वं अनित्यं प्रमेयत्वात् । अत्र सर्व स्याऽपि पक्षत्वात् दृष्टान्तो नास्ति ॥

अनुपसंहारिणं लक्षयति अन्वयेति ॥ अन्वयव्यतिरेकदृष्टा न्ताभ्यां रहितः अन्वयव्यतिरेकदृष्टान्तरहितः, तृतीयायाः प्रति योगितानिरूपकत्वम्, रहधातोरभावः, क्तप्रत्ययस्याश्रयत्वञ्चार्थः,

तथाच अन्वयव्यतिरेकदृष्टान्तप्रतियोगिकाभाववत्त्वानुपसंहारीति बोधः। (अत्र सर्वत्वावच्छिन्नं पक्षः, अनित्यत्वं साध्यम्, प्रमेयत्वं हेतुः,) सर्वमनित्यं प्रमेयत्वात् इत्यत्र सर्वस्यापि पक्षतया (पक्षव्यतिरिक्तस्यैवाप्रसिद्धतया) अन्वयदृष्टान्तस्य व्यतिरेकदृष्टान्तस्य च अभावेन अन्वयव्यतिरेकदृष्टान्तरहितत्वस्य अत्र प्रमेयत्वहेतौ सत्त्वात् लक्षणसमन्वयः। अन्वयदृष्टान्तरहितत्वमात्रोक्तौ पृथिवी इतरभिन्ना गन्धवत्त्वात् इत्यत्र गन्धरूपकेवलव्यतिरेकिहेतौ अतिव्याप्तिः। व्यतिरेकदृष्टान्तरहितत्वमात्रोक्तौ घटोऽभिधेयः प्रमेत्वात् इत्यत्र प्रमेयत्वरूपकेवलान्वयिहेतौ अतिव्याप्तिः, अतः दृष्टान्तद्वयरहितत्वनिवेशः कार्यः। नचैवमपि पर्वतो वह्निमान् धूमात् इत्यत्र अन्वयव्यतिरेकदृष्टान्तयोः संयोगसमवायादिसम्बन्धेन धूमेऽभावात् अतिव्याप्तिरिति वाच्यम्, स्वनिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वसम्बन्धावच्छिन्ना या अन्वयदृष्टान्तनिष्ठा प्रतियोगिता तन्निरूपकाभाववत्त्वे सति स्वात्त्यत्यन्ताभावप्रतियोगित्वसम्बन्धावच्छिन्ना या व्यतिरेकदृष्टान्तनिष्ठा प्रतियोगिता तन्निरूपकाभाववत्त्वस्य लक्षणतया विवक्षणीयतया वह्निमान् धूमात् इत्यत्र धूमे निरुक्तसम्बन्धाभ्यां अन्वयव्यतिरेकदृष्टान्तयोः सत्वेन तत्र अतिव्याप्त्यनवकाशात् (समानकालिकत्वसम्बन्धावच्छिन्नत्वेन वा अन्वयव्यतिरेकदृष्टान्तनिष्ठा प्रतियोगिता विवक्षणीया, अतो न क्वाप्यतिप्रसङ्गः) (नचैवं साधारणासाधारणयोरपि अन्वयव्यतिरेकव्याप्त्योरभावेन अन्वयव्यतिरेकदृष्टान्तरहितत्वस्य सत्वात् तयोरतिव्याप्तिरिति वाच्यम्, पक्षभिन्नत्वे सति साध्यसाधनोभयाश्रयत्वस्य

अन्वयदृष्टान्तलक्षणत्वात् । अतएव निश्चितसाध्यवद्वृत्तिहेत्वाभासाश्रयत्वस्य व्याप्तिस्य विरुद्धसाधारण्येऽपि न क्षतिः ॥ ...न्वयेन अन्वयव्यतिरेकव्य... ...णासाधारण स्थलयोः अन्वयव्यतिरेकदृष्टा... ...सत्वेन अन्वय दृष्टान्तरहितत्वे सति व्यतिरेकदृ... ...स्याभावेन अन्वय व्यतिरेकव्याप्यभावेऽपि क्षत्यभावः, अन्वयव्यतिरेकदृष्टान्त रहितत्वमुपपादयति, अत्र सर्वस्यापीति ॥

तथाच अन्वयव्यतिरेकदृष्टान्तर... ...पक्षोऽयं हेतुः इत्यनुपसंहारित्वनिश्चयः अन्वयव्यतिरेक... ...कोऽयं हेतुः इति ज्ञानं प्रतिबध्नाति, एतदभावे च अ... ...व्याप्तिमान् अयं इति निश्चयः न सम्भवति, एतदभावे च शब्दो ...मयनोति परामर्शरूपानुमितिकरणसामग्रीविघटकतयात्वात् घटादि...स्य हेत्वाभासत्वं, नतु साक्षात् अनुमितितत्करणान्य... ...प्रतिबन्धक ज्ञानविषयत्वमिति ध्येयम् ॥

मू * साध्याभावव्याप्तो हेतुः विरुद्धः । यथा, शब्दो नित्यः कार्यत्वात्, अत्र कार्यत्वं नित्यत्वाभावेनानित्यत्वेन व्याप्तम् ॥

विरुद्धं लक्षयति सा...भावेति ॥ साध्याभावेन व्याप्तः साध्याभावव्याप्तः, तृतीयायाः निरूपितत्वं अर्थः, ...व्याप्त पदार्थैकदेशव्याप्तावन्वयः, ...व्याप्तिविशिष्टरूपस्य ...र्थस्य (निपातातिरिक्तनामार्थयोः, इति न्यायेन ...हेतोः यत् ...दत्वसम्बन्धेनान्वयः, तथाच, साध्याभावनिरूपित व्याप्तिविशिष्टो ...

...तियोगित्व

[illegible] गगनपदेन व्यतिरेकव्याप्तिः [illegible] ...प्रतियोगित्वरूपा, तदेक देशीभूत [illegible] ...स्य याजेने च साध्याभावाभावव्यापको [illegible] ...योगीति लभ्यते. व्यापकत्वस्य तदधिकरणवृत्त्यत्यन्ता[illegible]...तियोगित्वरूपत्वेन साध्याभावाभावस्य साध्यरूपतया च साध्याधिकरणवृत्त्यत्यन्ताभावाप्रतियोग्यभाव प्रतियोगि[illegible] विरुद्धहेतोः लक्षणमिति पर्यवसन्नम् । शब्दो नित्यः कार्य[illegible] अत्र शब्दः पक्षः, नित्यत्वं साध्यम्, कार्यत्वं हेतु[illegible]तो लक्षणसमन्वयः, तथाहि अत्र साध्यं नित्यत्व[illegible]करणं गगनादिकं, तद्वृत्तिः योऽत्यन्ताभावः नहि कार्यत्[illegible]भावः परन्तु कार्यत्वाभावः तत्प्रतियोगि कार्यत्वं, अ[illegible]गी योऽभावः कार्यत्वाभावः, तत्प्रतियोगित्वं कार्यत्वे वर्तते । अत्र च साध्यव्यापकत्वं विहाय साध्यसामानाधिकरण्यस्य अत्यन्ताभावे निवेशे पर्वतो वह्निमान् धूमात् इत्यत्र धूमरूपहेतावतिव्याप्तिः, तथाहि, साध्यः वह्निः, तदधिकरणं अयोगोलकं, तद्वृत्तिः योऽत्यन्ताभावः धूमाभावः, तत्प्रतियोगित्वं धूमे वर्तते इति । व्यापकत्वनिवेशे तु साध्यव्यापकत्वं धूमाभावे न सम्भवति, कुतः, धूमाभ[illegible]स्य साध्याधिकरणमहानसादिवृत्ति[illegible]भावाभावप्रतियोगित्वात्, अतो न तत्रातिव्याप्तिः । नचैवं [illegible]ब्दो नित्यः शब्दत्वात्[illegible]त्र शब्दत्वरूपासाधारणहेतोः नित्यत्वात्[illegible]साध्यव्यापकीभूतस्य शब्दत्वाभावस्य प्रतियोगित्वेन तत्र[illegible] व्याप्तिरिति वाच्यम्, (दुष्टसङ्करेऽपि दोषासङ्करः. इति न्यायेन [illegible]भ[illegible]व्यविरोधयोः भिन्नतया दुष्टयोः सङ्करेऽपि

बाधकाभावात्। अतएव निश्चितसाध्यवद्व्यावृत्तत्वरूपस्य असाधारणलक्षणस्य विरुद्धसाधारण्येऽपि न क्षतिः ॥

अत्र च कार्यत्ववान् शब्दः इति निश्चयविशिष्टस्य नित्यत्वव्यापकीभूताभावप्रतियोगि कार्यत्वं इति निश्चयस्य निश्चयविशिष्टनिश्चयत्वेन (तदभावव्याप्यवत्तानिश्चयमुद्रया) शब्दो नित्यः इत्याकारकानुमितिं प्रति प्रति बन्धकत्वात् तादृशनिश्चयविषयीभूते नित्यत्वव्यापकीभूताभावप्रतियोगिकार्यत्वरूपविरोधे हेत्वाभसत्वोपपत्तिः ॥

मू* यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते

सः सत्प्रतिपक्षः। यथा, शब्दो नित्यः श्रावणत्वात्, शब्दोऽनित्यः कार्यत्वात् घटवत् ॥

सत्प्रतिपक्षं लक्षयति यस्येति ॥ केनचित् भ्रान्तेन पुंसा शब्दे नित्यत्वसाधनाय शब्दो नित्यः श्रावणत्वात् इति श्रावणत्वहेतौ प्रयुक्ते सति अभ्रान्तोऽन्यः श्रावणत्वहेतुः शब्दे नित्यत्वं साधयितुं न शक्नोतीति मन्वानः प्रतिपक्षिप्रयुक्तश्रावणत्वरूपहेतौ दोषोद्भावनाय शब्दे नित्यत्वाभावसाधकं कार्यत्वरूपं हेत्वन्तरं प्रयुङ्क्ते तत्र प्रथमः श्रावणत्वरूपहेतुः सत्प्रतिपक्षः इति व्यवह्रियते। (प्रथमानुमाने पक्षः शब्दः, नित्यत्वं साध्यं, श्रावणत्वं हेतुः। द्वितीयानुमाने शब्दः पक्षः, अनित्यत्वं साध्यम्, कार्यत्वं हेतुः) वाक्यार्थस्तु, यस्य श्रावणत्वरूपहेतोः यत् नित्यत्वं साध्यत्वेनाभिमतं, तदभावः नित्यत्वाभावः, तत्साधकं हेत्वन्तरं कार्यत्वरूपहेतुः विद्यते सः श्रावणत्वरूपहेतुः सत्प्रतिपक्षः इति।

(यत्तदोः नित्यसम्बन्धः इति न्यायेन यत्तच्छब्दार्थयोरेकार्थबोधकत्वेन तच्छब्देन यत्पदग्राह्यश्रावणत्वरूपहेतुरेव ग्राह्यः) तथाच, साध्याभावव्याप्यप्रतिहेतुमत्पक्षः सत्प्रतिपक्षः इति फलितम् ॥

अनित्यत्वव्याप्यकार्यत्ववान् शब्दः इति निश्चयस्य शब्दो नित्यः इत्यनुमितिं प्रति तदभावव्याप्यवत्तानिश्चयमुद्रया प्रतिबन्धकत्वेन साध्याभावव्याप्यवत्पक्षरूपसत्प्रतिपक्षस्य तादृशनिश्चयविषयत्वेन हेत्वाभासत्वमुपपद्यतएव. अस्य सत्प्रतिपक्षत्वं नवीनमतसिद्धम् ॥

प्राचीनास्तु, साध्याभावव्याप्यप्रतिहेतुमत्तापरामर्शकालीनसाध्यव्याप्यप्रकृतहेतुमत्तापरामर्शविषयत्वं सत्प्रतिपक्षः इति वदन्ति । अत्रसाध्याभावव्याप्यप्रतिहेतुमत्तापरामर्शः अनित्यत्वव्याप्यकार्यत्ववान् शब्दः इत्याकारकः, तत्कालीनः साध्यव्याप्यप्रकृतहेतुमत्तापरामर्शः नित्यत्वव्याप्यश्रावणत्ववान् शब्दः इत्याकारकः, तद्विषयत्वं श्रावणत्वरूपहेतौ वर्तत इति समन्वयः । अत्र साध्यव्याप्यप्रकृतहेतुमत्तापरामर्शस्य साध्याभावानुमितिं प्रति साध्याभावव्याप्यप्रतिहेतुमत्तापरामर्शस्य साध्यानुमितिं प्रति च तदभावव्याप्यवत्तानिश्चयमुद्रया प्रतिबन्धकत्वेन परस्पराभावव्याप्यवत्तानिश्चयात् परस्परानुमितिप्रतिबन्धः फलमिति ज्ञेयम् ॥

मू * असिद्धः त्रिविधः, आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति । आश्रयासिद्धो यथा, गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः, सच नास्त्येव ॥

असिद्धं वि... ...प्यत्वासिद्धमुदाहरति ... ...ाद्यन्यतमत्वं असिद्धसामान्य... ...ाप्यत्वासिद्धस्य लक्षणम्, उपाधिवि... ...भित्वं साध्यम्, अरविन्... ...सम्बन्धेन ग्राह्यम्। (यद्वैशिष्ट्यं यत्र भास... ...ति व्युत्पत्त्या सप्तम्या आधेयत्वे... ...ति न्यायेन हेतौ उपाधिवैशिष्ट... ...विशिष्टारविन्दस्य पक्षत्वे सिद्धे गगनवृत्तित्वस्य ... वह्नेरि... आ... ...णतया (पक्षविशेषण धर्मस्य पक्षतावच्छेदकतया) पक्ष... ...र्द्रेन्धनसं... ...च्छेदकत्वेन पक्षतावच्छेद काभाववत्पक्षस्य आश्रयासिद्धितया गगनवृत्तित्वाभाववदरवि न्दस्य आश्रयासिद्धित्वं सम्भवति। ... पक्षतावच्छेदका भाववत्पक्षकत्वं आश्रयासिद्धस्य लक्ष... ...मानाः ...तम्। समन्व यस्तु, पक्षतावच्छेदकाभाववत्पक्षः गग... ...य) त्यन्ताभ... ...वदरविन्दं, तत्कत्वं अरविन्दत्वरूपहेतौ वर्तते इति ...वप्रतियोगि... ...क्षकत्वञ्च तादृशपक्षकालीनत्वम्) ॥ ... वह्निरित्यत्र ... ...व्यः धूमः,

अत्र गगनवृत्तित्वविशिष्टारविन्दं सुरभि इत्यनसंगतिं प्रति पक्षतावच्छेदकविशिष्टपक्षांशे प्रतिबन्धकीभूते गगनवृत्तियोगित्व... घवदरविन्दं इति निश्चये, गगनवृत्तित्वाभाववदरविन्दरूपाश्र यासिद्धेः विषयतया तत्र हेत्वाभासलक्षणसमन्वयः सम्भवति ॥

वाक्यार्थस्तु, गगनारविन्दमाश्रयइति। आश्रयः पक्षः सच नास्त्येवेति सच पक्षः नास्त्येव अप्रासिद्धएव, अरविन्दे गगन वृत्तित्वस्याप्रसिद्धत्वात् इति ...

...मस्योप...

मू* स्वरूपासिद्धो ...था, शब्दो गुणः च... पर्वतो वह्निमा ...साध... न्वात् रूपवत्। अत्र ...चाक्षुषत्वं शब्दे ...दिनिष्ठाभा शब्दस्य श्रावणत्वात् ॥

स्वरूप... सिद्धइति ॥) अत्र शब्दः पक्ष... तयोगित्व ...) चाक्षुषत्वं चक्षुरिन्द्रिय ... गगनं ... न्द्रियजन्यप्रत्यक्षाविषयत्वं ॥ ... संयोग ... हेत्वभा... त्वभाववत्पक्षकत्वं स्वरूपा सिद्धस्य ... म ... भाववत्पक्षः चाक्षुषत्वाभाववच्छब्दः, तत्कत्वस्य (... स्य) चाक्षुषत्वहेतौ सत्वात् समन्वयः ॥

अत्र गुणत्वव्याप्यचाक्षुषत्ववान् शब्दः इति परामर्शं प्रति हेतुविशिष्टपक्षांशे चाक्षुषत्वाभाववान् शब्दः इति निश्चयस्य तदभाव... निश्चयमुद्रया प्रतिबन्धकत्वेन . तादृशनिश्चयविषय त्वम् ... वाभाववच्छब्दरूपस्वरूपासिद्धौ सत्वात् हेत्वाभा स... त्वव ॥

* सोपाधिको व्याप्यत्वासिद्धः । साध्यव्या पकत्वे सति साधनाव्यापकत्वं उपाधित्वम् । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्र तियोगित्वं साधनाव्यापकत्वम् । यथा, पर्वतो धूमवान् वह्ने रित्यत्र आर्द्रेन्धनसंयोगः उपाधिः। यत्र धूमः तत्रार्द्रेन्धनसंयोग इति साध्यव्यापक ता यत्र वह्निः तत्रार्द्रेन्धनसंयोगइति नास्ति, अयोगोलके ... न्धनसंयोगाभावात् । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रे न्धनसंयोग ... उपाधिः । सोपाधिकत्वात् वह्नि मत्वं व्या... त्वासिद्धम् ॥

व्याप्यत्वासिद्धमुदाहरति सोपाधिक इति ॥ उपाधिविशिष्टत्वं व्याप्यत्वासिद्धस्य लक्षणम्, उपाधिवैशिष्ट्यञ्च स्वाभाववद्वृत्तित्वसम्बन्धेन ग्राह्यम् । (यद्वैशिष्ट्यं यत्र भासते स एव स्वपदार्थः, इति न्यायेन हेतौ उपाधिवैशिष्ट्यस्य भाने उपाधेरेव स्वपदग्राह्यतया धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोगरूपोपाधेः स्वपदेन ग्रहणे स्वाभावः आर्द्रेन्धनसंयोगाभावः, तद्वदयोगोलकं, तद्वृत्तित्वस्य वह्नौ सत्वेन तेन सम्बन्धेन उपाधिविशिष्टत्वस्य निरुक्तस्थलीयवह्निरूपहेतौ सत्वात् स हेतुः व्याप्यत्वासिद्धो भवति॥

उपाधेः लक्षणमाह साध्यसमानाधिकरणेति ॥ साध्यसमानाधिकरणा (साध्याधिकरणवृत्त्य) त्यन्ताभावाप्रतियोगित्वे सति साधनाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वम् उपाधेः लक्षणमिति फलितम् । पर्वतो धूमवान् वह्निरित्यत्र आर्द्रेन्धनसंयोगरूपोपाधौ लक्षणसमन्वयः तथाहि, साध्यः धूमः, तदधिकरणं महानसादिः, तद्वृत्तिः योऽत्यन्ताभावः नह्यार्द्रेन्धनसंयोगाभावः किन्तु घटाद्यभावः, तत्प्रतियोगी घटादिः, तदप्रतियोगित्वं आर्द्रेन्धनसंयोगे वर्तते । साधनं वह्निः, तदधिकरणं अयोगोलकं, तद्वृत्तिः योऽत्यन्ताभावः आर्द्रेन्धनसंयोगाभावः, तत्प्रतियोगित्वं आर्द्रेन्धनसंयोगरूपोपाधौ वर्ततइति लक्षणसमन्वयः ॥ साध्यव्यापकत्वमात्रोक्तौ पर्वतो वह्निमान् धूमादित्यत्र सद्धेतुस्थलेऽपि वह्निरूपसाध्येऽतिव्याप्तिः, स्वस्य साध्यव्यापकत्वस्याक्षतत्वात् । साधनाव्यापकत्वनिवेशे तु वह्नेः साधनीभूतधूमस्यापि व्यापकत्वात् नातिव्याप्तिः ॥ साधनाव्यापकत्वमात्रोक्तौ पर्वतो वह्निमान् धूमादित्यत्र घटादेरपि साधनाधिकरणमहानसादिनिष्ठाभावप्रतियो

गित्वेन तत्रातिव्याप्तिः। साध्यव्यापकत्वानिवेशे तु साध्याधिकरणमहानसादिनिष्ठात्यन्ताभावप्रतियोगित्वेन साध्यव्यापकत्वाभावात् घटादौनातिव्याप्तिः॥

नचैवं पर्वतो धूमवान् वह्नेरित्यत्र आर्द्रेन्धनसंयोगस्य धूमाधिकरणवृत्त्यार्द्रेन्धनसंयोगघटत्वोभयाभावप्रतियोगित्वेनाव्याप्तिरिति वाच्यम्। साध्याधिकरणवृत्त्यभावीयप्रतियोगितायां व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य निवेशनीयत्वात्, (व्यासज्यवृत्तित्वञ्च एकत्वानवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वं, तदर्थः, स्वाधिकरणे पर्याप्तिसम्बन्धेन एकत्वावच्छेदेनावर्तमानत्वम्, तथाच, उभयत्वत्रित्वाद्यवच्छेदेन द्वयत्रयादिषु पर्याप्तिसम्बन्धेन वर्तमानाः द्वित्वत्रित्वचतुष्ट्वादयः व्यासज्यवृत्तिधर्माः इति सिद्धम्) तथाच आर्द्रेन्धनसंयोगघटत्वोभयाभावीयायाः प्रतियोगितायाः अत्र उभयत्वरूपव्यासज्यवृत्तिधर्मावच्छिन्नतया न तां प्रतियोगितामादाय पूर्वोक्तविधयाऽव्याप्तिः॥

नचैवमपि निरुक्तस्थले आर्द्रेन्धनसंयोगस्य धूमाधिकरणमहानसादिनिष्ठस्य तत्क्षणादिवृत्तित्वविशिष्टार्द्रेन्धनसंयोगाभावस्य प्रतियोगित्वेन तत्र पुनरप्यव्याप्तिरिति वाच्यम्। निरुक्तप्रतियोगितायामेव व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्येव वैशिष्ट्यानवच्छिन्नत्वस्यापि निवेशनीयत्वात्, तन्निवेशे तु तत्क्षणवृत्तित्वविशिष्टार्द्रेन्धनसंयोगत्वावच्छिन्नप्रतियोगितायाः वैशिष्ट्यार्द्रेन्धनसंयोगत्वरूपधर्मद्वयावच्छिन्नतया न तां प्रतियोगितामादाय तत्राव्याप्तिप्रसक्तिः॥

नचैवमपि … … न वह्निरूपसाध्यस्य
क्षविशेष्यकसाध्यप्रकारकानुमितत्व
साधनाधिकर… … …यस्य पूर्व
न : समानयोगक्षेमतया) विशेषणविशे…
क्षणवृत्तित्ववि… … … …व्यापक
…एवान्तर्भावात् ॥
त्वेन च वह्न्यावति… … …रप्रभृति… …सर्वं …नसमानाधिकरणा
त्यन्ताभावीयप्रतियोगिताया … … …व्यासज्यवृत्तिधर्मानव
…त्वेन प्राप्त…
च्छिन्नत्वयोः निवेशनीयत्वात्, … …ा तु तदुभयाभावीयप्रति
योगितायाः व्यासज्यवृत्तिधर्मावच्छिन्नतया विशिष्टाभावीय
प्रतियोगि…याः वैशिष्ट्यावच्छिन्नतया च न तत्प्रतियोगिताद्वय
…ाय
मादाय … …ऽतिव्याप्तिः ॥ साध्य… … …वृत्तित्वाभाववद्धेतुः
…ाध्याभाव…
व्याप्यत्वासिद्धिः ॥ उपाधेः दूषकतानिरू… …पकव्याख्याना
…वन्पक्षस्य
वसरे व्यक्तीकरिष्यते ॥
…सिद्धिरेव ।
अत्र धूमाभाववद्वृत्तित्वाभाववान् … …ति निश्चयस्य
…नम् । वा…
धूमाभाववद्वृत्तिवह्निमान् इति परामर्शे प्रा… …ववद्वृत्तिः
…तिपक्षे
वह्निः इति व्याप्तिज्ञानांशे प्रतिबन्धकत्वेन ताद… …विषयी
…द्धेः कथ…
भूते धूमाभाववद्वृत्तित्वाभाववद्वह्निरूपव्याप्यत्वासिद्धौ हेत्वाभा
सत्वमुपपद्यत एव ॥

नचैवं साध्याभाववद्वृत्तित्वाभावस्य साध्याभाववद्वृत्तित्व
रूपतया व्यभिचारस्य व्याप्यत्वासिद्धेश्चाभेद… वाच्यम्, दोष
योरैक्येऽपि साध्याभा… …प्यत्वसा… …भाववद्वृत्तित्व
त्वरूपयोः दोषतावच्छेद… …क्षनत्वात् … …दोषता
वच्छेदकयोरप्यैक्यसद्भावा… …ऐक्येन गणनाया ।

नचैवमपि साध्यतावच्छे… …दकाभाववत्सा… …यरूप… …सि
द्धिहेतुतावच्छेदकाभाववद्धेतुरूपहेत्वप्रसिद्धिसि… साधना… …रूपदो

…तयोमित्व…
…सौ गगनेत वाच्यम् अन्येषामपि दा… …स्य संयोगः कर्तव्यत्वात् (येषां क्वापि गतिन… …सन्धत्ते इति न्यायोऽत्रानुसन्धेयः

मू० … …भावः प्रमाणान्तरेण निश्चितः सः बा… । यथा, वह्निः अनुष्णः पदार्थत्वात् जलवत । अत्रानुष्णत्वं साध्यं, तदभावः उष्णत्वं त्वाचप्रत्यक्षेण गृह्यते इति बाधम् ॥

इत्यनुमानपरिच्छे…
समाप्तः
श्री श्री श्री

…तस्य लक्षणमाह यस्येति ॥ (अत्र वह्नित्वावच्छिन्नं …, अनुष्णत्वं साध्यं, पदार्थत्वं हेतुः) वाक्यार्थस्तु, यस्य …र्थत्वरूपेहतोः यत् साध्यं साध्यत्वेनाभिमतमनुष्णत्वं तदभावः अनुष्णत्वाभावः (उष्णत्वं) त्वाचप्रत्यक्षेण त्वाचप्रत्यक्षजनकत्वगिन्द्रियरूपप्रत्यक्षप्रमाणेन गृह्यते सः पदार्थत्वरूपहेतुः बाधितइति ॥ तथाच साध्याऽभाववत्पक्षो बाधइति फलितम् सा…भाववत्पक्षक… बाधितस्य लक्षणम् ॥

अत्र च… …ष्णत्ववान् वह्निः इति बाधनिश्चयस्य वह्निः अनुष्णः इति … प्रति तदभाववत्तानिश्चयमुद्रया प्रतिबन्धकत्वेन तादृश… …विषयभूतेऽनुष्णत्वाभाववद्वह्नौ हेत्वाभा…त्वमुपपद्यते ।

नन्वेवमपि पक्षवृत्तिसाध्याभाव पक्षावृत्तिसाध्य साध्यान… …प्रभृ…नां दोषत्वानिरूपणेन न्यूनतेतिचेन्न, तथा

मपि पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबन्धकज्ञानविष यत्वतौल्येन समानयोगक्षेमतया) विशेषणविशेष्यभावव्यत्या सेऽपि बाधएवान्तर्भावात् ॥

एवमेव व्यभिचारप्रभृतिषु सर्वेष्वपि हेत्वाभासस्थलेषु विशेषणविशेष्यभाववैपरीत्येन प्राप्तानां रूपान्तराणां समान योगक्षेमतां निमित्तीकृत्य यथायथं तेषुतेष्वन्तर्भावः कार्यः॥ एवमेव बाधसत्प्रतिपक्षव्याप्यभिन्नानां तत्तद्धेत्वाभासव्याप्यनाम पि तत्तद्धेत्वाभासेष्वेव अन्तर्भावः कार्यः, यथा,साध्याभाववद्वृत्ति त्वविशिष्टहेतोः व्यभिचारत्वे साध्याभाववद्वृत्तित्वव्याप्यवान् हेतुरपि व्यभिचारएव। हेत्वभाववत्पक्षस्य स्वरूपासिद्धित्वे हेत्वभावव्याप्यवत्पक्षोऽपि स्वरूपासिद्धिरेव। एवमन्यत्राऽपि तत्तद्व्याप्यघटितानामपि तत्तद्दोषत्वमूह्यम्। बाधव्याप्यस्य तु सत्प्र तिपक्षरूपतया न बाधेऽन्तर्भावः। सत्प्रतिपक्षव्याप्यस्य ह्रदो वह्निमानित्यादौ वह्न्यभावव्याप्यव्याप्यवज्जलादेः कथञ्चिदपि अनु मितितत्करणान्यतरप्रतिबन्धकज्ञानविषयत्वाभावेन न सत्प्रति पक्षेऽन्तर्भावः, किन्तु तस्य दोषव्याप्यगुणत्वेनैवेति ध्येयम् ॥

श्रीमत् कुरुगंटुयपनामक श्रीराम

शास्त्रिविरचिते तर्कसङ्ग्रह

सर्वस्वेऽनुमानपरि

च्छेदः समाप्तः

श्री श्री श्री



श्री

शिवाय नमः

तर्कसङ्ग्रहसर्वस्वे

उपमानपरिच्छेदप्रारम्भः

मू॰ उपमितिकरणमुपमानम्। संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणं व्यापारः॥

उपमानं लक्षयति उपमितीति॥ बोधप्रकारः अनुमानलक्षणइव ग्राह्यः। उपमितिकरणत्वं उपमानस्य लक्षणम्। उपमितिकरणत्वञ्च उपमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति उपमितिव्यापारजनकत्वम्। उपमितित्वावच्छिन्ना या कार्यता अयं गवयपदवाच्यः (गवयो गवयपदवाच्यः) इत्याकारकगवयत्वावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकोपमितौ विद्यमाना कार्यता, तन्निरूपिता या कारणता गोसदृशो गवयपदवाच्यः इत्याकारकगोसादृश्यावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकज्ञानात्मकोपमाननिष्ठा कारणता, तदाश्रयत्वस्य गोसदृशो गवयपदवाच्यः इत्याकारकातिदेशवाक्यार्थविषयकस्मरणरूपव्यापारजनकत्वस्य च गोसदृशो गवयपदवाच्यः

श्रीः

गणेशायनमः

पङ्क्ति

इत्याकारकानि ... क्षणसम न्वयः ॥

अयं (गवयो) गवय ...यः ...ज्ञानं उपमितिः। गोसदृशो गवयपदवाच्यः इति ...वाक्यार्थस्मरणं व्यापारः। गोसदृशो गवयपदवाच्यः इति अतिदेशवाक्यार्थज्ञानं उपमानं। अयं फ... व्यापारकरणानामाकारः॥ व्यापारजनकत्वमात्रोक्तौ ईश्वरा... उपमित्यसाधारणकार्यत्वमात्रोक्तौ अतिदेशवा...क्यार्थस्मरणरूपव्यापारे च अति...व्याप्ति... उभयोपादानम्। ननु यत्र उपमानोत्पत्त्यनन्तरं प्रतिबन्ध... उपमितिः न जाता तत्र उपमितिकारणत्वस्याभावात् ...ति वाच्यम्, फलोपधायकत्वरूपकारणत्वस्य तत्राभावे... ...ते ऽपि तस्य फलस्वरूपयोग्यतारूपस्य कारणत्वस्य तत्र सत्... ...त् (फलोपधायकत्वञ्च स्वजनकत्व स्वसामानाधिकरण्य... ...येन फलविशिष्टत्वम्। फलस्वरूपयोग्यतारूपकारणत्वञ्च फलजनकतावच्छेदकधर्मवत्त्वम्)

उपमितिं लक्षयति संज्ञेति॥ संज्ञानाम पदं. संज्ञी अर्थः, तयोस्सम्बन्धः वाच्यवाचक...रूपः (वाच्य...रूपः) तद्विषयकं ज्ञानं उपमितिः। संज्ञ... ...ज्ञानं संज्ञासंज्ञिसम्बन्धज्ञानं। पद्याः विषयता... ...यः। तथा... ...र्थसम्बन्धविषयकत्वे सति ज्ञान... ...मितः लक्षणम्। ...वाक्यं प्रति ...दवाच्यः इत्युपमितौ पदपदा...सम्बन्धरूपवाच्यत्वा...र्थावस्य ज्ञानत्वस्य च सत्वात् ...मन्वयः। ज्ञानत्वम ...तोक्तावत्... ...त्यादौ पदपदार्थसम्बन्धविषयकत्व... ...गवयपदवाच्यः इति ... च अतिव्याप्तिः, अतो ...लक्षयाप...

प[illegible] तयोमित्वमजानन् कुत[illegible] गगनेयः इति श्रु[illegible] सदृशपिण्डं पश्यन् [illegible]यं गवयपदवाच्यः इत्युपमितिः

उपमानपरिच्छेदः

समाप्तः

श्रीः श्रीः श्रीः

[illegible]मग्रीं उपमितिस्वरूपञ्च दर्शयति कश्चिदित्यादिना ॥ [illegible]शो गवयइति श्रुत्वेत्यनेनोपमानं प्रदर्शितम् । वाक्यार्थं [illegible]न् इत्यनेन स्मृत्यात्मकव्यापारः प्रदर्शितः । तदनन्तरं अ[illegible]पदवाच्यइत्यनेन उपमितिस्वरूपञ्च प्रदर्शितं भवति ॥

श्रीमत् कुरुगंटुग्रपनामक श्रीराम

शास्त्रिविरचिते तर्कसङ्ग्रह

सर्वस्वे उपमानपरि

च्छेदः समाप्तः

श्रीः श्रीः श्रीः







श्रीः

गणेशाय नमः

तर्कसङ्ग्रहसर्वस्वे

शब्दपरिच्छेदप्रारम्भः

मू * आप्तवाक्यं शब्दः ॥

शब्दं लक्षयति आप्तवाक्यमिति ॥ आप्तस्य वाक्यं आप्तवाक्यं, षष्ठ्या उच्चरितत्वमर्थः तथाच, आप्तोच्चरितत्वे सति वाक्यत्वं शब्दप्रमाणलक्षणम् । गामानयेत्यादिप्रमाणवाक्येषु आप्तोच्चरितत्व वाक्यत्वयोः सत्वात् समन्वयः । वाक्यत्वमात्रोक्तौ अनाप्तोच्चरितवाक्येऽतिव्याप्तिः, आप्तोच्चरितत्वमात्रोक्तौ जवगडदशादावतिव्याप्तिः, अतो दलद्वयनिवेशः । नच आप्तस्य यथार्थज्ञानजनकशब्दप्रयोगकर्तृत्वरूपत्वेऽपि प्रथमं महानसो वह्निमान् इति यथार्थज्ञानजनकशब्दप्रयोगकर्त्रोच्चरिते ह्रदो वह्निमान् इति वाक्येऽपि आप्तोच्चरितत्ववाक्यत्वयोः सत्वात् अतिव्याप्तिरिति वाच्यम्, प्रकृतप्रयोगहेतुभूतयथार्थज्ञानजन्यवाक्यत्वस्य तदर्थत्वात्, ह्रदो वह्निमान् इति वाक्यं प्रति ह्रदो वह्निमान् इति अयथार्थज्ञानस्यैव कारणत्वेन यथार्थज्ञानजन्य

वाच्यत्वस्य तत्राभावात् नातिव्याप्तिः। (अर्थं बुध्वा शब्दरचनेति, न्यायेन शब्दप्रयोगं प्रति तदर्थज्ञानस्य हेतुत्वेन गामानयेत्यादि प्रमाणवाक्येषु यथार्थज्ञानस्यैव कारणतया यथार्थज्ञानजन्यशब्दत्वस्य सत्वात् समन्वयः॥ अत्र लक्ष्यतावच्छेदकं प्रमाणशब्दत्वमेव, नतु शब्दत्वमात्रम्। शब्दत्वमात्रस्य तत्त्वे, अग्निना सिञ्चतीत्याद्यप्रमाणशब्देष्वपि तस्य सत्वात् अतिप्रसङ्गः॥ वस्तुतस्तु, शब्दज्ञानमेव शाब्दधीकरणमिति वक्तव्यम्, नतु शब्दः. शब्दस्यैव करणत्वे मौनिश्लोकादितः शाब्दबोधाऽनुपपत्तिः. कण्ठताल्वाद्यभिघातसंयोगजन्यध्वनिविशेषरूपस्य शब्दस्य तदानीमभावात्। शब्दज्ञानस्य करणत्वे तु लिप्याद्यभिव्यङ्ग्यस्य पदज्ञानस्य मौनिश्लोकादितः शाब्दबोधदशायामपि सत्वात् नानुपपत्तिः॥ शाब्दबोधकारणसामग्री तु मदीयपारिभाषिकपदार्थसङ्ग्रहे शाब्दबोधविचारे द्रष्टव्या॥ शाब्दबोधं प्रति वृत्तिज्ञानं कारणं वृत्तिश्च शक्तिः लक्षणाचेति द्विविधा। शक्तिः मूले निरुपयिष्यते। शक्यसम्बन्धो लक्षणा। साच जहल्लक्षणाऽजहल्लक्षणाचेति द्विविधा। शक्यतावच्छेदकाप्रकारकलक्ष्यतावच्छेदकप्रकारकबोधप्रयोजिका लक्षणा जहल्लक्षणा, गंगायां घोषइत्यत्र शक्यतावच्छेदकीभूतप्रवाहत्वाप्रकारकलक्ष्यतावच्छेदकीभूततीरत्वप्रकारकबोधजनकत्वस्यात्र लक्षणायां सत्वात्समन्वयः (अत्र तीरे घोषइति बोधः) (शक्यार्थपरित्यागेनान्यार्थग्रहणं जहल्लक्षणेति भावः) लक्ष्यतावच्छेदकरूपेण लक्ष्यशक्योभयबोधप्रयोजिका लक्षणाऽजहल्लक्षणा। काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातुकत्वेन रूपेण काककुक्कुटबिडालादिशक्यलक्ष्यबोधप्रयोजिका

ऽजहल्लक्षणेव (अव[illegible]भूत[illegible]ानुकापादानकंदधिरक्ष णानुकूलकृतिम[illegible]ांसत्यन्यार्थग्रह णमजहल्लक्षणो[illegible]यानिरूपितप्रकारत्वं नाम, शक्तिनिरोध[illegible]सामग्री पारिभाषिकपदार्पितप्रकारतानिरूपितप्रकारतानिरूपितक्ष[illegible]लक्षणा नाङ्गीक्रियते । गौण्यत्वमन्तर[illegible] एतत्पदजन्यबोधविषयतिर्भवति । एतत्प्र पञ्चो दीपिकाव्याख्यानावसरे[illegible]निरूपयिष्यते । व्यञ्जनावृत्तेः श क्त्यनुमानाभ्यां चारितार्थ्यमपि[illegible] पारिभाषिकपदार्थसङ्ग्रहे निरू पितम् । दीपिकायाञ्च निरूपयिष्यते, अतो नेह प्रपञ्च्यते ॥

निष्ठ[illegible]

[illegible]यत्वं पदे[illegible]मस्तु यथार्थवक्ता ॥

दानेऽपि लक्षयति आप्तस्त्विति । यथार्थ[illegible] यथार्थज्ञान जनकशब्दप्रयोगकर्तृत्वम्, पर्वतो वह्निमा[illegible]रिग्रहणे शब्दप्रयोक्तरि यथार्थज्ञानजनकशब्दप्रयोक्तृत्वस्य सत्वात[illegible] सत्व[illegible]ः । नच पूर्व कालावच्छेदेन पर्वतो वह्निमान् इति शब्द[illegible]निवेशः इदानीं ह्रदो वह्निमान् इति शब्दप्रयोक्तर्यनाप्ते पूर्वकालाव[illegible]च्छि[illegible] प्रयोगमा दाय यथार्थज्ञानजनकशब्दप्रयोक्तृत्वस्य सत्वात् ह्रदो [illegible] इति शब्दप्रयोगकर्तर्यपि आप्तत्वव्यवहारप्रसङ्ग इति वाच्यम्, तस्येष्टत्वात् । परन्तु अस्मिन् प्रयोगेऽयमाप्त इति व्यवहारस्तु नेष्टः, तत्र एतत्प्रयोगानुकूलयथार्थज्ञानजनकशब्दप्रयोक्तृत्वस्यैव प्रत्यायानात्, तस्य तदा त[illegible]सम्भवात् ॥

मू* वाक्यन्तु[illegible]योग्योपयोगी[illegible]

[illegible]नां स्वनिष्[illegible]

आप्तलक्षणघटकीभूततत्तुकत्वनिर्वक्ति वाक्यमिति । एवं द्वि मुहएव वाक्यमिति नैयाद्यवकारे (अत्र पदं शक्तं प्राह्[illegible]वाच्यत्वरूप

[illegible]

...तयोगित्व
रान्वय... गगनादसमुदायो वाक्य
मिति... वाक्यतया वा
क्ये क्रियापद... नीलोघटः इत्या
दिक्रियाप्रयोगविरह... वाक्यत्वमभिमतम् । वैयाकरण
मते तु क्रियां विना ... समासाभावेन नीलोघटइत्यादिष्व
ध्याहारेणवाक्यत्वमभ्युपगम्यते)

मू० शक्तंपदम्, अस्मात्पदा... बोद्धव्य
इतीश्वरसङ्केतः शक्तिः ॥

पदं ...ति शक्तमिति ॥ नैयायिकमते शक्तस्यैव पदत्वेन सुप्तिङन्त... विभक्तीनां कृदादिप्रत्ययानाञ्च पदत्वमभिमतम् । वैयाकरण... सुप्तिङन्तस्यैव पदत्वेन विभक्तीनां कृदादीनाञ्च तदन्... तेषां नैव पदत्वमभ्युपगम्यते। किन्तु सुप्तिङ ...मः भवति इत्यादीनामेव पदत्वमङ्गीक्रियते ॥ अस्मिन् मते पदं द्विविधम्, शक्तं लाक्षणिकञ्चेति। शक्त्याऽर्थबोधकं शक्तं, लक्षणयाऽर्थबोधकम् लाक्षणिकम् ॥ एवमर्थो द्विविधः, शक्यो लक्ष्यश्चेति। शक्त्या बोध्योऽर्थः शक्यः, लक्षणया बोध्योऽर्थः लक्ष्यः। वृत्तिरपि द्विविधा, शक्तिः लक्षणाचेति। शक्तिर्नाम अस्मा... बोद्धव्य इतीश्वरसङ्केतः (ईश्व ...अनेन च वा...दजन्यबोधविषयत्वप्रकारिकायाः ...विशेष्यकेच्छाया... प्रदर्शितः। तथाच, अर्थस्य ...शक्तौ विशेष्यत... शक्तिनिरूपितमुख्यविशेष्यताश्रयत्वं ...वयत्वमिति फलितम्, पद... परम्परया प्रकारत्वेन शक्त्या परम्...निरूपि...का... शक्तत्वमिति फलितम्।

शक्त्या परम्परयानिरूपितप्रकारत्वं नाम, शक्तिनिरूपितमुख्य विशेष्यतानिरूपितप्रकारतानिरूपितप्रकारतानिरूपितप्रकारतानि रूपितप्रकारताश्रयत्वम्। एतत्पदजन्यबोधविषयोऽयमर्थ इती श्वरेच्छायाः शक्तिरूपतया शक्तिनिरूपिता मुख्यविशेष्यता अर्थ निष्ठा विशेष्यता, तन्निरूपिता प्रकारता विषयत्वनिष्ठा प्रकारता, तन्निरूपिता प्रकारता बोधनिष्ठा प्रकारता, तन्निरूपिता प्रकारता जन्यत्वनिष्ठा प्रकारता, तन्निरूपिता प्रकारता पदनिष्ठा प्रकारता, तदाश्रयत्वं पदे वर्तते इति। अत्र विशेष्यतायां मुख्यत्वानुपा दाने बोधांशे विषयत्वस्यापि विशेष्यतया शक्तिनिरूपितविशे ष्यतापदेन विषयत्वनिष्ठविशेष्यतायाः परिग्रहणे तन्निरूपितनि रुक्तप्रकारताश्रत्वस्य तत्तत्पदत्वरूपानुपूर्व्या सत्वात् तत्राऽपि तदर्थशक्तताव्यवहारप्रसङ्गः, अतो मुख्यत्वनिवेशः। विषयत्व निष्ठविशेष्यतायाः मुख्यत्वाभावात् नातिप्रसङ्गः॥

शक्यसम्बन्धो लक्षणा, सच सम्बन्धः क्वचित् साक्षात्स म्बन्धः क्वचित् परम्परासम्बन्धश्च भवति। यथा, गङ्गायां घोष इत्यत्र गङ्गापदशक्यप्रवाहस्य संयोगरूपसाक्षात्सम्बन्धस्य तीरे सत्वात् तत्र तीरबोधे साक्षात्सम्बन्धः प्रयोजकः। एवमेव मञ्चाः क्रोशन्ति यष्टीः प्रवेशय इत्यादौ स्वशक्यमञ्चयष्ट्यादिसंयोगरूपः साक्षात्सम्बन्धः पुरुषबोधोपयोगी। काकेभ्यो दधि रक्ष्यतां इ त्यत्र काकपदशक्यकाकानां स्वनिष्ठदध्युपघातुकत्वाश्रयत्वरूप परम्परासम्बन्धः दध्युपघातुकत्वावच्छिन्नबोधोपयोगी। एवं द्वि रेफमानयेत्यत्र द्विरेफपदशक्यरेफद्वयस्य स्वघटितपदवाच्यत्वरूप परम्परासम्बन्धः तत्र मधुकरबोधे समुपयुज्यते एवं रीत्या स्थ

लभेदेन साक्षात्परम्परासम्बन्धानां लक्षणारूपत्वं ज्ञेयम् ॥ (सा न्त्र लक्षणा पुनः द्विविधा, निरूढलक्षणा स्वारसिकलक्षणाचेति। अनादितात्पर्यविषयीभूता लक्षणा निरूढलक्षणा। यत्पदश्रवणानन्तरमचिरेणैव यया लक्षणया यत्पदार्थोपस्थितिः भवति तत्पदार्थोपस्थापिका सा निरूढलक्षणेति फलितम्। शक्तिवत् अविलम्बितलक्ष्यप्रतीतिप्रयोजिका लक्षणा निरूढलक्षणेति परमार्थः। यथा, गङ्गायां घोषः, मञ्चाः क्रोशन्ति, काकेभ्यो दधि रक्ष्यतां इत्यादिषु निरूढलक्षणा॥ कथञ्चित् प्रकरणादिना लक्ष्योपस्थापिका स्वारसिकलक्षणा। विलम्बितप्रतीतिप्रयोजकेति पर्यवस्यति। यथा, सप्त पदार्थाः, नव द्रव्याणि, इत्यादिषु विभाजकधर्मसप्तकान्यतमवदादिवोधिका स्वारसिका भवति। एतल्लक्षणाद्वयविषये बहूनां बहुविधाऽभिप्रायास्सन्ति, विषयान्तरत्वेन नेह तत् प्रपञ्च्यते)

मू॰ आकांक्षा योग्यता सन्निधिश्च वाक्यार्थ
ज्ञानहेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वया
ननुभावकत्वं आकांक्षा ॥

शाब्दबोधसामग्रीं दर्शयति आकांक्षेति ॥ अनुक्तानां पदज्ञान पदार्थोपस्थिति तात्पर्यज्ञानादीनां समुच्चयार्थः चकारः ॥

(ननु आकांक्षा नाम इच्छा, योग्यता च उत्कृष्टतासंपादक सद्गुणवत्त्वम्, सन्निधिश्च द्वयोरेकत्र समावेशः, तथाच एतेषां शाब्दबोधकारणत्वे वक्तव्ये श्रोतृनिष्ठनां तेषां कारणत्वं वक्तव्यम्, श्रोतुरेव बोधोदयात्, तथाच शाब्दबोधेच्छारहितस्य

अयोग्यस्य … त्पर्यतया नैतेषां
कारणत्वकथ … निर्व
क्ति पदस्येति) …

पदस्येति ॥ पदस्येत्यत्र … तरत्रापि पदपदं यत्पदपरम् षष्ठ्याः आश्रयत्वमर्थः, व्यति … अन्वयाऽननुभावकत्वं शाब्दबोधजनत्वाभावः, षष्ठ्यर्थस्य अन्वयाऽननुभावकत्वेऽन्वयः, तत्पदे … वत्वमित्यध्याहार्यम् । तथाच, यत्पदनिष्ठशाब्दबोध जनक… ः यत्पदान्तराभावप्रयुक्तः तत्पदे तत्पदवत्वं आकां- …योजना। (तत्पदे तत्पदवत्वञ्च स्वाव्यवहितोत्तरत्व स्वाव्य वहितपूर्वत्वान्यतरसम्बन्धेन तत्पदाविशिष्ट…) घटमानयेत्यत्र, घटपदनिष्ठः घटीयं कर्मत्वमिति शाब्द… जनकत्वाभावः अम् पदाभावप्रयुक्तः अम्पदाभावे घटपदमात्र… घटनिष्ठं कर्म त्वमिति बोधानुदयात्, अतः घटपदे अम्पदव… अम्पदे घट पदवत्वं वा वर्तत इति तस्मिन् वाक्ये नाऽऽकांक्षायो… ॥

मू * अर्थाबाधो योग्यता ॥

योग्यतां लक्षयति अर्थाबधेति ॥ अर्थस्याबाधोऽर्थाबाधः, अबाधः बाधनिश्चयाभावः (बाधनिश्चयः तदभावप्रकारकनि श्चयः) एकपदार्थे इत्यध्या… , अर्थस्येत्य…र्थपदं अपरपदा र्थपरम्, तथाच, एकप… दार्थबाधा… भावः योग्य तेत्यर्थः पर्यवसितः। तथा… दार्थइत्यत्र स… योग्यता निरूपकत्वार्थकतया … त्र षष्ठ्याः प्रतियो… क त्वार्थकतया तादृ… ष्यक… निश्चये प्रतियो… निरूप कत्वस्य बाधशब्द… ऽभावे च … न्वये … पदार्थ… ष्यकः

अपर... तयोमित्व... यो। निश्चयः तदभावः ... गगनं ... स्यत्र अग्निकरणकत्वा भावव... ... अग्निकरणकत्वाभावप्रकार कबाधनिश्चय... निश्चयाभावरूपयोग्यताया अभावेन अग्निकरणकं ... प्रमात्मकबोधो न जायते। जलेन सिञ्च तीत्यत्र जलकरणकत्वाभाववत्सेचनमिति बाधनिश्चयाभावेन जलकरणकं सेचनमिति प्रमात्मक बोधो जायते। अतो योग्यता ऽपि शाब्दबोधे कारणमिति सिद्धम् ...

मू* पदानामविलम्बेनोच्चारणं ...

सन्निधिं निरूपयति पदानामिति॥ अविलम्बितप्रवृत्तिकं पदोच्चा... सन्निधिः। प्रहरे प्रहरेऽसहोच्चरितानां गामानयेत्या दिप... ...सान्निध्याभावेन न तादृशवाक्याच्छाब्दबोधः॥ ...तस्तु अविलम्बेन पदार्थोपस्थितिरेव सन्निधिः, उच्चार ...तु तदुपयोगितयोक्तं, अन्यथा, मौनिश्लोकादिस्थले कण्ठता ल्वाद्यभिघातिसंयोगजन्यध्वनिरूपस्य उच्चारणस्य असम्भवेन शाब्दबोधानुपपत्तिः॥


मू* आकांक्षादिरहितं वाक्यं न प्रमाणम् य था, गौरश्वः पुरुषो हस्तीति वाक्यं न प्रमाणम्. आका... ...तेः अग्निना सिञ्चतीति वाक्यं न प्रमा... ...नाविरहात्। प्रहरे प्रहरेऽस होच्चरितान ...नयेत्यादिपदानि न प्रमाणम्, सान्निध्या...वात्। ...वाक्यं द्विविधम्, वैदिकं लौकिकञ्चेति। ...मीश्वरोक्तत्वात्सर्वमपि

प्रमाणम् । लौकिकन्तु आप्तवाक्यं प्रमाणम् । अन्यदप्रमाणम् । वाक्यार्थज्ञानं शाब्दज्ञानम् । तत्करणं शब्दः॥ एवं यथार्थानुभवो निरूपितः॥

इति शब्दपरिच्छे
दः समाप्तः
श्रीः श्रीः श्रीः

आकांक्षाद्यभावे शाब्दबोधाभावं क्रमेण स्थलभेदेन निर्दिशति यथागौरश्वइत्यादिना॥ ईश्वरोक्तत्वात्सर्वमपि प्रमाणमिति वाक्यं मनुप्रभृतिभिः मुनिभिरुक्तानां स्मृतिपुराणेतिहासादीनामुपलक्षणम् ॥

श्रीमत् कुरुगंटुपनामकश्रीराम
शास्त्रिविरचिते तर्कसङ्ग्रह
सर्वस्वे शब्दपरिच्छे
दः समाप्तः
श्रीः श्रीः श्रीः श्रीः श्रीः



श्रीः

श्रीमते नारायणाय नमः

तर्कसङ्ग्रहसर्वस्वे

अयथार्थानुभवादिनिरूपणम्

मू॰* अयथार्थानुभवः त्रिविधः, संशयविपर्ययतर्कभेदात्। एकस्मिन् धर्मिणि विरुद्धनानाधर्मप्रकारकज्ञानं संशयः। यथा, स्थाणुर्वा पुरुषोवेति ॥

एवं यथार्थानुभवं प्रसक्तानुप्रसक्तां तत्सामग्रीञ्च निरूप्य अयथार्थानुभवं निरूपयति अयथार्थानुभव इति ॥ संशयं लक्षयति एकस्मिन्निति ॥ धर्मिणीत्यत्र सप्तम्याः विशेष्यतानिरूपकत्वार्थकत्वेन एकधर्मिविशेष्यकत्वे सति विरुद्धनानाधर्मप्रकारकत्वे सति ज्ञानत्वं संशयस्य लक्षणम् फलितम्। स्थाणुर्वा पुरुषोवेत्यत्र संशये पुरोवर्तिवस्तुरूपकधर्मिविशेष्यकत्वे सति स्थाणुत्व स्थाणुत्वाभावरूपविरुद्धनानाधर्मप्रकारकत्वे सति ज्ञानत्वस्य विद्यमानत्वात् लक्षणसमन्वयः

केचन [illegible] संशयाभिलापस्थले स्थाणुपुरुष[illegible] उभयत्र वा श[illegible] ब्दयोः (व[illegible]हदस्यापि विशेष्यतया एकस्मिन् हदरूपे [illegible]र्थकत्वञ्च अङ्गीकृत्य स्थ[illegible]ः प्रकार[illegible] न अतिव्याप्तिताद[illegible]पुरुषत्वाभाव कोटिकसंशयमङ्गीकुर्वन्ति। [illegible]यनाऽस्ति [illegible] भावद्वयकोटिकसंशयो नाभ्युपगम्यते ॥

अन्येतु, भावद्वयकोटिकसंशयमङ्गीकुर्वन्तः स्थाणु पुरुष पदयो[illegible]स्थाणुत्व पुरुषत्वार्थकत्वम्, आकारद्वयस्य अयं स्थाणुः पुरुष[illegible] समुच्चयव्यावृत्तप्रका[illegible]ताद्वयनिरूपितकविशेष्यताक [illegible]कत्वञ्च अङ्गीकृत्य स्थाणुत्व पुरुषत्व कोटिकं संशय मङ्गीकुर्वन्ति ॥

अपरे, भावद्वयकोटिकसंशयमनङ्गीकुर्वन्तः स्थाणुपदस्य स्थाणुत्वार्थकत्वम्, पुरुषपदस्य स्थाणु[illegible]भा[illegible]र्थकत्वञ्च अङ्गीकृत्य स्थाणुत्व स्थाणुत्वाभावकोटिकं [illegible]पुरुषत्व[illegible] पुरुषत्वाभाव कोटिकं वा संशयमङ्गीकुर्वन्ति। अत्रापि [illegible] [illegible]निरुक्त विशेष्यतासूचकमेव ॥

भावद्वयकोटिकसंशयाङ्गीकर्तृमते निरुक्तनानाधर्मपदेन स्थाणुत्व पुरुषत्वरूपधर्मौ भावद्वयकोटिकसंशयानङ्गीकारे स्थाणुत्व स्थाणुत्वाभावरूपभावाभ[illegible]कारत[illegible]चादाय लक्ष[illegible]समन्वयः कर्तव्यः।

ज्ञानत्वमात्रोक्तौ ति, कुतः, स्वप[illegible]तिव्याप्तिः। ज्ञानत्वानुपादाने स्थाणुर्वा पुरुषोवेति संतविशेष्यतायमाने संस्थानप्रप्रका[illegible]त्वा पुरुषोवेति संशयो भूया[illegible] [illegible]च्छायां) अतिव्याप्तिः[illegible]पितविशेष्यताक निवेशः कार्यः। [illegible]धर्मावि[illegible]यकत्वे सति [illegible]ज्ञानत्वे[illegible] [illegible] पत्रे

५।। [illegible]ना न [illegible]

... तयोर्मिलित्वा ... गगने ... विरुद्धनानाधर्मप्रकारकत्व ... संयोगे ...
निवेशे ... तथा विरुद्धनानाधर्मप्रकारक
त्वाभावात् नाति ... । विरुद्धनानाधर्मप्रकारकत्वे गति ज्ञान
त्वमात्रोक्तौ ... पर्वतो वह्निमान् ह्रदो वह्न्यभाववान् इत्याकारकसमू
हालम्बनज्ञाने वह्निवह्न्यभावरूपनानाधर्मयोः पर्वतह्रदरूपधर्मिभे
देन प्रकारत्वादतिव्याप्तिः, एकधर्मिविशेष्यकत्वोपादाने तु निरु
क्तज्ञानस्य धर्मिद्वयमुख्यविशेष्यकत्वे ... धर्मिविशेष्यकत्वाभा
वात् नातिव्याप्तिः । नानापदानुपादाने ... पटत्ववान्
पटः इति यथार्थज्ञाने पटरूपैकधर्मिविशेष्यकत्व घटत्वविरुद्धपट
त्वरूप ... रुद्धधर्मप्रकारकत्व ज्ञानत्वानां सत्त्वात् तत्रातिव्याप्तिः,
अतो नानापदम्, तन्निवेशे तत्र पटत्वरूपैकधर्मस्यैव प्रकारत्वेन
नानाधर्मप्रकारकत्वाभावात् नातिव्याप्तिः । विरुद्धपदानुपादाने
घटपटवत् भूतलं इति एकत्र द्वयमिति रीत्याऽवगाहिज्ञाने एक
धर्मिविशेष्यकत्वघटपटरूपनानाधर्मप्रकारकत्व ज्ञानत्वानां स
त्त्वात् तत्राऽतिव्याप्तिः विरुद्धपदनिवेशे तु घटपटयोर्विरुद्धत्वा
भावेन विरुद्धनानाधर्मप्रकारकत्वाभावात् नातिव्याप्तिः ॥

नच पर्वतो ... मान् ह्रदो वह्न्यभाववान् इति ज्ञाने धर्मिद्वय
विशेष्यकत्व ... तिः शते पञ्चाशत् इति न्यायेन । एकधर्मि
विशेष्यकत्व ... सत्त्वादतिव्याप्तिरिति वाच्यम्, एकधर्मि
निष्ठविशेष्यतानि ... या विरुद्धनानाधर्मनिष्ठा प्रकारता
तन्निरूपकत्वस्य ... लक्षणार्थत्वात्, तथाच, अत्र ज्ञाने एकस्मिन्
धर्मिणि नानाधर्मयोः ... रत्वात् नातिव्याप्तिः । नच द्रव्यं
वह्निमत् ह्रदो वह्न्यभाववान् इति समूहालम्बनज्ञाने द्रव्यत्वेन

रूपेण ह्रदस्यापि विशेष्यतया एकस्मिन् ह्रदरूपे धर्मिणि वह्नि
तदभावयोः प्रकारत्वे नातिव्याप्तितादवस्थ्यमिति वाच्यम्,
एकधर्मावच्छिन्नविशेष्यतानिरूपितत्वस्य विरुद्धनानाधर्मनिष्ठ
प्रकारतायां विशेषणीयत्वात्. तथाच द्रव्यत्व ह्रदत्वाभ्यां
भासमाने ह्रदरूपैकधर्मिणि नानाधर्मयोः प्रकारत्वेऽपि एकधर्मा
वच्छिन्ने द्रव्यत्वावच्छिन्ने ह्रदत्वावच्छिन्ने वा विरुद्धनानाधर्मयोः
अप्रकारत्वेन एकधर्मावच्छिन्नविशेष्यतानिरूपितविरुद्धनानाध
र्मनिष्ठप्रकारताकत्वाभावात् नातिव्याप्तिः ॥

(नच ह्रदो वह्निमान् वह्न्यभाववांश्चेति समुच्चयज्ञाने ह्रदत्व
रूपैकधर्मावच्छिन्नविशेष्यतानिरूपितविरुद्धनानाधर्मनिष्ठप्रकार
तानिरूपकत्वस्य सत्त्वादतिव्याप्तिरिति वाच्यम्, प्रकारताविशि
ष्टविशेष्यतानिरूपकत्वस्य तदर्थत्वात्, विशेष्यतायां प्रकारतावै
शिष्ट्यञ्च स्वनिरूपितत्व स्वावच्छेदकधर्मावच्छिन्नप्रतियोगिताका
भावत्वावच्छिन्नप्रकारतानिरूपितत्वोभयसम्बन्धेन. तथाच एत
स्मिन् समुच्चयज्ञाने प्रकारताद्वयनिरूपितविशेष्यताद्वयस्याङ्गीकृत
त्वेन वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यतायाः वह्न्यभाव
त्वावच्छिन्नप्रकारतानिरूपितविशेष्यतायाश्च परस्परं भिन्नतया
निरुक्तसम्बन्धद्वयेन प्रकारताविशिष्टा विशेष्यता न काप्यत्र वि
शेष्यता भवितुमर्हति. कुतः, स्वपदेन वह्नित्वावच्छिन्नप्रकारतायाः
परिग्रहणे स्वनिरूपितविशेष्यतायां स्वाभावनिष्ठप्रकारतानिरूपि
तत्वं न सम्भवति, स्वाभावनिष्ठप्रकारतानिरूपितविशेष्यतायां
स्वनिरूपितत्वं न सम्भवति. अतः निरुक्तसम्बन्धद्वयेन प्रकारता
विशिष्टविशेष्यता न कापि एतत्ज्ञानीया प्रसिद्धा भवति. अतो

तानतिव्याप्तिः। संशये च प्रकारताद्वयनिरूपितैकविशेष्यताया अ त्रोपगन्तव्येन तादृशप्रकारताविशिष्टविशेष्यतानिरूपकत्वस्य सत्त्वात् समन्वयः सम्भवतीति न काप्यनुपपत्तिः। भावद्वयकोटिकसंश याङ्गीकर्तृमते स्वनिरूपितत्व स्वाश्रयविरुद्धधर्मनिष्ठप्रकारतानिरू पितत्वोभयसम्बन्धेन प्रकारताविशिष्टं ग्राह्यम्, अन्यथा, घटत्व वान् पटत्ववांश्च पटः इति समुच्चयेऽतिव्याप्तिः)

(वह्न्यभाववद्वृत्तो वह्निमान् इति नियताहार्यनिश्चये विरु द्धयोः वह्नि तदभावयोः विषयत्वेऽपि वह्न्यभावनिष्ठविषयताया अत्र विशेष्यतावच्छेदकतारूपत्वेन अवच्छेदकत्वानात्मकप्रकार ताविशिष्टविशेष्यताकत्वस्य लक्षणत्वेन विवक्षिततया तत्र एता दृशलक्षणाभावेन अतिव्याप्त्यभावात्. संशयमभिनीयदर्शयति स्थाणुर्वेति ॥

मू॰ मिथ्याज्ञानं विपर्ययः। यथा, शुक्तौ इदं रजतं इति ॥

विपर्ययं लक्षयति मिथ्येति ॥ मिथ्या च तत् ज्ञानञ्चेति कर्मधारयः। तत्र ज्ञाने मिथ्यात्वञ्च तदभाववद्विशेष्यकत्वावि शिष्टतत्प्रकारकत्वरूपम्। तथाच, तदभाववद्विशेष्यकत्वे सति तत्प्रकारकत्वे सति ज्ञानत्वं विपर्ययलक्षणमिति फलितम्। तथाच शुक्तौ इदं रजतं इति ज्ञाने तत्पदग्राह्यरजतत्वाभाववद्वि शेष्यकत्व रजतत्वप्रकारकत्व ज्ञानत्वानां सत्त्वात् समन्वयः। नन्वेवमपि स्थाणुर्वा पुरुषोवेति संशये यदि वह्निः स्यात् तर्हि धूमोऽपि स्यात् इति तर्के च तदभाववद्विशेष्यत्वघटितलक्षण सत्त्वात् अतिव्याप्तिरिति चेन्मम्, तर्कभिन्नत्वनिश्चयत्वयोः विशे

शनीयत्वात्, [illegible] भावेन तर्के तर्क भिन्नत्वाभाव[illegible]

मू* [illegible]। यथा

यदि वह्निः नस्यात् [illegible]धूमोऽपि नस्यादिति॥

तर्कं लक्षयति व्याप्यारोपेणेति॥ व्याप्यस्यारोपः व्यापकस्यारोपः इत्यत्र उभयत्रापि षष्ठ्याः विषयतानिरूपकत्वमर्थः। उभयत्र[illegible]भ्रमः। व्याप्यारोपेणेत्यत्र तृतीयायाः जन्यत्वमर्थः [illegible] व्याप्यविषयकभ्रमजन्यव्यापकविषयभ्रमत्वं त[illegible]क्षणम्। व्याप्यविषयको यो भ्रमः यदि वह्न्यभाववान् स्यादिति भ्रमः, तज्जन्यो यो व्यापकविषयकभ्रमः धूमभाववान् स्यादिति भ्रमः तादृशभ्रमत्वस्य यदि वह्न्यभाववान् स्यादिति भ्रमजन्ये धूमाभाववान्स्यादितिभ्रमे (तर्केऽपि) विद्यमानत्वात् लक्षणसमन्वयः॥

पर्वतो वह्निमान् धूमात् इति कश्चित् पुंसा धूमरूपहेतुना वह्नौ साधनीये सति पर्वते धूमोऽस्तु वह्निः मास्त्वित्यप्रयोजक शङ्कायां प्रसक्तायां सत्यां तच्छङ्कानिवृत्त्यर्थं अनुमानकर्त्रा धूमं प्रति वह्नेः कारणत्वेन (कारणा[illegible]वात् कार्या[illegible] इति नियमेन) यदि वह्निः न स्यात् तर्हि [illegible] स्यादिति कार्यकारणभाव भङ्गानुकूलः तर्कः सम्पाद्य[illegible] व्याप्यव्य[illegible] निश्चयः कारणं भवतीति व[illegible]। अन्यथा, पर्वते धूमोऽस्तु वह्निः मास्तुइत्यत्राप्रयोज[illegible]रणं इष्टापत्तिं वाभ्यु[illegible]। ततश्च तर्कानुत्पत्तिः [illegible]तेति त[illegible] कारणत्वम[illegible]वश्यकम्[illegible]

[illegible]यथार्थाऽयथार्थांचे

[illegible]माजन्याऽयथार्था॥

[illegible]रूपयति स्मृतिरित्यादिना ॥ यथार्थस्मृति लक्ष[illegible]मेति ॥ प्रमाजन्यत्वे सति स्मृतित्वं यथार्थस्मृतेः ल[illegible]म् । स्मृतित्वमात्रोक्तौ अयथार्थस्मृतौ प्रमाजन्यत्वमात्रोक्तौ प्रमाध्वंसे च अतिव्याप्तिः, अतः दलद्वयोपादानम् । नच गुणत्वदलेनैव प्रमाध्वंसेऽतिव्या[illegible]रणसम्भवे स्मृतित्वपर्यन्तानुसरणं व्यर्थमिति वाच्यम्[illegible]जन्यसंस्कारेऽतिव्याप्तिवारणाय तत्सार्थक्यात् । नच ज्ञानत्व[illegible]संस्कारेऽतिप्रसङ्गवारणसम्भवेन स्मृतित्वस्यैव वैयर्थ्यमेवेति वाच्यम्, दण्डरूपविशेषण प्रमाजन्यत्वज्ञानत्वयोः दण्डी पुरुष इति अनुभवरूपविशिष्टबुद्धौ सत्वात् तत्रातिव्याप्तिवारणाय स्मृतित्वस्य सार्थक्यात् नच विशिष्टबुद्धि प्रति विशेषणज्ञानमेव कारणं, नतु विशेषणप्रमा, अतः तत्कारणतावच्छेदकं बुद्धित्वमेव, नतु प्रमात्वम्, अतः प्रमात्वावच्छिन्नजनकतानिरूपितजन्यत्वदलेनैव ध्वंसे विशिष्टबुद्धौ च अतिव्याप्तिवारणेन स्मृतित्वस्य वैयर्थ्यमेव (ध्वंसं प्रति प्रतियोगिनः प्रतियोगित्वेन तत्तद्व्यक्तित्वेन वा कारणत्वात्) इति वाच्यम्, इष्टापत्तेः [illegible] अतएव ग्रन्थकृता स्मृतित्वं विहाय प्रमाजन्या यथार्थ[illegible]लेऽभिहितम् ॥

अयथार्थ[illegible]यति अप्रमेति ॥ अप्रमाजन्यत्वे सति स्मृतित्वं अयथार्थस्मृते[illegible]णम् । दलसार्थक्यं विचारश्च पूर्ववत् द्रष्टव्यः ॥

मू* सर्वेषामनुकूलतया वेदनीयं सुखम् ॥

सुखं लक्षयति सर्वेषामिति ॥ अत्र षष्ठ्याः समवेतत्वं तृतीयायाः प्रकारतानिरूपकत्वं, विद् धातोः ज्ञानं, तदुत्तरवर्ति प्रत्ययस्य विषयत्वञ्चार्थः। तथाच सर्वसमवेतानुकूलत्वप्रकारकज्ञानविषयत्वं सुखस्य लक्षणम् इति फलितम्। सर्वसमवेतं अनुकूलत्वप्रकारकं यत् ज्ञानं सुखं मदनुकूलं इति ज्ञानं, तद्विषयत्वस्य सुखे सत्वात् समन्वयः। अत्र विषयत्वं विशेष्यतारूपं ग्राह्यम्, अन्यथा निरुक्तज्ञानीय प्रकारतामादायानुकूलत्वादावतिव्याप्तिः। सर्वपदाभावे घटादावपि तादृशविषयत्वस्य सत्वादतिव्याप्तिः, सर्वपदनिवेशे तु सर्वेषां घटो मदनुकूलः इति ज्ञानाभावेन नातिव्याप्तिः। नचैवमपि दस्युसुखस्य तत्प्रति पक्षिणां प्रतिकूलतया तत्र सर्वसमवेतानुकूलत्वप्रकारकज्ञानविषयत्वस्याभावेनाव्याप्तिः, वैषयिके सुखे साधूनां द्वेषदर्शनेन तत्र सर्वसमवेतानुकूलत्वप्रकारकज्ञानविषयत्वस्याभावादव्याप्तिश्चेति वाच्यम्। इतरेच्छानधीनेच्छाविषयत्वस्य तल्लक्षणत्वात्, प्रथमं सुखेच्छायामुत्पन्नायां सुखसाधनेच्छा समुदेति, सुखेच्छा तु इदं सुखं इति सुखत्वप्रकारकज्ञानाज्जायते, तथाच सुखेच्छां प्रत्यन्येच्छाः न कारणीभवितुमर्हन्ति, तथाच सर्वासाञ्च भोजनादीच्छानां सुखेच्छानन्तरमुत्पद्यमानत्वेन सुखेच्छाधीनतया सुखेच्छायास्तु स्वेतरेच्छानधीनतया इतरेच्छानधीना या इच्छेत्युक्तौ सुखेच्छा भवति, तद्विषयत्वं सुखे वर्तत इति लक्षणसमन्वयः। सुखातिरिक्तविषयं सुखेच्छारूपेतरेच्छाधीनेच्छाविषयत्वस्यैव

सत्वात् विषयेषु नातिव्याप्तिः। इच्छाविषयत्वमात्रोक्तौ भोजनादावतिव्याप्तिः, इतरेच्छानधीनत्वस्येच्छायां निवेशे तु भोजनादीच्छायाः सुखेच्छारूपेतरेच्छाधीनतया नातिव्याप्तिः॥

मू०—सर्वेषां प्रतिकूलतया वेदनीयं दुःखम्॥

दुखं लक्षयति सर्वेषामिति॥ अर्थक्रमः पूर्ववत्॥ सर्वसमवेतप्रतिकूलत्वप्रकारकज्ञानविषयत्वं दुःखस्य लक्षणमिति फलितम्। सर्वसमवेतं प्रतिकूलत्वप्रकारकं यत् ज्ञानं दुःखं मत्प्रतिकूलं इति ज्ञानं, तद्विषयत्वं दुःखे वर्तत इति समन्वयः। अत्रापि विषयत्वं विशेष्यतारूपं ग्राह्यम्, अन्यथा पूर्ववत् प्रतिकूलत्वादावतिव्याप्तिः। सर्वपदाभावे साधुसमवेतप्रतिकूलत्वप्रकारकज्ञानविषयत्वस्य वैषयिकसुखादौ सत्वादतिव्याप्तिः। अतः सर्वपदोपादानम्। नचैवमपि सर्पादेः शत्रुसुखादेश्च सर्वसमवेतप्रतिकूलत्वप्रकारकज्ञानविषयत्वादतिव्याप्तिरिति वाच्यम्, इतरद्वेषानधीनद्वेषविषयत्वस्य तल्लक्षणत्वात्. प्रथमं दुःखे द्वेषात् दुःखसाधनेषु सर्पादौ द्वेषः, अतो विषयेषु द्वेषः दुःखद्वेषाधीनः, दुःखद्वेषस्तु इदं दुःखं इति ज्ञानात् जायते, अतः इतरद्वेषानधीनो यो द्वेषः दुःखद्वेषः, तद्विषयत्वस्य दुःखे सत्वात् समन्वयः। शत्रुसुखादावपि दुःखद्वेषाधीनद्वेषविषयत्वस्य सत्वात् नातिव्याप्तिः। द्वेषविषयत्वमात्रोक्तौ सर्पादावतिव्याप्तिः, द्वेषे इतरद्वेषानधीनत्वनिवेशे तु सर्पादिषुद्वेषस्यापि दुःखद्वेषाधीनतया नातिव्याप्तिः। (फलेच्छा उपायेच्छाकारणम्, फलद्वेषः उपायद्वेषकारणम्, फलेच्छाफलद्वेषौ तु फलज्ञानजन्यौ इति विवेकः).

... कृतिः प्रयत्नः ॥

अह... स्यादिप्रनीति
विषयताव... लक्षणमिति सूत्रो
ध्ययिपुरम्भट्टः इच्छा... कार्या द्वेषः, कृतिः प्रयत्नः, इत्या
दिना इच्छाद्वेषप्रयत्नानां पर्या... न्येवं प्रादर्शयत् ॥ अथवा,
इच्छाप्रयत्नयोः पृथक् लक्षणे अपि सम्भवतः, तथाहि, ...
अ... प्रति कृतिजनकत्वं इच्छायाः लक्षणम् जानाति इच्छति,
... त क्रममनुसृत्य ज्ञान... न्यत्वकृतिजनकत्वयोरिच्छायां
... त्वात् समन्वयो बोध्यः ॥ (इच्छाजन्यत्वे सति गुणत्वं) कार्य
मात्रकारणतावच्छेदकत्वं कृतिलक्षणं बोध्यम् (पूर्वक्रममनुसृ
त्येच्छाजन्यत्वं) कार्यमात्रं प्रति कर्तुः कारणत्वेन कार्यमात्रकार
णतावच्छेदकत्वञ्चास्तीति समन्वयो बोध्यः ॥ यद्वा ॥ आख्यात
शक्यतावच्छेदकधर्मवत्त्वम् कृतिलक्षणं बोध्यम् । आख्यातमा
त्रस्य लाघवेन कृतित्वावच्छिन्ने शक्तयङ्गीकरणेन ... शक्य
तावच्छेदककृतित्वमादाय समन्वयो बोध्यः ॥

मू॰ विहितकर्मजन्यो धर्मः ॥

धर्मं लक्षयति विहितेति ॥ विहित... कर्मजन्यत्वं धर्मस्य लक्ष
णम् । यागादिविहि... स्य धर्मे सत्त्वात् समन्वयः ।
नचैवं विहितकर्मजन्... हतकर्मध्वंसे ... तिव्याप्तिरि
ति वाच्यम्, गुणत्व... निवेशनीयत्वात् । नचैवमा... प्रत्यक्ष
विषयस्य कारण... वन्दनादिरूपविहितक... कप्रत्य
क्षे विहितकर्म... गुणत्वयोः सत्त्वात् अतिव्याप्तिरिति वा

रूपस[illegible]न्, नादृशप्रत्यक्षस्य मनङ्
[illegible]निव्याप्तिः ॥

[illegible]: ॥

अधर्मं लक्ष[illegible] निषिद्धेति ॥ निषिद्धकर्मजन्यत्वमधर्मस्य लक्षणम्, निषिद्धकर्म कलञ्जभक्षणादि, तज्जन्यत्वमधर्मे वर्तते इति समन्वयः । नचैवं निषिद्धकर्मजन्यत्वस्य निषिद्धकर्मध्वंसे सत्वादतिव्याप्तिरिति वाच्यम् [illegible]र निषेधज्ञानीयत्वात् । नचैवं अविहितकर्मविषयकप्रत्यक्षे द[illegible]तिव्याप्तिरिति वाच्यम्, गुणपदस्य अतीन्द्रियगुणपरत्वात् नातिव्याप्तिः ॥

मू * बुद्ध्यादयोऽष्टावात्ममात्रवृत्तिगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य, अनित्या जीवस्य॥ संस्कारस्त्रिविधः, वेगो भावना स्थितस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः॥

प्रकृते आत्मेतरावृत्तित्वमेव आत्ममात्रवृत्तित्वम्, आत्मवृत्तित्वस्याऽपि प्रवेशे प्रयोजनाभावात् (नेदंलक्षणम) बुद्धीच्छाप्रय[illegible]नां आश्रयभेदेन द्वैविध्यमाह बुद्धीच्छेति॥ ईश्वराश्रितानां बुद्धीच्छाप्रय[illegible] सर्वप्रपञ्चकर्तृत्वानुरोधेन विनिगम[illegible]विरहेण यस[illegible] सर्वविदिति श्रुत्यनुरोधेन च सर्वप्रपञ्चविषयकत्वमङ्गीकृत[illegible] ईश्वराश्रितानां तेषां अनित्यत्वमा[illegible]भावे विनिगमक[illegible]वेन [illegible]त्वमप्यङ्गीकार्यम्। ईश्वराश्रिता बुद्धिश्च प्रत्यक्षरूपैव न[illegible]त्यादिरूपा॥ ईश्वरस्य नित्यसुख

मप्यङ्गीकुर्वन्ति केचन ॥ विभुविशेष (ईश्वरभिन्नविभुविशेष) गुणानां स्वोत्तरोत्पन्नविशेषगुण (विभुविशेषगुण) नाश्यत्वनियमेन नाशप्रतीत्यनुरोधेन च जीवाश्रितस्य तत्त्रयस्य अनित्यत्वमेवाङ्गीकार्यम् (शब्दबुद्ध्योः द्विक्षणावस्थायित्वमेवाङ्गीक्रियते) संस्कारं विभजते संस्कार इति। वेगं लक्षयति पृथिव्यादीति ॥ एतद्वाक्यं स्वरूपकीर्तनपरम। लक्षणन्तु मनोवृत्तित्वमेव. पृथिव्यादिप्रवेशे प्रयोजनाभावात्। नच मूर्तानां दिगुपाधित्वमिति न्यायेन मूर्तेषु दिक्कृतविशेषणतासम्बन्धेन सर्वस्यापि प्रपञ्चस्य सत्त्वेन मनोनिरूपितनिरुक्तसम्बन्धावच्छिन्नवृत्तितामादाय घटादावतिव्याप्तिरिति वाच्यम्, मनोनिरूपितवृत्तितायां समवायसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात्, तेन सम्बन्धेन मनसि घटादीनामभावात् नातिव्याप्तिः। नच क्रियासंयोगादौ मनोनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वस्य सत्त्वात्तत्रातिव्याप्तिरिति वाच्यम्, संस्कारत्वस्यापि निवेशनीयत्वात्. क्रियादौ संस्कारत्वाभावात् नातिव्याप्तिः ॥

मू* अनुभवजन्या स्मृतिहेतुः भावना। आत्ममात्रवृत्तिः ॥

भावनां लक्षयति अनुभवेति ॥ अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाया लक्षणम्। प्रथममनुभवः, तदनु भावनाख्यसंस्कारः, तदनु स्मृतिः, इति क्रममनुसृत्य अनुभवज

भावनालक्षणे ॥ ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणतया दण्डीपुरुष इत्यनुभवात्मकविशिष्टबुद्धौ विशेषणज्ञानात्मकदण्डानुभवजन्यत्वस्य दण्डी पुरुष इति जनिष्यमाण

न्यत्वे सति स्मृतिहेतुत्वस्य भावनायां सत्वात् समन्वयः (अनुभवजन्यत्वमात्रोक्तावनुभवध्वंसे स्मृतिहेतुत्वमात्रोक्तावात्मादौ च अतिव्याप्तिः, अतो दळद्वयोपादानम्। नच अनुभवजन्यत्वं अनुभवनिष्ठसमवायसम्बन्धावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूपं निवेश्यते. ध्वंसं प्रति प्रतियोगिनः तादात्म्यसम्बन्धेनैव कारणतया समवायसम्बन्धावच्छिन्नानुभवनिष्ठकारणतानिरूपितकार्यत्वस्य अनुभवध्वंसेऽभावेन अतिव्याप्तिवारणसम्भवेन स्मृतिहेतुत्वदळमनर्थकमिति वाच्यम्. स्मृतिं प्रत्यनुभवस्य समवायसम्बन्धेनैव कारणतया समवायसम्बन्धावच्छिन्नानुभवनिष्ठकारणतानिरूपितकार्यत्वस्य स्मृतौ सत्वेन तत्राऽतिव्याप्तिवारणाय स्मृतिहेतुत्वदळसार्थक्यात् अतएव गुणत्वदले

स्मृतिहेतुत्वस्य च सत्वात् तादृशविशिष्टबुद्धा वतिव्याप्तिरिति वाच्यम्. अत्रानुभवजन्यत्वं अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूपं निवेश्यते. नत्वनुभवनिष्ठकारणतानिरूपितकार्यताश्रयत्वरूपम्, तथाच विशिष्टबुद्धिं प्रति विशेषणानुभवस्यापि ज्ञानत्वेनैव कारणत्वं नत्वनुभवत्वेन तथाच ज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य दण्डी पुरुष इति विशिष्टबुद्धौ सत्वेपि अनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य तत्राभावात् नातिव्याप्तिः। (दण्डानुभवात् दण्डस्मरणादपि दण्डी पुरुष इति विशिष्टबुद्धेरुदयात् स्मृत्यनुभवसाधारणज्ञानत्वेनैव विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वं वाच्यम्) भावनां प्रत्यनुभवस्यैव कारणतयाऽनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वं भावनायां वर्तत इति लक्षणसमन्वयः। नचैवं

नैव अनुभ[illegible]दत्वमफलमिति शङ्क[illegible]वारणायैव तत्सार्थक्यात् ॥

मू॰* अन्यथा कृ[illegible]स्य पुनस्तादवस्थ्यापादकः स्थितस्थापकः । [illegible]टादिपृथिवीमात्रवृत्तिः ॥

[illegible]यापकं लक्षयति अन्[illegible]थेति ॥ अन्यशब्दस्य पूर्वाव[illegible]न्नावस्थानाश्रयत्वम्. [illegible]ल्प्रत्ययस्य प्रकारतानिरूपकत्वम्. कृञ्धातोः कृतिः, क्तप्रत्ययस्य विषयताविशिष्टम्, षष्ठ्या आश्रयत्वञ्चार्थः । साऽवस्था यस्य सः त[illegible]वस्थः तदवस्थस्य भावः तादवस्थ्यम्, तच्च तदवस्थ[illegible]त्वं. त[illegible] (प्रकृत्यर्थं प्रकारीभूतधर्म इति. नियमेन तदवस्थैवेति फ[illegible]त[illegible]। तथाच, पूर्वावस्थानाभिन्नावस्थानाश्रयत्वप्रकारककृतिनिरूपितविषयता[illegible]स्तु निष्ठपूर्वावस्थानसम्पादकत्वं स्थितस्थापकस्य लक्षणमिति फलि

ध्वंसं प्रति प्रतियोगिनः प्रतियोगित्वेन रूपेण तत्तद्ध्वंसत्वाव च्छिन्नं प्रति तत्तत्प्रतियोगिव्यक्तेः तत्तद्व्य[illegible]नैव कारणत्वस्या ङ्गीकृततया ऽनुभवध्वंसं [illegible]त्वेन कार[illegible]वाभावेन अनुभवत्वावच्छिन्नकारणता[illegible]श्रयत्वम[illegible]ध्वंसेऽभावे नैव तव्रातिव्याप्तिवारण[illegible] स्मृतिहेतुत[illegible]लस्य व[illegible]मिति वाच्यम्, स्मृतिं [illegible]वस्यैव कारणतयाऽनुभ[illegible]च्छिन्नकारणतानिरूपि[illegible]ताश्र[illegible]स्य स्मृतौ सत्वेन [illegible]तिव्याप्तिवारणायैव तत[illegible]त्, स्मृति[illegible]तुत्वनि[illegible]न्तु [illegible] स्मृतिः स्मृतिहेतुरिति [illegible]तव्याभि[illegible]लम् ॥

[illegible]॥

तम् (आत्मं[illegible]रत्वं स्थितस्थापकस्य ल
क्षणं [illegible]

[illegible]र्ध्वदेशसंयोगहेतुरु
[illegible]दिश[illegible]हेतुरपक्षेपणम् । श
रीरसन्नि[illegible]संयोगहेतुराकुञ्चनम् । शरीरविप्र
कृष्टसंयोगहेतुः प्रसारणम् । अन्यत्सर्वं गमनम् ॥

कर्म निरूपयति [illegible]लनेति ॥ ऊर्ध्वदेशसंयोगहेतुत्वमुत्क्षेपणस्य लक्षणम् । आदौ क्रिया, ततो [illegible] तत आरम्भकसंयोगनाशः, तत [illegible]त्तरदेशसंयोगोत्पत्ति[illegible]मनुसृत्य ऊर्ध्वदेशसंयोगहेतुत्वस्य उत्क्षेपणे सत्वात्, गमने[illegible]चैवं ईश्वरादृष्टादावपि तादृशहेतुत्वस्य सत्वादतिव्याप्तिरिति वाच्यम्, कर्मत्वस्यापि निवेशनीयत्वात् । एवं अपक्षेपणादिप्रसारणान्तानां त्रयाणां लक्षणं बोध्यम् । उत्क्षेपणादिभिन्नत्वे सति कर्मत्वं गमनलक्षणं बोध्यम्, एतदेव व्यनक्ति ग्रन्थकारः अन्यत्सर्वं गमनमित्यादिना, तच्च गमनं भ्रमणादिभेदेन पञ्चविधं बोध्यम् ॥

मू* नित्यमेकमनेकानुगतं सामान्यम् । द्रव्य
गुणकर्मवृत्ति । परं सत्ता । अपरं द्रव्यत्वादि ॥

[illegible]सामान्यं लक्ष[illegible]ति नित्यमिति ॥ अनेकेष्वनुगतं अनेकानुगतं सप्तम्य[illegible]र्थः, अनुगतत्वञ्च समवेतत्वं, तच्च [illegible]समवायसम्बन्[illegible]वृत्तित्वरूपम् । तथाच, नित्यत्वे सति अनेकनिरूपितसम[illegible]सम्बन्धावच्छिन्नवृत्तित्वं सामान्यस्य लक्षणमिति फलि[illegible] । [illegible]त्वमात्रोक्तौ गगनादावतिव्याप्तिः ।

अनेकसमवेतत्वमात्रोक्तौ घटादीनामपि कपालादिरूपानेक पदा र्थसमवेतत्वेन घटादावतिव्याप्तिः, अतः दळद्वयोपादानम् । नचैवं आश्रयत्वदळेनैव अवृत्तिगगनादावतिव्याप्तिवारणसम्भ वेन अनेकसमवेतत्वपर्यन्तस्य वैयर्थ्यमिति वाच्यम्, परमाणु ष्वतिव्याप्तिवारणायतत्सार्थक्यात् । नचैवमपि समवेतत्वदळे नैव तत्रातिव्याप्तिवारणसम्भवे ऽनेकपदस्य वैयर्थ्यमिति वाच्यम्, जलपरमाणुगतरूपादौ नित्यत्व समवेतत्वयोः सत्वेनातिव्याप्ति प्रसङ्गात् । तन्निवेशे तु प्रत्येकाभिन्नस्य परमाणुरूपस्य कस्यपि अनेकसमवेतत्वाभावेन अतिप्रसङ्गविरहात् । नच विभुद्वयसं योगाङ्गीकर्तृमते तत्संयोगे दळद्वयसत्वेनातिव्याप्तिरिति वाच्यम्, संयोगभिन्नत्वस्यापि निवेशनीयत्वात् । नचात्र एकपदं व्यर्थ मिति वाच्यम्, इष्टापत्तेः, तस्य स्वरूपकीर्तनमात्रपरत्वात् । सामान्यं विभजते परमिति ॥ अत्र परत्वमधिकदेशवृत्तित्व रूपम् । अपरत्वं न्यूनदेशवृत्तित्वरूपम् ॥

मू * नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ॥

विशेषान् लक्षयति नित्यद्रव्येति ॥ नित्यद्रव्यनिरूपितवृत्ति ताश्रयत्वे सति व्यावर्तकत्वं नित्यद्रव्यविशेष्यकेतरभेदप्रकार कानुमितिजनकत्वरूपम् यथाश्रुते विशेषलक्षणं बोध्यम् । पृथि व्यादिचतुर्विधपरमाणवः आकाशादिपञ्चकञ्च नित्यद्रव्याणि, तद्विशेष्यकेतरभेदप्रकारकानुमितिः अयं परमाणुः इतरभिन्नः इत्याकारकानुमितिः, तज्जनकत्वं एतद्विशेषरूपहेतौ वर्तत इति समन्वयः । एतद्विचारस्तु दीपिकाव्याख्यानावसरे व्यक्तीकरि ष्यते ॥

मू० नित्यसम्बन्धः समवायः। अयुतसिद्ध वृत्तिः। ययोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथा, अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति॥

समवायं लक्षयति नित्येति॥ नित्यत्वे सति सम्बन्धत्वं समवायस्य लक्षणं बोध्यम्। नित्यत्वमात्रोक्तौ गगनादौ सम्बन्धत्वमात्रोक्तौ संयोगादौ च अतिव्याप्तिरिति उभयोपादानम्॥

अयुतसिद्धं लक्षयति ययोरिति॥ ययोः घटकपालयोः मध्ये एकं घटः अविनश्यदवस्थं विनाश्यदवस्थामनापन्नं सत् अपराश्रितमेव कपालाश्रितमेव अवतिष्ठते तौ घटकपालौ अयुतसिद्धौ। एवम् अवयवि गुण क्रिया जाति विशेषाणां कदाचिदपि अवयव गुणि क्रियावत् व्यक्ति नित्यद्रव्याणि विहाय पृथगवस्थितेरभावेन अवयवावयविनोः गुणगुणिनोः क्रियाक्रियावतोः जातिव्यक्त्योः विशेषनित्यद्रव्याणाञ्च अयुतसिद्धत्वमिति भावः। लक्षणन्तु यन्निष्ठकालनिरूपिताधेयतासामान्यं यदवच्छिन्नं तदुभयान्यतरत्वं बोध्यम्। घटाद्यवयविनः काले कपालाद्यवच्छेदेन वर्तन्ते। अतः यन्निष्ठकालनिरूपिताधेयतासामान्यं घटाद्यवयविनिष्ठकालनिरूपिताधेयतासामान्यं, यदवच्छिन्नं कपालाद्यवयवावच्छिन्नं, तदुभयान्यतरत्वं अवयवावयविनोः वर्तते इति लक्षणसमन्वयः। एवमन्यत्रापि समन्वयः कार्यः। ननु अत्राधेयतासामान्यमित्यत्र सामान्यपदं व्यर्थम् प्रयोजनाभावात् इतिचेन्न, इदानीं भूतले घटः इति प्रतीत्या घटनिष्ठ

कालनिरूपि[illegible]तयां तदुभयान्यतरत्व मादाय भूत[illegible] सामान्यपदानि वेशे तु [illegible]तकपालाव च्छिन्नवृत्तिता[illegible]न नातिव्याप्तिः। नचैव मप्यसम्भवः, यत्पदग्राह्य[illegible]विधेयतासामान्यान्तर्गतभूतला वच्छिन्नवृत्तितायां कपालावच्छिन्नत्वाभावात् इति वाच्यम्, इह भूतलकपालयोः घटः इति प्रतीत्यनुरोधेन भूतलावच्छिन्नकाल निरू[illegible]मपि कपालावच्छिन्नत्वस्य सम्भवेन असम्भ[illegible]॥

मू* अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य॥

प्रागभावं लक्षयति अनादिरिति। प्रागभावाप्रतियोगित्वे सति ध्वंसप्रतियोगित्वं [illegible]गभावस्य लक्षणम्। प्रागभावस्योत्प त्त्यभावेन प्रागभावाप्रतियोगित्वम्। कार्योत्पत्त्यनन्तरं कार्यप्राग

☞ ध्वंसप्रागभावलक्षणयोः॥ [illegible]यत्र ध्वंसलक्षणे ध्वंसत्वस्य प्रागभावलक्षणे प्रागभावत्वस्य च अनुप्रवेशेनात्माश्रय दोषप्रसङ्गः ध्वंसलक्षणे प्रागभावत्वस्य प्रागभावलक्षणे ध्वंसत्वस्य च प्रवेशनान्योन्या[illegible]यदोषप्रसङ्ग[illegible]ति वाच्यम्, प्रति योगिजनकाभावत्वम्[illegible], प्रति[illegible]योगिजन्याभावत्वम् ध्वंसत्वम्, इति परि[illegible]यात्॥

☞ अन्योन्याभाव[illegible] अन्नाभावत्वस्य भावा[illegible] रूपत्वेन परिष्कर[illegible]भेदलक्षणे भेदत्वस्य घ[illegible]त्मा श्रयदोषप्रसङ्ग [illegible]वाच्यम्, अन्नाभावत्वम् न [illegible]भिन्नत्व

भावस्य ... तियोगित्वञ्चास्तीति लक्षणसमन्वयः । ... गगनादौ ध्वंसप्रतियोगित्वमात्रो ... पादानम् ॥

मू० सादिरनन्तः प्रध्वंसाभावः । उत्पत्तेरनन्तरं कार्यस्य ॥

प्रध्वंसाभावं लक्षयति सादिरिति॥ प्रागभावप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं प्रध्वंसाभावस्य लक्षणम् । घटादिध्वंसस्य शिलापातादिजन्यतया प्रागभावप्रतियोगित्वं कदाचिदपि ध्वंसस्य नाशासम्भवेन ध्वंसाप्रतियोगित्वं च लक्षणसमन्वयः । प्रागभावप्रतियोगित्वमात्रोक्तौ घटादावतिव्याप्तिः, ध्वंसाप्रतियोगित्वमात्रोक्तो गगनादावतिव्याप्तिः, अतः उभयोपादानम् ॥ (१)

मू० त्रैकालिकसंसर्गाभावोऽत्यन्ताभावः । यथा, भूतले घटो नास्तीति ॥

रूपम्, किन्तु भावत्वात्यन्ताभावरूपम्, अतो नोक्तदोषः । नचैवमपि भेदलक्षणे भावत्वात्यन्ताभावत्वरूपात्यन्ताभावत्वस्य अत्यन्ताभावलक्षणेऽन्योन्याभावाभिन्नत्वदलघटकभेदस्य च अनुप्रविष्टत्वे प्रकारान्तरेण अन्योन्याश्रयदोषप्रसङ्ग इति वाच्यम्, अत्यन्ताभावलक्षणे ... संसर्गाभावपदेन तादात्म्यभिन्न (वृत्तिनियामक) ... भिन्नत्वोपलक्षित) सम्बन्धावच्छिन्नप्रतियोगिताकाभाव ... विवक्ष्यते, नतु अन्योन्याभावभिन्नाभावः, अतो नोक्तदोषः । एवमेव अन्यत्रापि प्रसक्ता दोषा वारणीयाः ॥

अत्यन्ताभावं लक्षयति त्रैकालिकेति ॥ त्रैकालिकत्वञ्च नित्यत्वम्, तच्च ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वम्ः संसर्गाभावत्वञ्च अन्योन्याभावभिन्नाभावत्वम्। तथाच, ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वे सति अन्योन्याभावभिन्नत्वे सति अभावत्वं अत्यन्ताभावस्य लक्षणमिति फलितम्। प्रागभावध्वंसान्योन्याभावाकाशादिवारणाय क्रमेण दळचतुष्टयोपादानम् ॥ केचन संसर्गाभावत्वम्, तादात्म्यभिन्नसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमिति वदन्ति। तन्मते ध्वंसप्रागभावयोः सम्बन्धावच्छिन्नप्रतियोगिताकत्वविरहेण अन्योन्याभावे च तादात्म्यभिन्नसम्बन्धावच्छिन्नप्रतियोगिताकत्वविरहेणैव च तत्र तत्र अतिव्याप्तिवारणसम्भवेन त्रैकालिकत्वनिवेशो प्रयोजनाभावेन तत्पदं स्वरूपाख्यानपरमेवेति बोध्यम् ॥

☞ मू* तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः। यथा. घटः पटो. न भवतीति ॥

अन्योन्याभावं लक्षयति तादात्म्येति ॥ तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वे सति अभावत्वम् अन्योन्याभावस्य लक्षणम्। (येन सम्बन्धेन यन्नास्तीत्युच्यते तन्निष्ठा प्रतियोगिता तत्सम्बन्धावच्छिन्ना, इति न्यायेन. घटे पटस्य तादात्म्यसम्बन्धेनाभावेन तत्र तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य सत्वेन तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वाभावत्वयोः तस्मिन्नभावे. सत्वात् समन्वयः। अभावत्वमात्रोक्तावत्यन्ताभावादावतिव्याप्तिः, तादात्म्यसम्बन्धावच्छिन्नप्रतियो

गिताकत्वनिवेशे तु अत्यन्ताभावस्य तादात्म्यभिन्नसम्बन्धाव च्छिन्नप्रतियोगिताकतया तत्र तादात्म्यसम्बन्धावच्छिन्नप्रति योगिताकत्वाभावात् नातिव्याप्तिः, ध्वंसप्रागभावयोस्तु सम्ब न्धावच्छिन्नप्रतियोगिताकत्वविरहेण च नातिव्याप्तिः। तादा त्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वमात्रोक्तौ घटाभाववान्नेति प्रतीतिविषयीभूते घटस्वरूपे घटाभाववद्भेदे तादात्म्यसम्बन्धा वच्छिन्नप्रतियोगिताकत्वस्य सत्त्वेन तत्रातिव्याप्तिः, अतोऽभाव त्वनिवेशः। नच तादृशभेदेऽभावत्वमप्यस्तीत्यतिव्याप्तिताद वस्थ्यमितिवाच्यम्, अभावत्वस्य भावभिन्नत्वार्थकत्वेन निरुक्त भेदस्य घटात्मकभावरूपतया तत्र भावभिन्नत्वाभावेन अतिव्या प्त्यभावात् ॥

मू* सर्वेषामपि पदार्थानामुक्तेष्वेवान्तर्भावात्

सप्तैव पदार्था इति सिद्धम् ॥

तमस्साहश्यप्रभृतीनामतिरिक्तपदार्थानां सत्त्वेन कथं स प्तैव पदार्था इत्यत आह सर्वेषामिति ॥ एतत्सर्वं अस्मदीयपारि भाषिकपदार्थसङ्ग्रहे सर्वपदार्थानां क्लृप्तपदार्थेष्वन्तर्भावनिरूपण प्रस्तावे प्रपञ्चितम् ॥

मू* काणादन्यायमतयोः। बालव्युत्पत्तिसिद्धये।
अन्नम्भट्टेन विदुषा। रचितस्तर्कसङ्ग्रहः॥

इति श्रीमदन्नम्भट्टविरचिततर्कसङ्ग्रहः

समाप्तः



कणादस्येदं काणादम्, कणादाभिमत[illegible]तम् [illegible]यमतम् गौतममुनिमतम्, काणादन्याये च ते मते चेति द्वन्द्वगर्भकर्मधारयः, (कर्मधारयसमासेन [illegible]समानपदार्थयोरभेदसंसर्गलाभः) मतयोरित्यत्र षष्ठ्याः विषयतानिरूपकत्वमर्थः, बालानां व्युत्पत्तिरित्यत्र षष्ठ्याः समवेतत्वमर्थः. सिद्धयइत्यत्र चतुर्थ्याः प्रयोजक[illegible] (समानविभक्तिकनामार्थयोरभेदसम्बन्धेना[illegible]नियमः) विदुरित्यत्र तृतीयायाः समवेतत्वम्, रत्र यतः कृतिः क्तप्रत्ययस्य भूतकालिकत्वम् विषयतावांश्चार्थः, भूतकालिकत्वस्य कृतौ विषयतावतः तर्कसङ्ग्रहे चान्वयः। काणादन्यायाभिन्नमतद्वयविषय[illegible]बालसमवेतव्युत्पत्तिसिद्धिप्रयोजकान्नम्भट्टाभिन्नविद्वत्समवेतभूतकालिककृतिविषयाभिन्नतर्कसंग्रहाख्यग्रन्थ इत्यन्वयबोधः ॥


श्रीमत्रि[illegible]राजमानगुंटूरुमण्डलान्तर्वर्ति कृष्णातटिनी
[illegible]मीपवर्ति * [illegible]रुग्रामवास्तव्येन श्री न्यायवेदान्ततन्त्रसमु
[illegible]लब्धानिरवधिकप्रज्ञाविशेषवेमूर्युपनामक * श्री रामब्रह्म
सुधीन्द्रगुरुवरपदपङ्कजसेवासमधिगतशास्त्रविज्ञानेन गुं
टूरुमण्ड[illegible]तर्वर्ति श्री तेनालिसंस्कृतकलाशालायां
कौलङ्कारशास्त्राध्यापकेन * कुरुगंटुग्रुपनामक
श्रीसूर्यनारायणशास्त्रिद्वितीयतनयेन * श्री
रामशास्त्रिणा [illegible] रामरुद्रभट्ट
विरचिततर्कसङ्ग्र[illegible]
तर्कसङ्ग्रहसर्वस्वेऽयथार्थानु
भवादिनिरूपणम्
समाप्तिमगमत्

अयम् ग्रन्थस्समाप्तः

सर्वम् श्रीपरमेश्वरार्पणमस्तु

श्लो * व्युत्पित्सुसुखबोधाय प्रणीतेऽस्मिन् प्रमादतः
मुद्रणादिषु ये दोषाः क्षन्तव्यास्तेऽखिला बुधैः

श्रीः श्रीः श्रीः श्रीः श्रीः



शुद्धाशुद्धपत्रिका

अस्मिन् ग्रन्थे स्पष्टप्रतीतये (सुखबोधाय) वाक्येषु प्रायेण सन्धिः न विवक्षिता॥ * वाक्यान्तानुस्वारस्थाने सर्वत्रापि मकारो ग्राह्यः, यथा, लक्षणं पर्यवसितम् इति॥ * यत्रास्वरकः पदान्तो ऽनुस्वारो दृश्यते तत्रापि मकारो ग्राह्यः यथा. निरूपितम् इतीति॥ * साध्यपद विशेष्यपदयोः विशेष्यनिघ्नता ज्ञेया. यथा, वह्निस्साध्यः. वह्नित्वं साध्यम्, वह्निर्विशेष्यः वह्नित्वं विशेष्यम् इति॥

यत्रापदान्तोऽनुस्वारः स्पर्शपरको दृश्यते तत्रानुस्वारस्थाने तत्स्पर्शसवर्णोऽनुनासिको ग्राह्यः. नानुस्वारः। यथा, शङ्का. मङ्गलम्, पञ्च, कण्ठः, दण्डः, अत्यन्ताभावः. मन्थनम्, स्पन्द. प्रतिबन्धकः. परम्परासम्बन्धः. प्रारम्भः. इत्यादिस्थलेषु प्रमादतोऽनुस्वारस्य प्रवेशोऽप्येवं रीत्या तत्तत्स्पर्शसवर्णः तत्तद्वर्गीयपञ्चमवर्ण एव ग्राह्यः। ननु शंका मंगलं इत्यादिरीत्याऽनुस्वारो ग्राह्यः॥

प्रथमम्. यथा. तथा. अथः. पदार्थः. कथम्, कथितम्, पृथिवी. पृथक्त्वम्, अथ, अन्यथा. अन्यथासिद्धम्. सर्वथा, चतुर्थः, मिथ्या. स्थितस्थापकः. तदर्थम्, व्यर्थम्, वैयर्थ्यम्. इत्यादिषु कुत्रचित्तवर्गीयचतुर्थवर्णस्य प्रवेशोऽपि तवर्गीयद्वितीयवर्ण एव ग्राह्यः। द्विधा, चतुर्धा. विधादिपदेषु तवर्गीयचतुर्थवर्ण एव ग्राह्यः॥



